Sanskrit Sahitya Parishad Series No. 22

# PRASANTA-RATNAKARAM

( A new Sanskrit Drama )

BY

**KALIPADA TARKACHARYA**

*Lecturer in Sanskrit, Sanskrit College, Calcutta.*

With a Foreword

BY

DR. AMARESWAR THAKUR, M.A., PH.D.

and an Introduction

BY

ASHOKANATH SHASTRI, M.A., P.R.S.

SANSKRIT SAHITYA PARISHAD

**Shyambazar, Calcutta**

1939

Printed by J. C. Sarkhel.
at the Calcutta Oriental Press Ltd.,
9, Panchanan Ghose Lane,
Calcutta.

Published by the Secretaries,
Sanskrit Sahitya Parishad
Shyambazar, Calcutta.

Price { For members of the Pari
For others—**Re. 1/-**

संस्कृत-साहित्य-परिषद्-ग्रन्थमालायाम् २२तम-संख्या

# प्रशान्तरत्नाकरम्

( नवीनं नाटकम् )

कलिकातास्थ-राजकीय-संस्कृत-महाविद्यालयान्यतर-
न्यायशास्त्राध्यापकेन

श्रीकालीपद-तर्काचार्येण

प्रणीतम्

भारते भातु भारती

१८६१तमे शकाब्दे

कलिकातान्तर्गत-श्यामवाजारस्थ-

संस्कृत-साहित्य-परिषदा प्रकाशितम्

मूल्यम्— { परिषत्-सदस्यानाम्—॥।० द्वादशानकम्
{ अन्येषाम्—१) रूप्यकमात्रम्

कलिकाताराजकीयसंस्कृतमहाविद्यालयाध्यापक-

# श्रीयुक्तकालीपद-तर्काचार्यप्रणीत-ग्रन्थमाला

## निःशेषप्रकाशिता ग्रन्थाः :—

१। सूक्तिदीपिका ( जगदीशकृतप्रशस्तपादभाष्यसूक्तेः टीका ) वङ्गभाषामयभाष्यतात्पर्यादिसमुपबृंहिता ।

२। मुक्तिदीपिका ( गदाधरभट्टाचार्यकृतमुक्तिवादस्य न्यायशास्त्रीयग्रन्थस्य टीका ) वङ्गभाषामय-मुक्तिवाद-तात्पर्यविवरण-नानादर्शनमतसिद्धमुक्तितत्त्वविचारात्मकमुक्तिवादभूमिकादिसमलङ्कृता ।

३। रत्नलक्ष्मीटीका ( कणादतर्कवागीशकृतभाषारत्नाख्यनैयायिकपदार्थग्रन्थटीका ) भाषारत्नभूमिका-न्यायशास्त्रीयपारिभाषिकपदार्थविवृतिविभूषिता ।

४। सारमञ्जरीटीका ( न्यायग्रन्थः ) ।

५। सांख्यसारटीका ।

६। सांख्यकारिकागौडपादभाष्यटीका ।

७। अनुवादनवोदयः ( संस्कृतभाषाशिक्षाग्रन्थः ) ।

८। काव्यचिन्ता ( काव्यसमालोचनाग्रन्थः ) ।

९। मालविकाग्निमित्रटीका ।

१०। दशकुमारचरितटीका ( अपहारवर्मचरितपर्यन्ता ) ।

११। नलदमयन्तीयम् ( सप्ताङ्कनाटकम् ) ।

१२। स्यमन्तकोद्धारः ( एकाङ्को व्यायोगः ) ।

१३। प्रशान्तरत्नाकरम् ( नवाङ्कनाटकम् ) ।

१४। शैशवसाधनम् (खण्डकाव्यम् प्रेमपुष्पसंस्कृतपत्रिकायां प्रकाशितम्) ।

## अंशतः संस्कृतपत्रिकादौ प्रकाशिता ग्रन्थाः—

१। सत्यानुभावम् ( महाकाव्यम् ) ।

२। जातिबाधकविचारः ( न्यायग्रन्थः ) ।

३। युगलाङ्गुरीयम् ( वङ्किमचन्द्रस्य युगलाङ्गुरीयकथानुवादः ) ।

४। आशुतोषावदानम् ( काव्यम् ) ।

तथा

आर्यप्रभा-विद्योदय-मञ्जूषा-प्रेमपुष्प-संस्कृतसाहित्यपरिषत्-संस्कृतपद्यवाणी-'संस्कृतकलेज म्यागाजिन्'प्रभृतिपत्रिकासु प्रकाशिताः संख्यातीता विविधविषया गद्यपद्यमयनिबन्धाः ।

अप्रकाशितानां नेह नामानि समुल्लिख्यन्ते ।



Dr. SURENDRA NATH DAS GUPTA
*Principal, Sanskrit College, Calcutta.*

विविधविद्यापारावारपारङ्गम-विश्वविश्रुतकीर्त्तिप्रतान-बहुविधवाणीप्रवचनप्रवीण-
महोदारचरित-एम्.ए. पि-एइच्.डि. (कलिकाता), पि-एइच्.डि. (केम्ब्रिज्),
एफ्.आर्.एस्.एल्. (इंलण्ड्), एफ्.ए.एस्. (ओयार्स), डि.लिट्.
(रोम), आइ.इ.एस्., दर्शनवागीश-सर्वविद्यारत्नाकर-दर्शनाचार्य-
दर्शनवाचस्पति-प्रभृतिनानाविरुदभाजन-कलिकाता-राजकीय-
संस्कृतमहाविद्यालयाध्यक्ष-वङ्गीयसंस्कृत-परीक्षासमिति-
मन्त्रिप्रवर-श्रीयुक्त-सुरेन्द्रनाथदासगुप्त-महोदयेभ्यः

# उत्सर्गपत्रम्

हे धीर प्रतिभा तव प्रतनुते काव्ये विदां विस्मयं
दिव्या दार्शनिकी कृतिश्च महती कीर्तिस्तवालौकिकी ।
ग्रन्थास्ते कति वा विभिन्नविषया भिन्दन्ति चेत्तं तमः
किं तत्त्वं तदिहास्ति यद्धि भवतो बुद्धौ न विभ्राजते ॥

लब्ध्वा भारतराजसंस्कृतमहाविद्यालयाध्यक्षतां
वङ्गीयामरवाक्परीक्षणसभासाचिव्यमासेदिवान् ।
दीनां दैवतभारतीं सतिमिरामालोकयन्नच्चिषा
रोगार्तिक्षपणे तनोषि निपुणां विद्यां निजां वैद्यके ॥

बाल्यादेव दुरूहदर्शनमतं त्वन्मानसे निर्बभौ
वैचित्र्यं तव वाचि कर्मणि तथा क्षौणीचमत्कारकृत् ।
दीप्ते भास्वरता मृदौ च मृदुता शीलस्य ते लक्षणं
लोकातीतगुणस्य किं तव भवे योग्यं समर्चाविधौ ॥

भक्तैर्भक्तिवशात् कृता दिविषदां पत्रेण पुष्पेण वा
पूजा प्रीतिभरं करोति नियतं दिव्योपचारैर्यथा ।
तस्मात् संस्कृतवाक्पलाशनिचितः पत्रोपहारो मया
क्षुद्रोऽप्ययं सुरेन्द्रनाथ भवते श्रद्धावता दीयते ॥

भवद्गुणमुग्ध-श्रीकालीपद-देवशर्मणा

# FOREWORD

To write a Sanskrit drama in the present day may seem to be an anachronism, but we should receive, rather with a kindly eye, the last signs of life of this ancient language of our land.

The present drama purports to be a *nāṭaka*. Whether it can be designated as a *nāṭaka* from the point of view of the later theorists is doubtful. However, the present drama professes to be '*prayogānuguṇakrama.*' The reader should judge that for himself.

The idea of the plot has been taken from such sources as Adhyātma Rāmāyaṇa (Ayodhyā K. 80 ff.) and the *Kṛttivāsa* Rāmāyaṇa in Bengali; but it has been refashioned by the dramatist almost beyond recognition. From the above sources we know that Ratnākara was at first a robber, and that he afterwards became a saint. This nucleus has been given the present shape by the author.

The drama opens with a famine-stricken scene. Ratnākara the pious enters begging. A whole day's toil in securing alms has brought him nothing. The picture of his fasting parents, wife and son moves him deeply. But those who have ample food will not part with it, and the poor are left only to starve. At first he makes up his mind to save his family by taking to robbing. But good sense prevails, and he gives up that project. Next, he determines to put an end to his miserable life.

At this critical moment he finds a woman about to be molested by a robber. He postpones his contemplated suicide and saves the woman by completely out-manoeuvring the robber. The robber happens to be the dreadful Vīrabala, the head of a gang. He is the son of a Brāhmaṇa and has taken to robbery from dire want. He advises Ratnākara to take to this profession, when he hears of his

sad plight. Ratnākara hesitates and then decides to join the gang as its chief, for that is the only way to save his starving family. He shall destroy the miserly rich and shall uphold the starving poor. The two become fast friends and prepare to fulfil their mission. Ratnākara saves his starving family and prepares to save others who starve (Act I). He is to destroy the cruel king Kāmeśvara and to establish a new kingdom.

Next follows a scene in the court of the king Kāmeśvara, bearing instances of the king's cruelty and high-handedness which add to the misery of the famine-stricken land. A Brāhmaṇa, unable to bear torture, curses him with utter destruction. The king intent to pacify his troubled heart decides to go to Līlāvatī, his object of lust. She became a widow in her early years. The king fell over head and ears in love with her. His love was reciprocated. So the king killed her aged father and brought her into his harem. Here the Second Act ends with a scene of drunken revelry (II).

Ratnākara, using a strategy, robs the royal treasury of king Kāmeśvara. The king issues orders for the immediate detection and arrest of the gang of robbers. (III) The sage Cyavana, the father of Ratnākara and Ratnākara's son Ātreya go to pay up their debts to Dhanadatta, a merchant. They owe him two hundred coins and they pay off the whole amount out of the money which Ratnākara has received "from one of his loving friends who prefers to remain *incognito*." But suspicion arises in the mind of one of the members of the Intelligence Branch, who was perchance present at the time of payment. This leads to the arrest of the father and the son of Ratnākara, and as they are being thrashed so that truth might be extracted, Ratnākara enters with a few men, kills the officers outright and carries away his father and his son who have fainted away He takes refuge with his whole family in the newly founded city of Ratnapura. (IV)

The Fifth Act begins with a discourse between Sumati (Good Reason) and Kumati (Bad Reason). Kumati is exhilarant of her success with Ratnākara, while Sumati is deeply grieved but optimistic of Ratnākara's ultimate revivification into piety. Then we find Ratnākara in Ratnapura, the refuge of all poor and oppressed people. One of his comrades returns from the city of the king Kāmeśvara, as he is talking with his son Ātreya. This man gives an account of his activities in the city of king Kāmeśvara, of how he has arranged, with his magical arts, for the murder of certain important personages. He further informs that the king would be coming on a naval excursion on the river Sarayū very soon. Ratnākara prepares for the capture of the king, so that he may retaliate the thrashing that was meted out to his father and his son by the king's men. (V)

The Sixth Act opens with two fishermen who are busy with their baffled efforts to collect fish. They retire to see the fun as the king's boat approaches. The king and the woman are seen absorbed in drunken revelry on their boat, as the boats in train pass away. Then comes on a boat Ratnākara with his gang. He prepares a strategy for the capture of the king. The fishermen who had been observing all this from a concealed nook retire, in horror, even leaving their boat, the only means of their living, behind, at the very prospect of this daring feat of Ratnākara. Then Cyavana enters the stage with his wife. Cyavana looks dejected ; his wife asks the reason thereof. Though unwilling, he relates to her the fact that Ratnākara has taken to robbery. The old sage even contemplates committing suicide if that would improve his wayward son. (VI)

In the Seventh Act we find Ratnākara, with his captive king Kāmeśvara. Cyavana takes charge of the captive and the tired gang retire to rest, after having tied the king to a tree. (VII) Cyavana, however, sets the king free in the darkness of night; writes a letter to Ratnākara to that effect

and adds that he is committing suicide, so that even this may put a stop to Ratnākara's ignominious activities. Then he puts an end to his life by hanging himself. Even before the day has dawned, Ratnākara comes in exhilaration, but discovers the calamity with a shock. His wife, his child, and his mother come, and they all faint away at this awful sight. (VIII)

In the last Act we learn of the melodramatic death of Ratnākara's mother, of his child and of his wife. A great change has overtaken Ratnākara ; he sets free the recaptured king, makes arrangements so that the poor men of Ratnapura may live honestly and happily and dissolves his gang entreating the members not to take to robbery again. Then he contemplates suicide ; but Good Reason dissuades him and advises him to take initiation from a good preceptor. Nārada sent from heaven initiates him into a new and pious life. (IX)

The style is lucid. No *prakrit* has been used in the drama though theory requires it. Besides the common classical metres such as Anuṣṭubh, Upajāti (of Indravajrā and Upendravajrā, and of Vaṃśastha and Indravaṃśā), Vasantatilaka, Śālinī, Śārdūlavikrīḍita, etc., some novel types of *jāti* verses have been used in songs.

Amareswar Thakur
Lecturer, Calcutta University
and
Secretary, Sanskrit Sahitya Parishat

# INTRODUCTION

In any literature, the drama is invariably regarded as the sublimest product of the poetic mind, summing up in itself the essential conception of literary art. It is only the drama, of all forms of poetic composition, that seeks to deal with the deeper questions of human life, and as such may rightly be called '*the vital spark*' in literature. A few centuries back, the Sanskrit literature, too, had been in the height of glory, and signs of its vital exuberances are still to be traced in the extant dramatic works of Aśvaghoṣa, Bhāsa, Kālidāsa, Śūdraka, Harṣa, Bhavabhūti, Kṣemīśvara, Viśākhadatta, Rājaśekhara and others. But the necessary reaction set in and a rapid decline reduced '*the language of the immortals*' to such a decadent state that in recent years it came to be seriously ignored as a '*dead language*'. In more modern times, however, a fresh laudable endeavour is being made for its resuscitation, and the authorities of the Sanskrit Sāhitya Parishat deserve the warmest congratulations of all lovers of classics for the valuable service they have been untiringly rendering to the cause of the revival and popularization of the Sanskrit language and literature for the last twenty-five years.

Pandit Kalipada Tarkacharya, the author of the present work, is one of the band of energetic pioneer workers who founded the Parishat and made it what it now is. He was at one time the Professor of this Institution and the Editor of the monthly Journal of the Parishat in which the present drama has been serially published. He devoted the best portions of his life and energy in moulding the present batch of youthful workers and scholars of the Parishat. The humble writer of this Introduction feels proud as he recalls to his mind the happy old days when he

had the unique privilege of sitting at Pandit Tarkacharya's feet to take his first lessons in Sanskrit literature.

Pandit Tarkacharya belongs to a family of erudite Sanskrit scholars, famous for their versatility. It is the renowned Pandit-family of Koṭālīpāḍā, Faridpur, which produced, among other reputed savants, the celebrated Advaita philosopher and devotee Śrī Madhusūdana Sarasvatī (c. 16th century A. D.). Pandit Tarkacharya was educated in Bhaṭṭapallī (the well-known centre of Sanskrit learning in South-west Bengal) under the paternal care of the late Mahāmahopādhyāya Pandit Śivachandra Sārvabhauma of hallowed memory.

If in his early youth Pandit Tarkacharya had worked for the renascence of Sanskrit, in his present advanced age too, he has not left off his noble habit. During these years he has never been found failing in his valuable contributions to the Sanskrit literature, in the form of poems, lyrics, dramas and philosophical treatises. And the present drama is the most recent of his productions.

If the staging of dramas, written in any language, shows that the language is not yet obsolete, then the Sanskrit Sāhitya Parishat, which has staged no less than twenty-five Sanskrit dramas, may justly claim that Sanskrit is still a living language. If, again, the normal practice of writing Sanskrit dramas in any language be any proof to its currency, then the Sanskrit dramas of Pandit Tarkacharya can certainly falsify the allegation of lifelessness usually brought against the really immortal language.

The present work, which is the outcome of the mature pen and natural poetic talents of the learned author, has for its background the well-known popular story about the early life of the sage Vālmīki, the celebrated author of the Rāmāyaṇa.

From the versified Bengali version of the Rāmāyaṇa by the renowned Bengali Poet Kṛttivāsa, we come to know that the revered sage Vālmīki was a vile robber named

Ratnākara in his early youth. But his early history, as detailed in the original Rāmāyaṇa itself, contains no such reference. The Adhyātma Rāmāyaṇa, on the other hand, seems to be the possible source of the well-known story carefully interwoven by the Bengali Poet in his vernacular Epic.

In the Sanskrit source, we find the sage Vālmīki recounting before Śrī Rāmacandra the ignominious account of his past life. Originally he had been a Brāhmaṇa by birth, but by close associations with foresters, fowlers, thieves and robbers, he gradually turned a robber himself. Subsequently, however, he met seven saints whose edifying instructions produced a sanctifying influence on him. He gave up his vicious mode of living and began to lead an intensely religious life. The sages advised him to mutter the syllables *MA-RĀ* (=Rāma inverted). Ages passed by and he became so intent in his devotion that his body became gradually covered all over with ant-hill. Yet he stirred not. Long after, the same seven sages, passing by the ant-hill, heard the muttering sound within it and out of pity took him out of that curious tomb. As he had been entombed in an ant-hill (valmīka), he came to be known as 'Vālmīki' from that day forward.

It should be noted in this connexion that the Adhyātma Rāmāyaṇa does not mention the name 'Ratnākara' which seems to be an original contribution by the Bengali Poet.

This resurrection of the bandit Ratnākara as saint Vālmīki, has been hinted at in one passage of the Brahmavaivarta Purāṇa, in the introductory portions of the commentaries on the original Rāmāyaṇa by Rāmānuja and Govindarāja. Similar stories of Vālmīki's early life are also current in provinces other than Bengal. The outline is everywhere the same with but minor differences here and there. For example, we may refer to the story current in Karṇāla that the robber muttered the syllables *M R A* (and not *MA-RĀ*). But with regard to one factor, all these

accounts agree, *viz.*, that the name 'Ratnākara' is nowhere to be found except in the Bengali Rāmāyaṇa of Kṛttivāsa.*

Be that as it may, the learned author of the present drama has adopted only the barest outline of this popular story and has completely remodelled it to suit the purposes of his drama. The vicious bandit Ratnākara of the traditional tale has, in his hands, changed to a humane outlaw, who has taken to robbery not as a selfish profession, but with the noble mission of helping the destitute and depressed by saving them from the tyrannous oppressions of the rich and powerful. Pandit Tarkacharya's Ratnākara reminds one of the notorious outlaw Robinhood of the West and presents a very close approach to real life. The author, therefore, is sure to be successful in capturing the sympathy and admiration of the reader in favour of the hero of his drama. But for all that, he does not, for one single moment even, try to justify the conduct of Ratnākara from the ethical viewpoint. The mission of the hero is indeed noble, though the means selected by him for its fulfilment is certainly ill-advised. So, in the *denouement*, the author unfolds the tragic scene of divine retribution for the final spiritual uplift of this noble but misguided hero. The expiation of Ratnākara, at first sight, may seem to be rather too drastic in comparison with all the sins he might have committed. But it should always be borne in mind that perfect peace can only be realized at the cost of the heaviest sacrifice and self-immolation. Bandit Ratnākara is required to be immured alive, so that Saint Vālmīki may be resurrected from his living tomb. Pandit Tarkacharya has successfully brought out this inner significance of Vālmīki's metamorphosis by completely wiping out all associations of his past life.

In composing the present drama, the learned author has not at every step rigidly followed the traditional principles

* For details, *vide* the illuminating Sanskrit Introduction by the author himself.

of Sanskrit dramaturgy. According to the traditional conventions, a Sanskrit type drama (Nāṭaka) must be idealistic in spirit, The hero is required by the canons of dramaturgy to be either a divine or a semi-divine being. But strangely enough, the hero of this drama is painted as an ordinary man of the world, swayed by passions and emotions, virtues and vices. In portraying his character, the author has revealed the terrible internal struggles which a man of flesh and blood normally experiences under existing circumstances, but which an idealist playwright would avoid to depict in his work. Pandit Tarkacharya's attempts at realism fall in more with the line of the modern dramatist than with the ancient tradition of Sanskrit dramaturgy.

To suit the taste of the present-day audience, the author has tried to introduce in course of the dialogues and stray incidents, popular ideas current in contemporary society. Modern technique of introducing characters has also been profitably adopted. But at the same time, the handling of the main plot, the usual introduction of the prologue, the divisions into Acts and the conventional mode of composition (*viz*., the intermixture of lyric verses and prose dialogue) show that the auhtor has not swerved much from the traditional path. The minor departures, introduced here and there, only emphasize the influence of the age and environments on the author, who like a man of genuine culture, has not been a slave to the conventional rules of Sanskrit dramaturgy, but has ever kept his mind wide open.

Another striking feature of the present drama is the exclusion of Prakrit dialogues altogether from the body of the work. All the characters speak Sanskrit, which is indeed a novelty. We can appreciate the motive of the author in banning Prakrit from his drama, when we take into consideration the fact that the different Prakrit dialects ceased to be spoken languages even as early as the third or the fourth century A. D. Though the canonical works on

Sanskrit dramaturgy require the inclusion of Prakrit dialects in a major drama, yet by blindly following these authoritative dictates in these days no practical purpose is to be achieved. Sanskrit, on the other hand, can be more easily understood than the literary Prakrits which invariably remain unintelligible even to the most cultured audience. And hence the author deserves no unfavourable criticism for what may be called a happy departure from the ageold tradition.

The intensity of Ratnākara's expiation suggests the real tragedy, but unlike the western tragedies, the present drama does not leave us utterly disconsolate at its final conclusion, The sublimity of the hero's self-immolation evokes the sentiment of Quietism which is universally acknowledged as the characteristic trait in the character of the resurrected saint Vālmīki. Hence the title of the drama—'*Praśāntaratnākara*'—is logically and dramatically significant.

The character of Vālmīki has been differently painted by different authors. But it gives us immense pleasure to find that the portraiture of the saint by Pandit Tarkacharya has its own commendable touch of originality and at the same time fully retains the spirit of the ancient tradition.

It would be out of context to say anything more in praise of the work in the body of the Introduction. The praise should come, and we hope it must come, from the reading public. We, therefore, conclude here with the words of a great Indian dramatist, which aptly fit with the present situation—

"We have now been left only with the task of requesting the audience to listen to this drama with proper attention and courtesy in consideration of its sublime subject-matter and out of respect for its learned author."

Ashokanath Shastri
Lecturer, Calcutta University

# अनुबन्धिका

विदाङ्कुर्वन्तु श्रीमन्तो विबुधधौरेयाः ! यदिदं प्रशान्तरत्नाकरं नाम नवीनं रूपकं वाल्मीकेः कविकुलगुरोः पूर्वरूपस्य रत्नाकरस्य दस्युवृत्तिमास्थितस्य सुकठोरकलुषवृत्तिप्रशान्तिमधिकृत्य सन्निबद्धमास्ते। सोऽयं रत्नाकरो नाम रामायणमहावस्तुप्रजापतेः श्रीवाल्मीकिमहर्षेः पूर्वरूपमिति सुप्रथितमेव कथिकापारम्पर्येणा गोपालादानरपालम्। परं तदिदं रत्नाकर इति वाल्मीकेः पूर्वं नामधेयं कृत्तिवासकृतवङ्गभाषामयपद्यात्मकरामायणग्रन्थ एव सुस्पष्टमुल्लिखितमुपलभ्यते। अध्यात्मरामायणग्रन्थे महर्षिवाल्मीकिना स्वमुखेनैव श्रीरामसमीपे यदात्मवृत्तमुपवर्णितमयोध्याकाण्डे षष्ठसर्गे, तत्र रत्नाकर इति नाम्नो गन्धोऽपि नासाद्यते। तत्रत्यो वृत्तभागस्तु कृत्तिवासादिपरिगृहीतेन सर्वत्र साम्प्रतिकेषु प्रथितेन वृत्तभागेन प्रायेण तुल्य एव [1]। मम सुयोग्यच्छात्रेण वेथुनकलेजाख्यराजकीयमहाविद्यालयस्य संस्कृताध्यापकेन श्रीमता चिन्ताहरणचक्रवर्तिकाव्यतीर्थ-एम्-ए-महोदयेन निबद्धं 'वाङ्गाला रामायणे रत्नाकरेर उपाख्यान ओ ताहार मूल' इत्याख्यवङ्गभाषामयनिबन्धं

---

राम त्वन्नाममहिमा वर्ण्यते केन वा कथम्।
यत्प्रभावादहं राम ब्रह्मर्षित्वमवाप्तवान्॥
अहं पुरा किरातेषु किरातैः सह वर्धितः।
जन्ममात्रद्विजत्वं मे शूद्राचाररतः सदा॥
शूद्रायां बहवः पुत्रा उत्पन्ना मेऽजितात्मनः।
ततश्चोरैश्च संगम्य चोरोऽहमभवं पुरा॥
धनुर्बाणधरो नित्यं जीवानामन्तकोपमः।
एकदा मुनयः सप्त दृष्टा महति कानने॥

तथा स्कन्दपुराणादिकमालोच्य विज्ञायते, यथा न केवलमध्यात्मरामायण एव, परमन्यत्रापि तद्वृत्तमस्ति निबद्धम्। तस्मादेव वङ्गभाषामयनिबन्धाद् विशेषतो विज्ञायते, यथा 'वङ्गेभ्यो वहिरपि साधारणेषु प्रसिद्धं कचित् कचिदीदृशमेव वाल्मीकेः पूर्ववृत्तं लब्धप्रचारमास्ते। कर्णाटमण्डले लब्धप्रचारमीदृशमेकं वृत्तं १८६५ खृष्टाब्दे Indian Antiquary इत्याख्य-

---

साक्षान्मया प्रकाशन्तो ज्वलनार्कसमप्रभाः।
ताननवधावं लोभेन तेषां सर्वपरिच्छदान्॥
ग्रहीतुकामस्तत्राहं तिष्ठ तिष्ठेति चाब्रवम्।
दृष्ट्वा मां मुनयोऽपृच्छन् किमायासि द्विजाधम॥
अहं तानब्रवं किञ्चिदादातुं मुनिसत्तमाः।
पुत्रदारादयः सन्ति बहवो मे बुभुक्षिताः॥
तेषां संरक्षणार्थाय चरामि गिरिकानने।
ततो मामूचुरव्यग्राः पृच्छ गत्वा कुटुम्बकम्॥
यो यो मया प्रतिदिनं क्रियते पापसञ्चयः।
यूयं तद्भागिनः किं वा नेति वेति पृथक् पृथक्॥
वयं स्थास्यामहे यावदागमिष्यसि निश्चयः।
तथेत्युक्त्वा गृहं गत्वा मुनिभिर्यदुदीरितम्॥
अपृच्छं पुत्रदारादींस्तैरुक्तोऽहं रघूत्तम।
पापं तवैव तत् सर्वं वयन्तु फलभागिनः॥
तच्छ्रुत्वा जातनिर्वेदो विचार्य पुनरागमम्।
मुनयो यत्र तिष्ठन्ति करुणापूर्णमानसाः॥
मुनीनां दर्शनादेव शुद्धान्तःकरणोऽभवम्।
धनुरादीन् परित्यज्य दण्डवत् पतितोऽस्म्यहम्॥
रक्षध्वं मां मुनिश्रेष्ठा गच्छन्तं निरयार्णवम्।
इत्यग्रे पतितं दृष्ट्वा मामूचुर्मुनिसत्तमाः॥

पत्रे प्रकाशितमभूत्। तत्रापि रत्नाकर इति नाम नास्ति। तत्र पुनरेष विशेषः, यद् बाल्मीकेः पूर्वरूपेण किरातेन रामनाम समुच्चारयितुमशक्यमिति मुनयस्तं 'म्र' इति शब्दजपमुपदिष्टवन्तः। अथ बहुवर्षानन्तरं यदा मुनयस्तेन मार्गेण व्रजन्तो वल्मीककूटमुपेत्य विश्रामार्थमाश्रितवन्तस्तदा तदभ्यन्तरात् समुद्गतं निरन्तरं शब्दमाकर्ण्य वल्मीककूटं भित्त्वा तस्मात्

---

उत्तिष्ठोत्तिष्ठ भद्रन्ते सफलः सत्समागमः।
उपदेक्ष्यामहे तुभ्यं किञ्चित्तेनैव मोक्ष्यसे॥
परस्परं समालोच्य दुर्वृत्तोऽयं द्विजाधमः।
उपेक्ष्य एव सद्वृत्तैस्तथापि शरणं गतः॥
रक्षणीयः प्रयत्नेन मोक्षमार्गोपदेशतः।
इत्युक्त्वा राम ते नाम व्यत्यस्ताक्षरपूर्वकम्॥
एकाग्रमनसात्रैव मरेति जप सर्वदा।
आगच्छामः पुनर्यावदुक्तं तत्त्वं सदा जप॥
इत्युक्त्वा प्रययुः सर्वे मुनयो दिव्यदर्शनाः।
अहं यथोपदिष्टं तैस्तथाकरवमञ्जसा॥
जपन्नेकाग्रमनसा बाह्यं विस्मृतवानहम्।
एवं बहुतिथे काले गते निश्चलरूपिणः॥
सर्वसङ्गविहीनस्य वल्मीकोऽभून्ममोपरि।
ततो युगसहस्रान्त ऋषयः पुनरागमन्॥
मामूचुर्निष्क्रमस्वेति तच्छ्रुत्वा तूर्णमुत्थितः।
वल्मीकान्निर्गतश्चाहं नीहारादिव भास्करः॥
मामप्याहुर्मुनिगणा बाल्मीकिस्त्वं मुनीश्वर।
वल्मीकात् सम्भवो यस्माद् द्वितीयं जन्म तेऽभवत्॥
इत्युक्त्वा ते ययुर्दिव्यगतिं रघुकुलोत्तम।
अहं ते राम नाम्नश्च प्रभावादीदृशोऽभवम्॥ इति।

(अध्यात्मरामायणे अयोध्याकाण्डे षष्ठसर्गः)

पूर्वपरिचितं किरातं प्रकाशयामासुः। तेनैव चास्य वाल्मीकिरिति नाम प्रसिद्धिमापत्'। इति।

वाल्मीकेः पूर्वं नाम समुत्पत्तिं पितरौ चाधिकृत्य भूयांसो मतभेदाः समुपलभ्यन्ते। तिलकाख्यरामायणटीकाकृतः बल्मीकमृत्कूटप्रभवत्वात् बल्मीकाख्यमुनिपुत्रत्वाद्वा वाल्मीकिरिति संज्ञेति विकल्पं कृतवन्तः। तत्रापि वाल्मीकेः पूर्वनामविचारो नास्त्येव। (१)

रामायणशिरोमणिटीकाकारा बहुकालिकतपस्यया बल्मीककूटप्रच्छन्नस्य वरुणेन कृतया वृष्ट्या बल्मीकभेदनस्य कृतत्वात् प्रकाशितत्वेन वाल्मीकिरिति प्राचेतस इति च संज्ञाद्वयं गौणपुत्रत्वप्रयुक्तं भृगोः मुख्यपुत्रत्वाच्च भार्गवादिसंज्ञामपि समुपपादयन्ति। (२) ऋक्ष इत्यस्य मुख्यं नाम इति तत्रैवोपपादितमास्ते।

---

१ उक्तं हि तिलकाख्यरामायणटीकाकृता रामेण रामायणीयप्रथमश्लोकटीकायाम्—'वाल्मीकिः बल्मीकस्यापत्यम्। बल्मीकप्रभवो यस्मात् तस्माद् वाल्मीकिरित्यसौ। इति ब्रह्मवैवर्त्तोक्तेः। बल्मीकप्रभवत्वेन गौणीपुत्रादिवत् गौणमस्य बल्मीकापत्यत्वं गृहीत्वेञ् साधुरपत्यार्थः। यद्वा बल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः।' इति।

२ उक्तं रामायणशिरोमणिटीकायाम्,—'वाल्मीकिर्बल्मीकगौणपुत्रः।... गौणत्वञ्च बहुकालिकतपःस्थितिहेतुकबल्मीकाकृतित्वप्राप्त्यनन्तरं वरुणकृतवृष्ट्या निष्पन्नत्वात्, अत एव वक्ष्यमाणप्राचेतसव्यवहारोऽपि न विरुद्धः। प्रचेतोनिरूपितगौणपुत्रत्वस्यापि अस्मिन् सुवचत्वात् गौणपुत्रत्वयोर्विरोधाभावात्। अत एव भृगुपुत्रत्वमप्यस्मिन् न विरुद्धम्। भृगुनिरूपितमुख्यपुत्रत्वस्य अस्मिन् विद्यमानत्वात्। गौणपुत्रत्वमुख्यपुत्रत्वयोर्विरोधाभावात्। अत एव—'अथाब्रवीन्महातेजा ब्रह्मा लोकपितामहः। बल्मीकप्रभवो यस्मात् तस्माद् वाल्मीकिरित्यसौ' ॥ इति ब्रह्मवैवर्तवचनम्। 'ऋतुमन्तं मुनिं वन्दे प्राचेतसमकल्मष'मिति

भूषणाख्यरामायणटीकाकारो गोविन्दराजोऽपि प्रायेण शिरोमणि-टीकाकारमतमेवानुवर्तमानो दृश्यते। तत्र तावदयं विशेषः यत्, भृगुवंश्यः कश्चित् प्रचेता नाम, तदपत्यतया बाल्मीकेः प्राचेतस इति संज्ञा। 'चक्रे प्रचेतसः पुत्रस्तं ब्रह्माप्यन्वमन्यत' इत्यादौ प्रचेतःपुत्रत्वस्य स्पष्टमुक्तेः। (३)

---

लवकुशोक्तिः। 'ऋक्षोऽभूद् भार्गवस्तस्माद् बाल्मीकिर्योऽभिधीयते'। इति विष्णुपुराणवचनञ्च संगच्छते।......अतएव ज्ञापकादस्य ऋक्ष इति रूढनाम। तस्यात्रानुक्तिस्तु आत्मनाम गुरोर्नामेत्यादिस्मृत्या आत्मनामग्रहणस्य निषिद्धत्वात् निषेधस्य च रूढनामविषयत्वात्।' इति।

३ उक्तं हि गोविन्दराजटीकायाम्,—'बल्मीकस्यापत्यं बाल्मीकिः। अत इञ् इति इञ्प्रत्ययः। नन्वसौ कथं बल्मीकापत्यं, यतो भृगुपुत्र एवायं प्रतीयते। तथा च विष्णुपुराणे 'ऋक्षोऽभूद् भार्गवस्तस्माद् बाल्मीकिर्योऽभिधीयते'। इति। अत्रापि उत्तरकाण्डे वक्ष्यति 'भार्गवेणेति संस्कृतौ' 'भार्गवेण तपस्विना' इति च। अन्यत्र प्रचेतोऽपत्यत्वमभिधीयते। 'चक्रे प्रचेतसः पुत्रस्तं ब्रह्माप्यन्वमन्यत'। इति। 'वेदः प्राचेतसादासी'दिति च प्रसिद्धम्। अतः कथमस्य बल्मीकापत्यत्वम्? उच्यते,—निश्चलतरतपोविशेषेणास्य बल्मीकावृतौ जातायां प्रचेतसा वरुणेन कृतनिरन्तरवर्षेण प्रादुर्भावोऽभूदिति भृगुपुत्रस्यैवास्य प्रचेतोऽपत्यत्वं बल्मीकापत्यत्वञ्च सङ्गच्छते। ननु कथं तत्प्रभवत्वमात्रेण तदपत्यत्वम्? मैवम् गोणीपुत्रः कलशीसुत इति तत्प्रभवेऽपि बहुलमुपलब्धेः। उक्तं च ब्रह्मवैवर्ते—'अथाब्रवीन्महातेजा ब्रह्मा लोकपितामहः। बल्मीकप्रभवो यस्मात् तस्माद् बाल्मीकिरित्यसौ'। इति। मास्तु अपत्यार्थत्वं तथापि बाल्मीकिशब्दः साधुरेव गहादिषु पठितत्वात्। यद्वा भृगुवंश्यः कश्चित् प्रचेता नाम तस्यायं पुत्र ऋक्षो नाम, 'चक्रे प्रचेतसः पुत्र' इति पुत्रत्वाभिधानात्। भार्गवभृगुनन्दनशब्दौ रामे राघवरघुनन्दनशब्दवदुन्नेयौ। बाल्मीकि-

स्कन्दपुराणे विष्णुखण्डे वैशाखमाहात्म्ये एकविंशाध्याये दृश्यते,— कृणुर्नाम मुनिः कठोरं तपस्तप्यमानो वल्मीकाच्छन्नदेहतया वल्मीक इति ख्यातो बभूव, तेनैव स्त्रीस्मरणात् स्खलितेन्द्रियेण कस्याश्चित् शैलुष्या-मुत्पाद्यमानः किरातधर्मा पुत्रः कालेन रामायणकर्ता वाल्मीकिरिति ख्यातोऽभूत्। इति। (४)

स्कन्दपुराणे आवन्त्यखण्डे अवन्तीक्षेत्रमाहात्म्ये चतुर्विंशाध्याये भृगुवंशजो विप्रः सुमतिर्नाम, तस्य कौशिकी नाम भार्या, तस्यामुत्पन्नस्तस्य पुत्रः अग्निशर्मा नाम; तस्य वेदादिविमुखस्य दस्युवृत्त्यादिव्यापारास्तदुप-शान्तिश्च अध्यात्मरामायणादिवृत्तभागैः प्रायेण तुल्यतां दधते। निरुक्तानि त्रीणि नामानि नान्यत्र समुपलभ्यन्ते। तत्रत्यवृत्तभागः सविस्तरः सुस्पष्टश्च(५)। शतकोटिरामचरितान्तर्गतश्रीमदानन्दरामायणे वाल्मीकीये

---

शब्दः पुत्रत्वोपचाराद्, अत एव क्वचित् वाल्मीकेन महर्षिणा इति सम्बन्धमात्रे अण् प्रयुज्यते।' इति। ( रामायणे बालकाण्डे १म सर्गे १म-श्लोकटीका )।

४ कृणुर्नाम मुनिः कश्चित्तस्मिन्नेव सरोवरे।
तपो वै दुस्तरं तेपे बाह्यव्यापारवर्जितः॥
वल्मीकमभवद्देहे तस्य कालेन भूयसा।
वल्मीक इति तं प्राहुरतो वै मुनिपुङ्गवम्॥
पश्चात्तपोविरामान्ते कृणौ स्मृतिपथं गते।
स्त्रियोऽनुस्मरतो राजन् स्खलितं चेन्द्रियं मुनेः॥
जग्राह शैलुषी काचित्तस्यां जज्ञे वनेचरः।
लोके प्रख्यापयामास कर्मबन्धनिकृन्तनीम्॥
( स्कन्दपुराणे विष्णुखण्डे वैशाखमाहात्म्ये २१ अध्यायः )

५ सनत्कुमार उवाच—
आसीद् व्यास पुरा विप्रः सुमतिर्भृगुवंशजः।
रूपयौवनसम्पन्ना तस्य भार्याथ कौशिकी॥

राज्यकाण्डे चतुर्दशसर्गे बाल्मीकेरनेकेषां जन्मनां वृत्तान्ताः समुपलभ्यन्ते। तत्र कुत्रापि रत्नाकर इति नाम नास्ते। आनन्दरामायणस्य निरुक्त-सर्गीयसुविस्तरसन्दर्भपाठेनैव पाठकानां ते सर्वे विषयाः स्कन्दपुराणादितः केचन विशेषाश्च बोधविषयतां यास्यन्तीति ग्रन्थगौरवभिया नेह तत्सन्दर्भाः समुद्ध्रियन्ते। आनन्दरामायणसंसूचिता बाल्मीकेः पूर्ववृत्तान्ताः सुतरां

---

तस्य पुत्रः समुत्पन्नो ह्यग्निशर्मेति नामतः।
स पित्रा प्रोच्यमानोऽपि वेदाभ्यासं न मन्यते॥
ततो बहुतिथे काले ह्यनावृष्टिरजायत।
तस्यां विपद्गतः सोऽथ दक्षिणामाश्रितो दिशम्॥
ततोऽसौ सुमतिर्विप्रः सभार्यः ससुतस्तथा।
विदेशं काननं प्राप्तः कृत्वा आश्रममाश्रितः॥
आभीरैर्दस्युभिः सार्द्धं सङ्गोऽभूदग्निशर्मणः।
आगच्छति पथानेन यस्तं हन्ति स पापकृत्॥
स्मृतिर्नष्टा गता वेदा गतं गोत्रं गता श्रुतिः।
कस्मिंश्चिदथ काले तु तीर्थयात्राप्रसङ्गतः॥
सप्तर्षयः पथा तेन सुव्रताः समुपस्थिताः।
अग्निशर्माथ तान् दृष्ट्वा हन्तुकामोऽब्रवीदिदम्॥
वस्त्राणीमानि मुञ्चध्वं छत्रिकोपानहौ तथा।
हन्तव्या हि मया यूयं गन्तारो यमसादने॥
तस्य तद् वचनं श्रुत्वा अत्रिर्वचनमब्रवीत्।
अस्मत्पीडनजं पापं कथं ते हृदि वर्तते॥
वयं तपस्विनो भूत्वा तीर्थयात्राकृतोद्यमाः।

अग्निशर्मोवाच—

ममास्ति माताथ पिता सुतो भार्या गरीयसी।
पोषयामि सदा तांस्तु एतन्मे हृदि संस्थितम्।

विस्तृताः सुगमाः सोपपत्तिकाश्चेति तत्पाठाय वाचकमहोदयान साग्रहं प्रविवर्तयिषामः। वयमस्मिन रूपके वाल्मीकेः पूर्वनामविषये तत्पितृनाम-

---

अत्रिरुवाच—

पित्रादीनाशु पृच्छस्व स्वकर्मोपार्जितं प्रति।
यद् युष्मदर्थं क्रियते पापं तत् कस्य कथ्यताम्।
यदि ते कथयन्ति स्म मा मृषा प्राणिनोऽवधीः।

अग्निशर्मोवाच—

न कदाचिन्मया ते तु संपृष्टा ईदृशं वचः।
युष्माकं वचसा मेऽद्य प्रतिबोधः प्रवर्तते।
गत्वा पृच्छामि तान् सर्वान् कस्य भावश्च कीदृशः।
यूयमत्रैव तिष्ठध्वं यावदागमनं मम।
इत्युक्त्वा तान् जगामाशु पितरं स्वमुवाच ह।
धर्मस्य प्रतिघातेन प्राणिनां पीडनेन च।
सुमहद्दृश्यते पापं कस्य तत् कथ्यतां मम।
पिता प्राह तथा माता नापुण्यमावयोरिह।
त्वं जानासि यत् कुरुषे कृतं भाव्यं पुनस्त्वया।
तयोस्तद् वचनं श्रुत्वा भार्यां वचनमब्रवीत्।
तयाप्युक्तं न मे पापं पापमेतत्तवैव तु।
तद् वाक्यमब्रवीत् पुत्रं बालोऽहमिति सोऽब्रवीत्।
तज्ज्ञात्वा हृदयं तेषां चेष्टितञ्चैव तत्त्वतः।
नष्टोऽहमिति मन्वानः शरणं मे तपस्विनः।
क्षिप्त्वाथ लगुडं कृष्णं येन वै जन्तवो हताः।
प्रकीर्य केशांस्त्वरित ऋषीणामग्रतः स्थितः।
प्रणम्य दण्डपातेन ततो वचनमब्रवीत्।
न मे माता न च पिता न भार्या न च मे सुतः।

विषये च स्कन्दपुराणादिमतं परिहृत्य वङ्गविषये अन्यत्र च समतिप्रसिद्ध-तया आबालवृद्धं सुदृढसंस्कारगोचरतया च वङ्गभाषामयपद्यरामायण-प्रजापतिकृत्तिवासादिपरिकल्पितं वाल्मीके रत्नाकरेति पूर्वनाम तत्पितुश्च

---

सर्वैस्तैः परिमुक्तोऽहं भवतां शरणं गतः ।
सुष्ठूपदेशदानान्मां नरकात्त्रातुमर्हथ ।
एवं तं वादिनं दृष्ट्वा ऋषयोऽस्त्रिमथाब्रुवन् ।
भवतो वचनादस्य प्रतिबोधः समागतः ।
भवतायमनुग्राह्यः शिष्यो भवतु ते मुने ।
तथेत्युक्त्वाथ तान् प्राह चात्रिर्ध्यानं समाचर ।
अनेन ध्यानयोगेन महामन्त्रजपेन च ।
अनेकदुस्तरात्युग्रपापकृज्जनघातकः ।
संस्थितो वृक्षमूले त्वं परां सिद्धिं गमिष्यसि ।
इत्युक्त्वा ते ययुः सर्वे सकामं सोऽपि तत्र वै ।
तद्ध्यानस्थोऽभवद् योगी वत्सराणि त्रयोदश ।
तस्योपर्यभवत्तस्य वल्मीकोऽविचलस्य च ।
निवृत्तास्तु पथा तेन मुनयस्तत्र शुश्रुवुः ।
उदीरितं ध्वनिं तेन वल्मीके विस्मयान्विताः ।
ततः खनित्वा वल्मीकं काष्ठीभूतोरुशङ्कुभिः ।
तं दृष्ट्वोत्थापयामासुर्मुनयो नयसंयुतम् ।
नमश्चक्रेऽथ तान् सर्वान् स विज्ञो मुनिपुङ्गवान् ।
तान् प्राह प्रणतो भूत्वा तपसा दीप्ततेजसः ।
प्रसादाद् भवतामद्य ज्ञानं लब्धं मया शुभम् ।
दीनोऽहमुद्धृतः सर्वैर्मग्नोऽहं पापकर्दमे ।
श्रुत्वा तस्येति तद् वाक्यमूचुः परमधार्मिकाः ।
वल्मीकेऽस्मिन् स्थितः पुत्र यतस्त्वमेकचित्ततः

च्यवनेति नामैव समवलम्बितवन्तः । वङ्गभाषामयरामायणकविः कृत्तिवासः पुनः कुतो मूलग्रन्थादेतन्नामद्वयम् आसादितवानिति नैव निर्णेतुमर्हामः। अस्तु तस्य मूलं मास्तु वा, वयन्तु केवलं तदीयनाम्नोः सर्वत्र सामाजिकेषु सुचिरात् प्रभृत्येव प्रचरद्रूपत्वात् तदन्यथाकारेण सामाजिकानां भावविच्छेदमाशङ्कमानाः तदनुसृतामेव सरणिं सम्भावयन्तः स्वकृतौ तदुपादानं कुर्मः। तदत्र पुराणविदामुपपत्तिमतीं क्षमां समनुभवितुमिच्छामः । (६)

---

वाल्मीकिरिति ते नाम भुवि ख्यातं भविष्यति ।
इत्युक्त्वा मुनयो जग्मुः स्वां दिशं तपसान्विताः ।
गतेषु मुनिमुख्येषु वाल्मीकिस्तपतां वरः ।
कुशस्थल्यामथागम्य समाराध्य महेश्वरम् ।
तस्मात् कवित्वमासाद्य चक्रे काव्यं मनोरमम् ।
रामायणाख्यं यत् प्राहुः कथां सुप्रथमस्थिताम् । इति
(स्कन्दपुराणे आवन्त्यखण्डे अवन्तीक्षेत्रमाहात्म्ये २४ अध्यायः)

६ उक्तं हि कृत्तिवासेन वङ्गभाषामयपद्यरामायणे रामायणोत्पत्तिप्रकरणे—

'च्यवन मुनिर पुत्र नाम रत्नाकर
दस्युवृत्ति करे सेइ वनेर भितर ।
... ... ...
ब्रह्मा वले तव नाम रत्नाकर छिल
आजि हइते तव नाम वाल्मीकि हइल ।
येइ राम नाम हैते हइला पवित्र
सेइ ग्रन्थ रच गिया रामेर चरित्र ।

अस्यानुवादः—

च्यवनस्य मुनेः पुत्रो रत्नाकर इति श्रुतः ।
गहनाभ्यन्तरे सोऽसौ दस्युवृत्तिपरोऽभवत् ।

अध्यात्मरामायणादि-प्राचीनसाहित्यग्रन्थप्रसिद्धं वाल्मीकेः पूर्वं वृत्तं सूत्रमात्ररूपेण परिगृहीतवता मया प्रकृतरूपकनिर्माणे प्रारम्भादन्तपर्यन्तं वस्तुविनियोगे शीलपरिकल्पने च

'यत् स्यादनुचितं वस्तु नायकस्य रसस्य वा।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्' ॥
'अविरुद्धं तु यद् वृत्तं रसादिव्यक्तयेऽधिकम्।
तदप्यन्यथयेद्धीमान न वदेद् वा कदाचन' ॥

इत्याद्यालङ्कारिकवचनबलादेव यदवलम्बितं निरङ्कुशं स्वातन्त्र्यं, तेन नाटकीयवस्तुनि प्रकर्षो वा भूयानपकर्षो वेत्यत्र श्रीमतां रसभावानुभवदक्षाणां विबुधधौरेयाणामेव निरपेक्षं विचारं प्रमाणकोटौ स्थापयामः।

अत्र हि रूपके सामाजिकानां बोधसौकर्याय रसप्रतीतिविलम्बप्रयुक्तलोकातीतसुखविच्छेदपरीहाराय च गद्यभागेषु पद्यभागेषु सङ्गीतकदम्बकेषु च यथासम्भवं दुरूहपदादिसन्नियोगपरिहारेण सन्निवेशिताः सुपठाः सुगमार्थशब्दसम्भाराः। न खलु तथा समुपयुज्यन्ते विचित्रालङ्कारवक्रोक्त्यादिसमुपबृंहिता वाक्पद्धतयो रूपकेष्वभिनयप्रधानेषु यथा कथाकाव्य-महाकाव्य-खण्डकाव्यादिकेषु। अत एव नितरामनिच्छतामपि रूपककाव्यनिर्मातॄणां प्रवर्तितव्यमीदृशे वैचित्र्यविशेषपरिशून्ये वाङ्मयमार्गे। आशास्महे यदेतत सर्वमनाकुलं विचार्य रूपकवाङ्मयसमालोचनायां निपुणधियः प्रवर्तिष्यन्ते।

किञ्च साम्प्रतिके काले संस्कृतविद्यागारिष्ठेषु प्राकृतभाषाया विशेषतः प्रचारविरहेण प्राकृतभाषामयाः स्वल्पाः सुगमार्थाश्चापि सन्दर्भाः सातिशयमायासं विना स्वं स्वमर्थं नैव बोधपदवीं लम्भयन्ति, समुत्पादयन्ति चातिमात्रं

---

ब्रह्मोवाच समाख्या ते रत्नाकर इति स्थिता।
अद्य प्रभृति ते नाम वाल्मीकिरिति संस्थितम्।
यतो रामाभिधानात्त्वं सम्प्राप्तोऽसि पवित्रताम्।
ग्रन्थं रचय तस्मात्त्वं श्रीरामचरिताश्रयम्।

विरागमन्तःकरणस्य। तत एव साम्प्रतं बहुत्र रूपकप्रयोक्तारः सामाजिकानां त्वरिततरसोन्मेषमपेक्षमाणाः तत्तत्पात्रप्रयोक्तव्यप्राकृतभाषामयसन्दर्भाणां विपरिवर्तनेन प्रयुञ्जते गीर्वाणवाणीमयानेव सन्दर्भसङ्घातान। अत एवास्माभिरपि प्रकृते रूपके प्राचीनालङ्कारिकोपदिष्टं नयमतिक्रम्य सर्वेषां पात्राणामविशेषेण संस्कृतपदमयान्येव वाक्यानि विनियोजितानि। तदेव सामाजिकानामनायासवस्तुविज्ञानाय त्वरित-रसोन्मेषाय च समुपयुक्तमिति प्राचीननयातिक्रममप्यदोषं मन्यमानाः सन्तुष्यामः।

सुविदितमेवैतत सहृदयगोष्ठीगरिष्ठानां यत् कालक्रमानुसारेण विविधशिल्पकलादीनां क्रमिकाभ्युदयव्यपेक्षया च मानसिकवासनाभेदाः समुपजायन्ते सामाजिकानामिति। यत्र किल काले प्रयोगमभिसन्धाय यद् रूपकं समपेक्ष्यते, तत्र तत्कालानुगुणगुणानुबन्धिविषयसङ्घातो नोपसंहितश्चेत्, नोपयुज्यते तदिदं सन्तोषाय निःशेषाय तत्कालप्रभवाणां सामाजिकनिकुरम्बाणाम्। तदनुरोधादेव साम्प्रतिकसामाजिकभावानुगुणवस्तुसन्निवेशाय कृतोऽत्र मया यथामति प्रयत्नो भूयान। साफल्ये वैफल्ये वा तत्प्रयत्नस्य रूपदक्षाणां गुणदोषप्रविभागविदां विदुषां रसिकतज्ज्ञानाञ्च निरपेक्षमन्तःकरणमेव प्रमाणं, नान्यत्।

इदमत्र प्राप्तकालमभिधेयं यत् साम्प्रतं तत्तत्प्रदेशेषु सत्यपि तत्तन्माण्डलिक-व्यवहारानुकूलप्राकृतापभ्रंशभाषाप्रसारे सकलभाषाप्रसूतेः संस्कृतभाषायाः सार्वजनीनायाः सकलदेशसाधारण्या अपि नैव तावान प्रसारः समादरो लोकायतेषु प्रयोजनेषु समुपयोगो वा विज्ञानगोचरताम्प्रतिपद्यते। तत एव हि साम्प्रतं नाविर्भवन्ति यथाकाममुत्कर्षवन्तः काव्यग्रन्था, नापि परितो मण्डयन्ति संस्कृतसाहित्यभाण्डागारं नवीननिबन्धकारसमुपहृतानि नवीनानि प्रशस्तिभाजनानि दार्शनिकादिनिबन्धरत्नानि। दुराग्रहवशेन हन्त केनचिद् विरचितेऽपि कस्मिंश्चित् संस्कृतनिबन्धे दुर्लभाः खलु कथञ्चित् तत्पाठपरिश्रमस्वीकर्त्तारोऽपि। निबन्धकारैः स्वीयवस्तुनो गौरवख्यापनप्रेरणया वा स्वकृतेः प्रकर्षपरीक्षणकाम्यया वा परप्रतिपादनेनात्म-

निबन्धस्य साफल्यसम्पिपादयिषया वा कथञ्चित् केचित् तदाकर्णने प्रवर्त्तिता अपि किञ्चित्कालोत्तरमसमाप्त एव निबन्धश्रवणे विमनायमानाः समुत्पादयन्ति तेषां निबन्धकर्त्तां महान्तमान्तरं खेदम्। तत्तत्कारणकदम्बकेनैवाद्य लोके तिरोधानेन नवीनसंस्कृतग्रन्थनिर्माणसमारम्भसमुत्साहस्य क्रमशः क्षीणक्षीणतामाससाद भगवती कल्याणवती गैर्वाणी वाणी। इत्थं समापतितेऽपि भगवत्या गीर्वाणवाण्या वराकाणां तदीयसेवकानाञ्च सुमहत्येव विपत्सन्निपाते यदेषा संस्कृतसाहित्यपरिषत् संस्कृतसाहित्यसमुन्नयनैकव्रता मदीयामिमामतिक्षुद्रामपि कृतिं स्वीयद्रविणराशिव्ययेन निरतिशयसमुत्साहेन च प्राकाश्यं नीतवती, तेनास्याः सुगभीरामान्तरिकीं कृतवेदितां निवेदयामः।

किञ्च एतदनुबन्धिका-सम्बन्धिवस्तुनिकुरम्बनिबन्धने मदीयसुयोग्यच्छात्रवरस्य वेथुनकलेजाख्यराजकीयमहाविद्यालयाध्यापकस्य श्रीमतः चिन्ताहरणचक्रवर्त्तिकाव्यतीर्थस्य रत्नाकरवृत्तान्तप्रतिपादकवङ्गभाषामयनिबन्धात् समासादितो मया सुमहानुपकारः, तथा एतद्ग्रन्थमुद्रापणादिविधौ मदीयप्रियच्छात्रस्य संस्कृतभाषामयनैकनिबन्धनिर्माणेन नैकग्रन्थसम्पादनाद्युत्कर्षेण च लब्धवर्णस्य प्रतिभानवतः संस्कृतसाहित्यपरिषत्पत्रिकासम्पादकस्य श्रीमत उपेन्द्रमोहनकाव्यसांख्यतीर्थस्यायुष्मतः संशोधनादिकृत्यपरम्परया समासादितं सुमहत् साहायकमिति ताविमौ नितरामाशिषा वर्द्धयामः।

अन्ते च सप्रश्रयं साशङ्कं सोपचारञ्च विशेषविदुषो वाचकमहत्तमान् अर्थयामहे, यद् भ्रमधर्मतया मानुषाणां स्वल्पज्ञतया च प्रकृतग्रन्थनिर्माणसाहसिकस्य प्रतिपदमेवात्र सम्भाव्यमानान् दोषानमी स्वभावसुलभकारुण्यप्रचयेन परिहरन्तः क्वाचित्कमपि सन्तं गुणलेशं बहुलीकुर्वाणा मदीयप्रकृतग्रन्थनिर्माणपरिश्रमं नयन्तु सफलताम् इति शम्।

| | |
|---|---|
| १३४६ बङ्गाब्दे<br>उत्तरायणसंक्रान्त्याम् | विबुधविधेय—<br>श्रीकालीपददेवशर्मणः ( तर्काचार्यस्य ) |

# प्रशान्तरत्नाकरम्

## नाटकम्

( नान्दी )

नीलनलिनमञ्जुलतनुरतनुचापधारी
कर्बुरकुलधूमकेतुरनुगतहितकारी ।
हित्वा नृपपदमतिघनभीषणवनचारी
जयति जयति सीतापतिरखिलदुरितहारी ।

अपि च

यस्यासीमगुणैरधारि सुतरां शाखामृगैर्वश्यता
यं ध्यायन्ति नरामरासुरवराः सर्वार्थकल्पद्रुमम् ।
यो लोकत्रयभव्यसाधनकृते नानास्वरूपोऽभवत्
सोऽयं राघवकुञ्जरो विजयते ज्योतिः परं श्यामलम् ।

नान्द्यन्ते

सूत्रधारः—अलमतिप्रसङ्गेन । आदिष्टोऽस्मि नवरूपकप्रयोगदर्शन-कुतूहलिन्या परिषदा, यथा नवीनकविनिबद्धेन केनापि रम्यरूपकेण सम्भाव्यतामेष समाज इति । तत् केन वा तथाविधेन रूपकरत्नेन भवितव्यम् ? ( स्मृतिमभिनीय ) आं दृष्टम्, अस्ति नातिचिरमेव केनापि कविना समुपहृतमस्मासु 'प्रशान्तरत्नाकरं' नाम रूपकरत्नम्, तेनैव तथाभूतेन शक्योऽयं समाजो रञ्जयितुम् । यत्र खलु—

सुगमः शब्दसम्भारः प्रयोगानुगुणक्रमः ।
नानाभावसमुल्लासः प्रीतिहेतुः पदे पदे ॥

तदिदानीं पारिपार्श्विको द्रष्टव्यः। तत् कथं नु खलु तं पश्यामि ?

नेपथ्ये पारिपार्श्विकः—( संवृतस्य कवाटस्य शृङ्खलां संघट्टयन् ) भाव, भाव, आः ! कथमद्यापि संवृतः कवाटः ?

सूत्र—अये, एष पारिपार्श्विकः स्वयमेव यथाकालं प्राप्तः ! तदस्य द्वारमुद्घाटयामि। ( तथा करोति )

पारिपार्श्विकः ( प्रविश्य )—भाव, एषोऽहमभिवादये। कथमद्यापि संवृतः कवाटः ?

सूत्र—मारिष, प्रातःप्रभृति भिक्षुभिः समुद्वेजितस्य दुर्भिक्षविक्षुभिते जनपदे कवाटसंवरणमन्तरेण नास्त्यन्यो निस्तारोपायः !

पारि—साम्प्रतं दिवसस्य चतुर्थे यामे पश्चिमाचलसन्निहिते सूरे कुतो वा भयं भिक्षुभ्यः, येनैवमनुष्ठीयते ?

सूत्र—मारिष, *न जानासि गतिं भिक्षूणाम्।*

यदा जनपदे भिक्षा प्रतिद्वारं सुदुर्लभा।
तदा यामस्य नियमं पालयन्ति न भिक्षवः॥

पारि—आं ज्ञातम् !

( नेपथ्ये )—'भो अयमहं भिक्षार्थी, देहि भो भिक्षाम्'।

सूत्र—मारिष, शृणोषि ? अथ साम्प्रतं पश्यसि कथमस्यामपि वेलायां संवृतकवाटस्तिष्ठामीति ?

पारि—अथकिम्, ज्ञायते। तत् को नु खल्वेष दिनावसाने भिक्षते ?

सूत्र—भवतु, पश्यामि, ( दृष्ट्वा ) आम् एष रत्नाकरो नाम ब्राह्मणः

बलवत्पीनकायोऽपि मानं निर्वास्य दूरतः।
प्रतिद्वारमटन भिक्षामभ्यापतति मामितः॥

तदहमपि तथैव दैन्यं गतः किं नु खलु करिष्ये ? ( स्मृत्वा ) आं दृष्टम्, मारिष, एहि पश्चद्वारकेण संगीतशालामभिगम्य रत्नाकरादात्मानं रक्षावः। स एष खलु—

भिक्षाकर्पटसंशोभिस्कन्धसन्धिः सुदुःखितः।
क्षणादूर्द्ध्वमिहागन्ता विलम्बेन कृतं ततः॥

पारि—तथा। ( निष्क्रान्तौ )

[ इति प्रस्तावना ]

---

( ततः प्रविशति भिक्षाकर्पटशोभितस्कन्धो रत्नाकरः )

रत्ना—भो अयमहं भिक्षार्थी, देहि भो भिक्षाम्! (नेपथ्यमुखमालोक्य) अहह! कथमेतावपि पुरुषौ मां भिक्षार्थिनमुपलभ्य निर्दयमेव पलायितौ? अहो लोकवृत्तम्! अहो मे दुर्गतस्य भाग्यमहिमा!

गेहेषु गत्वा धनिनां समेषां सम्प्रार्थितास्ते लवमात्रभैक्ष्यम्।
केनापि हा हा न कृताऽनुकम्पा वृथैव सर्वं दिवसं श्रमो मे॥

धनिकाः खलु दीनानक्षिपातमात्रेणापि नानुकम्पन्ते, तदीयपरिवारास्ततोऽपि मदोद्धताः परुषया वाचा दीननिवहान् व्यथयन्तस्तृप्यन्ति। तत् क एष लोकसंव्यवहारो नाम?

येनैव भूतेन समृद्धिभाजां विनिर्मितं सृष्टिकृता शरीरम्।
तेनैव किं दीनगणस्य कायो न निर्मितस्तेन महामहिम्ना?

किञ्च

अन्तःकरणतत्त्वस्य शक्तिरैश्वर्यशालिनाम्।
दीनानां मानसीं शक्तिं पराभूय न वर्द्धते।

तथापि धनिकाः सर्वतो हीनान् दीनान् मन्येरन्नित्यत्र किं वा बीजं विधिनिसृष्टादर्थवैभवादन्यत्? स्मरामि हन्त स्मरामि प्रतिदिवसं पथि पीडितो धनिकतनुजैरलङ्कृतं दीन इति धिक्कृतस्य वत्सस्यात्रेयस्य मे ...स्रं दुःखान्धकारमलिनं वदनम्! तथा स्मरामि धनिकपत्नीगणैः सुमहत्या सम्पदा परिपूजितेन देवायतनगुरुणा तदादरव्यापृतेन दैन्यादेव प्रतिरुद्ध-देवायतन-प्रवेशायाः प्रियाया माधव्या जनन्याश्च मे गभीरदुःखनिवेदन-...सम्!

दरिद्रस्य खलु,—

मैत्रीं छिनत्ति सुचिरन्तनबान्धवोऽपि
याच्ञाभयेन परिधावति दूरमार्गे ।
मूढोऽपि वित्तसहितो विदुषां वरेण्यो
दीनो विचित्रमतिरप्यवमानपात्रम् ॥

अपि च—

आढ्यानां येन दोषेण समाजो नैति विक्रियाम् ।
तेनैव बत दीनानां समाजादपवर्जनम् ॥

तदत्र वैषम्ये दीनानां दैन्यविधाता विधिरेव सुतरामधिक्षेपमर्हति ! हा हतविधे, निष्करुण,

यदि दुःखाय जीवानां जन्म, सृष्टाः कथं नु ते ।
एवं वैषम्यनैर्घृण्ये न युज्येते पितुस्तव ॥

अथवा क एष कर्मप्रभावसन्निधाने विधिर्नाम ?

जीवाः स्वकर्मविहितं फलमाश्रयन्ते
तस्माद् बहिर्विधिरलं न फलं प्रदातुम् ।
तेनैव चित्ररचना जगतो निरूढा
हेतुर्विचित्र इति कार्यगणो विचित्रः ॥

अथवा तस्यापि कर्मणो नियन्ता विधिरेवेति को वा विधेरन्यो धिक्कारमर्हति ? भवतु अलमनपेक्षितवस्तुपरिचिन्तया, परिश्रान्तोऽस्मि प्रातः प्रभृति भिक्षमाणो दीर्घाध्वपरिक्रमणेन, नेदानीमुत्सहे पदात् पदमपि गन्तुम्, पश्चिमान्तमवलम्बते चायं भगवान् सहस्रदीधितिः, तदस्य सन्निहितस्य न्यग्रोधपादपस्याधस्तात् क्षणं विश्रान्तो भवामि । ( परिक्रम्य तथा कृत्वा ) अयि भो न्यग्रोध,

त्वं स्थावरोऽपि परिकीर्णभुजप्रतानः
शान्तिं तनोषि सुतरां तलमाश्रितानाम् ।
किन्तूद्धता धनमदेन शरीरवन्तो
दीनोपकारविमुखाः किमु चित्तवन्तः ?

अहह ! परिणतप्रायो दिवसः ! गेहे च वृद्धौ पितरौ, पतिव्रता दयिता, वत्सलः पुत्रश्च मम दुरन्तभाग्यस्य प्रस्थानपथं समीक्षमाणाः प्रतिमुहूर्तं सोपकरणमेव मां समुपनतमुत्प्रेक्षन्ते ; अहं पुनः पथिभ्रमण-परिश्रान्तः शान्तये न्यग्रोधतलमाश्रित्य प्रशान्तः समुपविष्टोऽस्मि ! मूढ रत्नाकर, क एष ते विश्रामप्रयासः ?

त्वं तातं जननीं तथा पतिरतां पत्नीं सुतं वत्सलं
हित्वा क्षुत्परिपीडितानपि गृहे विश्राममाकाङ्क्षसि ?
धिग्धिक् त्वां निजशान्तिमात्रनिरतं जातं वृथा भूतले
प्रोत्तिष्ठ प्रतिकर्त्तुमात्मकरणैः स्वेषां विषादक्रमम् ॥

तदिदानीं —स्वजीवनव्ययेनापि विधेयं बन्धुरक्षणम् ।
अलमात्मसुखाकाङ्क्षाचापलेन तवामुना ॥

तदद्यापि शेषभूतं वणिजो लक्षपतेर्द्वारमुपसृत्य भैक्ष्यं भिक्षमाणः सफलकामो भवामि । अथ यदि तत्रापि नाभिमतलाभः, तदा ? तदा किं करिष्यामि ? किं करिष्यामि ? अहो ! घूर्णते शिरः, ! तमसा समाच्छन्नं जगत् ! शून्यतां गता वसुधा ! एष क्षुधा परिखिद्यमानस्तातो भूमौ विचेष्टते ! माता कातरं क्रोशन्ती पञ्चत्वमाप्नोति ! साध्वी वनिता चरमं श्वासं मुञ्चति, वत्सलः पुत्रो—हा हा ! नातः परं शक्यं चिन्तयितुम् ! यद् भवतु तद् भवतु, लक्षपतिगृहमेव गच्छामि, अथ यदि तत्रापि नाभिमतलाभस्तदा ! तदा !! अथवा अलमद्यापि मर्यादाभङ्गभयेन, स्वजनानां जीवनार्थं—

बलेनैव ग्रहीष्यामि तस्य लक्षपतेर्धनम् ।
स्वजनानां विपन्नानां रक्षा कार्या यथा तथा ॥

तदेष तत्रैव गच्छामि । ( गन्तुमुद्यतः ) ।

( ततः प्रविशति भिक्षुवेशेन गायन्ती सुमतिः )

गीतम्

जीव गुणाकर सुचरितमनुसर खलतां परिहर वह बहुमानम्,
भौतिककाये दुरितसहाये मा कुरु मा कुरु गौरवदानम् ।

विधिविपरीतं विधिमनु भीतं मानसमधिकुरु लसदवधानम्,
वरमिह मरणं सुचरितशरणं तदपि वरं नहि पापविधानम् ॥

( निष्क्रान्ता )

रत्ना—( विस्मयमभिनीय ) अये, का नु खल्वेषा !

प्रसादयति चित्तं मे देवतेव शरीरिणी ;
यस्याः सङ्गीतझङ्कारैः प्लावितं गगनान्तरम् ?

अहो साधु उपदिशति, तत् धिक् मां वृत्तभङ्गव्यवसायिनम् !

यत्नेन तावद् यदरक्षमादौ वृत्तं महत् कष्टमपि प्रपन्नः ।
तदेव हा हा क्षणमात्रकेण त्यक्तुं प्रवृत्तोऽस्मि विमूढचेताः !

तत् किमिदानीमनुतिष्ठामि ? न शक्यते जीवता क्षुधया परिपीड्यमानानां स्वजनानां प्रत्यक्षमेव मरणमीक्षितुम् । तत् किमिदानीमनुतिष्ठेयम् ? किमनुतिष्ठेयम् ? ( स्मृतिमभिनीय ) आं दृष्टम् ! गायन्त्या प्रतिषिद्धं भौतिके काये गौरवं हास्यामि, तदिदानीम्,—

वरं विशुद्धवृत्तस्य मरणं मे क्षणान्तरे ।
न जातु वृत्तभङ्गेन जीवनं पापसङ्कुलम् ॥

हा तात, हा मातः, हा प्रिये माधवि, हा वत्स आत्रेय, युष्मान् परित्यज्य साम्प्रतं लोकान्तरे गमिष्यामि, वृथैवायं कायो यः क्षुधाविशीर्णानां चरमं श्वासं मुञ्चतामपि बान्धवानां न प्रतिकर्तुमलं दुःखस्य ! तत्

अकालहीनं वपुरेतदद्य त्यक्त्वा परं लोकमुपाश्रयेयम् ।
यतः सुहृत्पालनशक्त्यभावप्रसूतलज्जां विनिवर्तयेयम् ॥

तत् केनोपायेन समीहितं साधयामि ? ( विचिन्त्य ) आं दृष्टम् ! इहैव न्यग्रोधे आत्मानमुद्बध्य दुःसहां दुःखज्वालां निर्वापयिष्यामि ! क्व नु खलु पाशं लप्स्ये ? ( विचिन्त्य ) आम्, एष भिक्षाकर्पट एव पाशो भविष्यति । तदलं विलम्बेन यावदिदानीमेव वृक्षमारुह्य कण्ठे पाशं योजयित्वा स्वं समीहितं सम्पादयामि । ( यथोक्तं सम्पादयितुमुपक्रमते )

( नेपथ्ये )

कः कोऽत्र, परित्रायतां परित्रायतां मामनाथां साहसिकेन तस्करेणाभिभूयमानाम् ।

रत्ना—( श्रुतिमभिनीय ) अये, अदूरे योषित इवार्तप्रलापः श्रूयते ? तत् किन्नु खल्विदम् ?

( नेपथ्ये )

हा हा एष दुष्टतस्करः पादपान्तरितां मामचिरेणाक्रमिष्यति, हा हा ! अशरणास्मि ! कः कोऽत्र, परित्रायतां ! परित्रायताम् !!

रत्ना—( वृक्षात् सहसा अवतीर्य ) अये, एषा कापि योषिद् दुष्टेन तस्करेण पराभूयते ! धिक् साहसम् ! रत्नाकर, किमद्यापि विलम्बसे ?

एषा कुलाङ्गना काचित्तस्करेणाभिभूयते ।
पञ्चेन्द्रियसमायुक्तस्त्वं माध्यस्थ्येन वर्तसे ?

तदलमतः परमपि प्रतीक्षणेन—

अचिरादस्य मूढस्य कण्ठं निष्पीड्य बाहुना ।
बलवानबलां रक्ष शौर्यं सार्थकमस्तु ते ॥

( गच्छन् पुनः प्रतिनिवृत्तः ) अथवा अदण्डेन न प्रस्थातव्यम् ! तत् क नु खलु दण्डः ? ( इतस्ततो दृष्ट्वा ) आम्, एषा पादपशाखा दण्डो भविष्यति । ( पादपशाखां गृहीत्वा ) एष साम्प्रतं गच्छामि ।

( निष्क्रान्तः )

( ततः प्रविशति पादपान्तरितविग्रहां योषितमाक्रमितुमुपक्रान्तः पुरुषः )

पुरुषः—सुन्दरि, अलमद्यापि तवानेन स्वपरित्राणप्रयत्नेन, व्यर्थं परिश्राम्यसि ! एषोऽहमिच्छामात्रेणैव त्वां ग्रहीतुं शक्नोमि, तथापि सान्त्वेनानुनीयसे, सत्वरमात्मानमर्पय, नातः परमपि मां परिश्रमं लम्भयेथाः ।

स्त्री—भद्र, प्रसीद, एषा तव पादयोः पतामि, प्रसीद, अनुमन्यस्व मां निर्विघ्नगमनाय ।

पुरुषः—निष्फलः प्रलापः, न मुच्यसे ।

स्त्री—यद्येवम्, कथय, किमस्माज्जनात् काम्यते ?

पुरुषः—अलङ्काराः।

स्त्री—कुतो मे दीनाया अलङ्काराः ?

पुरुषः—अस्त्येवैतत् रौप्यमयं वलययुग्मम्, रौप्यमयी मेखला, सुवर्णमयञ्च कुण्डलयुगलम्।

स्त्री—एतेषां परिहारे निराभरणा पत्युरशिवसूचिका भवेयम्।

पुरुषः—आः! दुर्विनीते, लोहवलयमात्रकेण साभरणा भूत्वा पत्युः शिवमुद्घोषय, तत् सत्वरं देहि, यदि श्रेयः कामयसे ?

स्त्री—हा हा! अशरणास्मि, तत् का गतिः ? गृहाण (अलङ्कारान् शरीरादुन्मोच्य दूरतः क्षिपति)

पुरुषः—(क्षिप्तानलङ्कारान् चिनोति)

स्त्री—अपि नाम अस्मिन्नवसरे पलायिष्ये ? अथवा शूरतमादस्मादेतावता न शक्यं पलायितुम्, तदशरणाया मे नास्ति दैवादृते शरणमन्यत्। भगवति कात्यायनि, प्रसीद।

पुरुषः—सुन्दरि, एते गृहीताः।

स्त्री—अथेदानीं मुच्यतामबलाया मे पन्थाः, यावद् निराबाधा स्वगेहं गत्वा पत्या सह मिलिता भवामि।

पुरुषः—अयि निष्करुणे, कथमेतावन्मात्रकेणैव इमं जनं वञ्चयित्वा गन्तुमीहसे ? अहो काठिन्यं स्त्रीहृदयस्य!

स्त्री (स्वगतम्) अहह! यदेवाशङ्कितं तदेव दुष्टेन प्रस्तुतम्। भवत्वेवं तावत्। (प्रकाशम्) भद्र, किमेवं वदसि, किं वा ममापरं सन्निहितं, यदतः परमपि कामयसे ?

पुरुषः—अयि अरसिके, कथं प्रबुद्धापि स्वप्नं नाटयसि, प्रसीद, एतत्त्वदीयं कुसुमसुकुमारं लावण्यं समीक्षमाणः सुतरां कामेन परवशः कृतोऽस्मि, तदस्य कृपया प्रतीकारं कर्तुमर्हसि।

स्त्री—मूढ, निर्मर्याद, दुष्टस्वभाव, साम्प्रतमेतावन्तमवधिं समारूढोऽसि, न ते रसना छिद्यते ?

पुरुषः—भद्रे, सान्त्वेनानुनीयसे, प्रसीद। (किञ्चिदुपसर्पति)

स्त्री—धिक् अपध्वस्तोऽसि, मूढ, दूरमपसर। (अपरपादपान्तरालं गच्छति)

पुरुषः—प्रगल्भे, अद्यापि क्षेमं ते उपदिशामि। मदीयं चित्त-मविलम्बितमनुवर्तेथाः (उपसरति)।

स्त्री—भद्र, भद्र, रक्ष विनयम्, रक्ष मर्यादाम्, मा मामनाथाम् अशरणां निर्जने समासाद्य परिभवितुमर्हसि। हा हा! तथापि न शाम्यति! हा हा दूषितास्मि, परिभूतास्मि, अनेन दानवहतकेन। कः कोऽत्र? परित्रायतां परित्रायतां मामनाथां वनोपकण्ठे!

पुरुषः—सुन्दरि, मुग्धासि, इह आक्रोशन्तीं त्वां न कोऽपि शृणोति। (उपसृत्य गृहीत्वा बलेनाकर्षति)

स्त्री—हा हतास्मि!

पुरुषः—हाः! हाः!! हाः!!! न कोऽपि शृणोति!

ततः प्रविशति सहसा रत्नाकरः)

रत्ना—मूढ! दुर्मनुष्य, एष ते कृतान्तः शृणोति! (कटिदेशे दण्ड-प्रहारं करोति)

पुरुषः—हा हतोऽस्मि (पतितः परावृत्य कथञ्चित् पश्यन् स्वगतम्) अये! को नु खल्वेष निर्जने वनप्रान्ते कृतान्तसमः प्राप्तः?

रत्ना—मूढ, सुष्ठु पतितोऽसि, तत् यावदहं जननीमिमां स्वं गेहं प्रति यथागतं प्रेषयामि, तावत् तथैव तिष्ठ, यदि पदात् पदान्तराय स्पन्दसे, तदा कृतान्तमेव क्षणमात्रकेण द्रक्ष्यसि।

पुरुषः—अहो शौर्यम्! अहो साहसम्! एकेनैव दण्डप्रहारेण भग्नेव मे कटिः प्रतिभाति! (प्रकाशम्) आम्! पराभूतोऽस्मि, तत् का गतिः?

रत्ना—एवमिदानीं मार्गं पतितोऽसि। मातः साम्प्रतं निराबाधा

स्वगेहं प्रति प्रतिनिवर्त्तस्व। अपगतं तं दुर्मनुष्यकृतं भयम्, एष दुरन्तवृत्तः परतो मया द्रक्ष्यते।

स्त्री—भद्र, कृतज्ञतया आवर्जितायाः मे वाचो न प्रसरन्ति! भद्र, देवतास्ते सर्वतः स्वस्ति करिष्यन्ति, यदहमेवम्भूता निःशरणा त्वया रक्षिता।

पुरुषः—( स्वगतम् ) यावदेतौ कथाव्यासक्तौ, तावदलङ्काराननेन मूषिकोतकारेण अन्तरयामि ( तथा करोति )।

रत्ना—आर्ये, मा मैवम्

मया विपन्ना भवती न रक्षिता
दैवेन रक्षा विहिता तवानघे।
मनुष्यशक्तिः कियदेव साधयेद्
दुःखं सुखं वा नियतेर्वशं गतम्।

स्त्री—तत्रापि भवानेव द्वारीकृतो दैवेनेति भवन्तमभिनन्दामि! किं वा बहुना, यद्यस्ति लेशमात्रमपि सुकृतं मे, तदा तत्फलं त्वय्येव संक्रान्तमिच्छामि। अपि च भद्र, यदि नान्यथा मन्यसे, तदा अनेन सबलात्कारं गृहीताः स्वल्पका अपि मे अलङ्कारास्तवैव सन्तु इत्यभ्यर्थये।

रत्ना—अये, अनेन मूढेन आर्याया अलङ्कारोऽपि बलात्कारेण गृहीतः? तद् न केवलमेष कामवृत्तः, परम् अर्थवृत्तोऽपि? अहो भिन्नः किलानेन तस्करतया समं कामस्य विरोधः! तथाहि—

ये तस्करास्ते नहि काममुग्धा ये काममुग्धा नहि तस्करास्ते।
विभाति चौर्येण समं न कामः सता च कामेन न चौर्यसिद्धिः॥

तदत्र विचित्रः किल द्वयोरेकत्र समावेशः!

अथवा

क्षणे क्षणे चित्तविवर्त्तनं नृणां न भावधारा सदृशी चिरस्थिरा।
विचित्रसंसारगतिप्रभाविताः शरीरिणो यान्ति गतिं पृथग्विधाम्॥

नात्रास्त्यत्र विस्मयावकाशः। ( प्रकाशम् ) मूढ, न केवलं काममभिसन्धत्से?

किन्तु अर्थमपि ? तत् दीयन्तामस्या आर्याया बलात्कारेण गृहीतपूर्वा अलङ्काराः ।

पुरुषः—अलङ्कारा इति ? कुतः खल्वलङ्काराः ? एषा लोहवलयमात्राभरणा मया आसादिता ।

स्त्री—नहि, नहि, एष मिथ्या प्रलपति, गृहीता एवानेन ममालङ्कारा, ये विवाहकाले मात्रा विसृष्टाः ।

पुरुषः—भद्र, मिथ्यैषा ब्रवीति, मम निग्रहार्थमेवास्या निपुणाया एष प्रबन्धः ।

स्त्री—धिक् ! व्रीडितास्मि !

रत्ना—मूढ, निर्मर्याद,

वित्तस्य क्षणभङ्गुरस्य लघुनो लाभाय यः साहसा-
लोकप्राणहरोऽसि तस्य खलु ते सत्ये प्रतिष्ठा परा ।
या साध्वी कुलजा सतां पथि रता सत्याश्रया सन्ततं
तस्या हन्त वचः कथं नु वितथं जायेत मृत्यावपि ॥

तदलं छलेन, आर्यैषा ब्रवीति, दीयन्तां सान्त्वेन ।

पुरुषः—इह सान्त्वे परुषे वा न कश्चिद् विशेषः ।

रत्ना—( स्वगतं ) कथमयं निश्चयेन तथा ब्रवीति, अये संशयं प्राप्तोऽस्मि । ( विचिन्त्य ) अथवा अलं संशयेन,

मातेव ललिताकारा देवतेव शरीरिणी ।
नैषा मिथ्यानुषङ्गस्य पात्रतां गन्तुमर्हति ॥

( प्रकाशं ) आर्ये, कथय, के के भवत्या अलङ्काराः, ये मूढेनानेन बलाद् गृहीताः ।

स्त्री—रजतमयं वलययुगलम्, रजतमयी मेखला, सुवर्णमयं कुण्डलद्वयञ्च ।

रत्ना—एतावन्त एव ?

स्त्री—अथ किम् । भद्र, एतावन्त एव पर्याप्ता मे दीनायाः ! एतेऽपि

विवाहकाले मात्रैव प्रतिपादिताः ! तदनेन प्रसङ्गेन पत्युरवस्थाविशेषं स्मृत्वा खिन्नास्मि ।

रत्ना—आर्ये, किमेवं दैन्यं वहसि ? पश्य,—

व्याददाति महाभीमं वक्त्रं दुर्भिक्षराक्षसः ।
तद्वक्त्रे विनिविष्टानां सर्वेषामद्य सा दशा ॥

स्त्री—भद्रस्य मातृबहुमानेन गौरवं गमिता किञ्चिदिव वक्तुमिच्छामि ।

रत्ना—आर्ये कथ्यताम् ।

स्त्री—यदत्र भद्रः 'सर्वेषामद्य सा दशा' इति सामान्यतो ब्रवीति, तदिदं न मे दृढं रोचते ।

रत्ना—आर्ये, कथमिव ?

स्त्री—कथमिति ? किं वात्र प्रष्टव्यम् ? नागरिका धनिकाः स्वच्छन्दमाहारं विहारञ्च कुर्वन्तः प्रतिपदं रमन्ते । धनिकानां कलत्राणि विचित्रालङ्कारसमलङ्कृतानि धनमदेन पन्थानं नमयन्तीव परिक्रामन्ति, तेषां वित्तमदमत्ताः सन्ततयो विचित्रपरिच्छदाभरणा दीनानां दीनाः सन्ततीः क्लेशयन्त्यो वाचा च कर्मणा च निरन्तरमेव परिभवन्ति । अपि नाम विलोपं गतानि तेषां गृहे तौर्यत्रिकविजृम्भितानि, ह्रासं गता वा लेशमात्रेणापि विलासव्यवहाराः ? तत् कथमेवं भवान् ब्रवीति ?

रत्ना—( स्वगतं ) अहो एषापि परसम्पदा परितप्यते ? सत्यमेवैषा प्रत्यौति,

कपर्दकसमा कोटिर्व्यसने यस्य दृश्यते ।
स जीवनार्थं भिक्षूणां न प्रदत्ते कपर्दकम् ॥

अहो, वित्तमत्तता धनवताम्, स्मरामि, हन्त स्मरामि, क्रीडां गतस्य मे वत्सस्यात्रेयस्य दारिद्र्यादेव धनमदमत्तैरमात्यकुमारैः कृतं कठोरं पराभवम् ! येन दुर्मनायमानः क्रीडाप्रियोऽपि वत्सो मे क्रीडानिवृत्तिमात्मना समाश्रितः । हा वत्स आत्रेय,

महता भाग्यदोषेण रत्नाकरगृहं श्रितः ।
परेषां सम्पदा येन सततं परितप्यसे ॥

( अश्रु मुञ्चति )

स्त्री—कथमार्यो बाष्पं विसृजति ? तत् किन्तु खल्विदम् ?

रत्ना—न किञ्चिदेतत् !

स्त्री—आर्य, सुतरामपराद्धास्मि, येन निर्विचारमुपक्रान्तेन दुःखनिवेदन-लाघवेन भवन्तं दुःखाकृतवती । तदलमनेनाप्रकृतेन ।

रत्ना—अये, किं नाम सम्प्रति प्रकृतम् ? ( विचिन्त्य ) आं स्मृतम् ! अरे पुरुष ! कथय, क्व ते अलङ्काराः ?

पुरुषः—भद्र, किमेवं पिष्टपेषणेन ? न सन्त्येव मय्यलङ्काराः, तत् कथं दीयन्ताम् ।

रत्ना—मूढ, रत्नाकरः खल्वहम्, तावता वृथैव मां वञ्चयितुमिच्छसि ? यदि कल्याणं कामयसे, प्रत्यर्पयालङ्कारान् ।

स्त्री—अये, एष रत्नाकरः, यस्य दैन्यं गतस्यापि सौजन्यप्रभवां कीर्त्तिं समुद्घोषयन्ति पौरजानपदाः ! अथवा कुतः खलु सुधाकरादन्यतः पीयूषवृष्टिः ?

पुरुषः—नास्त्येव मय्यलङ्कारः, तथापि यद्यस्ति, गृह्यताम् !

रत्ना—भद्र, सान्त्वं न कामयसे, येनाद्यापि नालङ्कारं प्रत्यर्पयसि । अथ यद्येवं. स्वस्थानादुत्तिष्ठ, यावदहं स्वयं पश्यामि ।

पुरुषः—भद्र, भवत एव दण्डप्रहारेण भग्नकटिं मां नैवमुपहसितुमर्हसि, कुतोऽद्यापि मे स्वस्थानाच्चलनसामर्थ्यम्, तदनुकम्पया दीयतां करालम्बः ।

रत्ना—एष करालम्बं ददामि, उत्तिष्ठ । ( करालम्बं दातुमुपगतः )

पुरुषः—( स्वगतं ) अयमेव प्रतीकारावसरः ! मूढ, इदानीं क्व यास्यसि ? ( वस्त्रान्तरात् छुरिकामाकृष्य रत्नाकरस्य वक्षसि प्रहर्त्तुमिच्छति )

रत्ना—( सहसा तं मणिबन्धे गृहीत्वा तस्य करात् छुरिकामाकृष्य

प्रतिप्रहारं कर्तुमिच्छति ) मूढ, प्रतिपदं दृश्यसे, एवं किल रत्नाकरं वञ्चयितुमिच्छसि ? अथेदानीम् ? मूढ, अथेदानीं स्मर स्वकीयं भागधेयम् ( प्रहर्तुमुद्यतः ) ।

स्त्री—अहो अत्याहितम् ! आर्य्य, मा तावत्, मा तावत् मानुषवधं कार्षीः ! प्रसीद !

पुरुषः ( स्वगतं ) अहो धिक्, ईदृशी मया मूढेन पराभूता ? तत् कृतमतिमात्रमसदृशं कर्म। लज्जया वसुन्धरागर्भं प्रवेष्टुमाकाङ्क्षति मे अन्तरात्मा !

रत्ना—अथवा तिष्ठ तावत् यावदस्या आर्यायाः कल्याणोदर्कः प्रबन्धः क्रियते। साम्प्रतमनुपेक्षणीयोऽसि, तदेहि अस्मिन् सन्निहिते पादपस्कन्धे त्वां पादपलम्बितलतापाशेन दृढं बद्ध्वा विश्वस्तो भवामि।

पुरुषः—*भद्र, एष नतोऽस्मि, अज्ञानकृतं मे क्षन्तुमर्हसि।*

रत्ना—मूढ, किं न जानीषे ?

ज्ञानतोऽज्ञानतो वापि समाक्रान्तो हुताशनः।
तुल्यं दहति नास्त्यत्र ज्ञानाज्ञानविचारणा॥

पुरुषः—हा ! हा !! निराशोऽस्मि।

रत्ना—मूढ, अद्याप्याशां वहसि ? धिक् साहसम् !

कुलाङ्गनां स्वामिनिरुद्धमानसां नीरार्थमारात्तटिनीमुपेयुषीम्।
आक्रम्य कामादपहृत्य भूषणं रहः समाकाङ्क्षसि मुक्तिमप्रतः॥

*आदौ कथय, क्व ते अलङ्काराः ? दृश्यतामिदमुद्यतं शस्त्रम् !*

पुरुषः—एष कथयामि। इह मूषिकोत्करे सन्ति।

रत्ना—उत्सार्यतां मूषिकोत्करः।

पुरुषः—एष उत्सारयामि ( मूषिकोत्करमुत्सार्य अलङ्कारान् आविष्करोति )।

रत्ना—उपनीयन्तामिदमीमस्याः।

पुरुषः—( स्वगतं ) [illegible] सुवर्ण

प्रेरितः कथमिदानीमेनाम् [illegible] व्रीडया,

( प्रकाशं ) एष उपनयामि [illegible] सुत

मां क्षन्तुमर्हसि ।

> मोहात्त्वयि कृतं येन दुष्कृतं पापकारिणा ।
> दूरापेतः स मे [illegible] ॥

तत क्षमस्व, गृहाण मातुस्ते शरीरात्मया दुष्टेन गृहीतानलङ्कारान ।

स्त्री—वत्स, उत्तिष्ठ, प्रसन्नास्मि । सम्प्रति कामराक्षसाद् विमुक्तः कल्याण एव मे प्रतिभासि । वत्स, अलङ्कारानिमानस्य महानुभावस्य उपनय ।

रत्ना—मा, मा तावदेवम् । जननि, नैवं वक्तुमर्हसि, नाहं जननीं निराभरणां समीक्षमाणो धनलाभेन परितृप्यामि, विशेषतश्च मात्रा स्नेहेन प्रतिपादितानि भूषणानि न ते शरीरवियोगमर्हन्ति । तदिदानीम्—

> आमुच्यतां यथास्थानमयं भूषणसञ्चयः ।
> मातरं भूषितां वीक्ष्य लवयामि शुचं हृदः ॥

स्त्री—वत्स, कृतवेदितया समावर्जितास्मि, यद्यनेन दैन्यं गतस्य भवतः कियानप्युपकारस्तदा कृतार्था भवेयम् ।

रत्ना—आम अस्त्येतत, तथापि दैवतशीले,

> भवत्या मातृतुल्याया नापरं किञ्चिदर्थये ।
> मनस्तापविनाशार्थमाशीरेव प्रदीयताम् ॥

स्त्री—एवमस्तु देवताप्रसादात । का गतिः ? वत्सस्य सन्तोषार्थम् एषा गृह्णामि ।

रत्ना— अम्ब, आमुञ्च, यावत पश्यामि ।

स्त्री—एते आमुक्ताः । अथेदानीम् अनुमन्यस्व मां गमनाय ।

रत्ना—एवम्, गच्छ, शिवास्ते सन्तु पन्थानः । अथवा नार्हस्येकाकिनी गन्तुमर्हसि, तत किन्तु खलु कुर्याम् ? आं दृष्टम् ! अरे, गृहि

[illegible] मिमतं देशं प्रापयामि ।

[illegible]ी—वत्स, कथमद्याप्यस्य बन्धनमिच्छसि ? शान्तः खलु वत्सो मे व्यतीतकामः प्रत्यर्पितन्यासश्च ।

रत्ना—अम्ब, न जानासि गतिं तस्कराणाम्, विचित्रचरित्राः खल्वेते, तदिदमेव श्रेयः पश्यामि ।

पुरुषः—भद्र, नैवमधिक्षेप्तुमर्हसि, तस्करा अपि मानुषा एव, तेऽपि हृदयवन्तो हर्षकाले नृत्यन्ति, दुःखकाले च वाष्पं परिमुञ्चन्तो विक्लवा विलपन्ति। येनोपकरणेन युष्माकमिदं शरीरं, तेनैवोपकरणेन निरमायि तेषामपि शरीरं धात्रा। तथापि त एव यदा स्वकीये गेहे क्षुधा तृषा च मृत्युवक्त्रगतानात्मजनानन्नदानेन परिपोषयितुमसमर्था दुर्भिक्षपीडिते जनपदे प्रयत्नवन्तो भिक्षामप्यलभमानाः परितः परितप्यन्ते, तदैव स्वीयां दैवनवृत्तिं दूरे निर्वास्य राक्षसीं वृत्तिमवलम्ब्य स्वजनपोषणाय प्रवर्तन्ते। भद्र, मन्ये दुर्भिक्षपीडिते जनपदे न प्राप्तोऽसि दारिद्र्यगोचरताम्, येनैवं ब्रवीषि। भद्र, नूनं न जानासि, कीदृशं हृदयं दुःसहदुःखभारेण भूमौ विचेष्टमानान् स्वपरिजनानवलोकयतां दीनानाम्, नूनं न जानासि, कीदृशं हृदयं पदे पदे धनमदमत्तैः पुरुषैः सुतरामवज्ञया परिताप्यमानानां निर्धनानाम्, नूनं नावधारयसि, क्षणे क्षणे काम्यप्रतिघातकारिणा दारिद्र्येण निष्करुणं निष्पिष्यमाणानां हृदयवैक्लव्यं मादृशानाम्! भद्र, सन्ति तस्कराणामपि स्वजनाः, ते क्षुधया तृष्णया च परिपीड्यमानाः स्वयं दुःखं प्रतिकर्तुमक्षमास्तानेव प्रतीकारं याचन्ते, तेषामेव स्मरन्ति, तेषामेव च पन्थानमाशाबद्धहृदः सोत्कण्ठाः समुदीक्षन्ते, तत् कथय, स्वजनपोषणस्य गत्यन्तरमनीक्षमाणानां तेषां का गतिः साहसवृत्तिसमाश्रयणादन्या। तदविचारतो नैवमेतानधिक्षेप्तुमर्हसि।

रत्ना—( मुग्ध इव अश्रु मुञ्चन् ) भद्र, अधिक्षेपेण अपराद्धोऽस्मि, तदविज्ञानतो मे क्षन्तुमर्हसि! ( स्वगतं ) तत् किं ममापि स्वजनदुःखनिर्वापणाय सैव गतिः ?

पुरुषः—भद्र, यदि प्रत्येषि, किञ्चित् कथयितुमिच्छामि ।

रत्ना—कथय,

पुरुष—एवं कथयामि, यदिदानीमेकाकिन्या अपि गच्छन्त्या मातुरभयमेवेति ।

रत्ना—कथमिव ?

पुरुषः—अस्त्यत्र प्रान्ते तस्करवर्गः, स ममैव वशे वर्तते । तद् यदि मातुरस्याः पथि गच्छन्त्याः कश्चित्तस्करः पन्थानमभिरुन्ध्यात् तदा 'वीरबलं स्मर' इति वक्तव्यम्, एवं किल दासजन इवासौ मातुरादेशमनुवर्तिष्यते । तदेवं मयि क्रियतां प्रत्ययः ।

रत्ना—कथं वीरबलो ननु भवानेव ? यस्य नामश्रवणेन परितः परिकम्पन्ते जानपदाः ?

पुरुषः—अथकिम् !

स्त्री—आम् एष वीरबलस्तस्कराणां नायकः ?

रत्ना—अम्ब, एवं क्रियताम्, एष वीरबलो लब्धोपशमः कथयति, अलमत्र अन्यथा मत्वा । विपदि यथोपदेशं कुर्वीथाः ।

स्त्री—अहो, निराबाधास्मि, तदिदानीं निःशङ्का गच्छामि ।

( निष्क्रान्ता )

रत्ना—गता खलु जननी ! भद्र, वीरबल, आर्यायामस्यां सदृशतया मातृसमुदाचारेण सम्बन्धवानसि, तदिदानीं समासेन भवतो वृत्तं समाकर्णयितुमिच्छामि ।

पुरुषः—भद्र, रत्नाकर, भवतः शौर्यं साहसं निपुणतां लोकोत्तरमौदार्यं विलक्षणञ्च कलेवरसंस्थानमीक्षमाणः परतन्त्रीकृतोऽस्मि प्रेमविस्मयाभ्याम् । तदाकर्णय यावत् समासेन कथयामि । अनन्तरिदं शात्रववृत्तं विस्मृत्य कृपया श्रोतुमर्हसि ।

रत्ना—भद्र, वीरबल, त्वयि निष्ठुरमनुतिष्ठता मयापि सुमहद् वैरमनुष्ठितं, तत् त्वमपि विस्मर ।

पुरुषः—मया तु तदेव विस्मृतं तत्, यदा स्वस्य दोषो विज्ञातः प्रणि-
कृतो मातृपादयोः ।

रत्ना—तत् कथय ।

पुरुषः—श्रूयताम्—अस्ति तावदस्मिन्नेव प्रान्ते महेश्वरशैलसन्निहितं ब्रह्मपुरं नाम नगरम् ।

रत्ना—अस्ति, ज्ञायते, किं तत्र ?

पुरुषः—तत्रैव स्थितिमुपेयुषो विष्णुदासनामधेयस्य ब्राह्मणस्याहमेक एव तनयोऽस्मि ।

रत्ना—ततस्ततः ?

पुरुषः—ततश्च भद्र, शैशवं नातिक्रामत एव मे परमस्नेहनिलयस्तातो माञ्च मदीयां दीनां मातरञ्च शोकमहार्णवे निपात्य सहसा कदाचित् स्वर्गमगात् ।

रत्ना—हा कष्टम्, ततस्ततः ?

पुरुषः—ततश्च कियत्कालानन्तरं यौवनमुपगते मयि दारिद्र्ये स्थितापि मे जननी एकाकितया महत् कष्टमनुभवन्ती कुलवतीं कामपि बालामनपचितलावण्यां स्नुषात्वेन गृहीतवती, अहमनिच्छन्नपि मातृभक्त्या तस्या विरोधी नाभूवम् ।

रत्ना—हा धिक् निर्विचारमिदमनुष्ठितम् । ततस्ततः ?

पुरुषः—ततश्च क्रमेण राज्ये कठोरदुर्भिक्षेण पदमकारि, येन भिक्षाप्राप्तिरपि विघटिता बभूव । तदा कदाचिदनशनेन कदाचिदर्धाशनेन कदाचित् पञ्चषदिवसानन्तरमेकाहारेण वा प्रियाया मे, अहह ! प्रियाया मे शरीरे विषमो ज्वरः प्रादुर्बभूव । महताऽनुनयेन प्रवर्तिता अपि महान्तो वैद्या न तस्य विषमज्वरस्य सान्निपातिकस्य प्रशमं कर्तुमक्षमन्त । हा हा ! गता ! गता खलु सा ! अनाहारेण क्लिष्टा सती सा लता विशुष्का ! ततश्च हा हा ! प्रिया मे मदिरा भस्मतां नीता हुताशनेन । अनशनेन ज्वरप्रकोपेण च कृशीकृता सा क्षणेनैव भस्मतां नीता ! ममैवाधन्यस्य समपेक्षितभोज्य-

प्रतिपादनशक्तिशून्यतया अभिमानेनेव मामनपेक्ष्य हा हा मदिरा मे चिता-वह्निज्वालया आत्मानं भस्मतां नीतवती ! तत्स्मृतिरद्यापि कुकूलाग्निरिव प्रतिमुहूर्तमेव मे स्वान्तं निष्ठुरं दहति । हा हा मदिरा मे गता, कापि चिराय गता !

रत्ना—वयस्य, वीरबल, अतीते धैर्यमवलम्बस्व । कथं नाम तथा वैक्लव्येन वृत्तं विवृण्वन् ममापि लोकोत्तरं मानसोद्वेगं वर्द्धयसि ? तत् कियानस्ति वृत्तशेषः ?

पुरुषः—आम् अस्ति स्वल्पपरिणाहोऽपि गुर्वर्थो वाक्यशेषः ! श्रूयताम् ।

रत्ना—कथय ।

पुरुषः—वयस्य, किं वा अतः परं कथयामि, तदा तस्याः प्रियतमायाः स्नुषायाः स्मरन्ती तदर्थमनवरतं शोकं वहन्ती, तामेव नक्तन्दिवमभिलपन्ती अनाहारक्षीणकाया मातापि मे स्वल्पेनैव कालेन शय्यामाश्रितवती । तदा मम शून्यतामगात् समग्रं जगत् । इतो हृदयदयिताया अनाहारेण काल-कवलं प्रविष्टाया दारुणो दुःखमयो विप्रयोगः, अन्यतश्च मृत्युवक्त्र-मनुप्रविशन्त्याः सुखे वा दुःखे वा ममैकसमालम्बनभूताया अम्बायाः कथमपि जीवनरक्षणचिन्ता ! तथा अनशनेन शोकेन गभीरचिन्तया च स्वशरीरस्य प्राणहरं दौर्बल्यम् । किं करोमि, क्व गच्छामि, कुतो वा भैक्ष्यमासादयिष्ये, कं वा शरणं व्रजामि इत्येतानि विनिर्णेतुमशक्नुवन् मूर्च्छित इव उन्मत्त इव भूताविष्ट इव च व्यचरम् । बान्धवा भिक्षिताः, धनिकाः प्रतिद्वारमुपेत्य मातृजीवनाय याचिताः, सर्व एव ते हा हा सावज्ञं मां प्रत्याख्यातवन्तः !

रत्ना—अहह ! मामपि तदा भिक्षमाणमेवमेव धनिकाः सन्निकृष्टा बान्धवाश्च सावज्ञं प्रत्याख्यातवन्तः ! तदेष व्यसनसब्रह्मचारी मया समासा-दितः । भद्र, वीरबल, ततस्ततः ?

पुरुषः—ततश्च मातृप्राणरक्षणाय गत्यन्तरमनीक्षमाणः—

विभिन्दन् मर्यादां कुलमगणयन्नुन्नततमं
स्वमातुः प्राणार्थं कतिचन दधद् बालसुहृदः ।
रहश्चौर्यं कृत्वा धनमुपगतो मातरमहं
व्यधां सुस्थां तस्मात् प्रभृति कलये साहसमिदम् ॥

रत्ना—अहो ! साम्प्रतं वीरबलस्य सुकृतदुष्कृतयोः सन्धौ वर्त्तमानतया अस्य कृत्यं प्रकृष्टमपकृष्टं वेति महति संशये पतितोऽस्मि ।

तथाहि—एकतो दुष्कृतं चौर्यमन्यतो मातृरक्षणम् ।
सन्धौ वीरबलो भाति लोकालोक इवाचलः ॥

अहो, ममापि गेहे वृद्धौ पितरौ, बालस्तनयः, साध्वी प्राणसमा वनिता इति सर्व एवैते ममैव पन्थानमुदीक्षमाणाः कथमपि जीवनं धारयन्ति, अपि जीवनं धारयन्ति ? वयस्य, वीरबल, अपि जानासि मां निःशेषम् ! वयस्य वीरबल, ममापि दरिद्रब्राह्मणस्य गेहे वृद्धौ पितरौ क्षुधया परिपीड्यमानौ भूमिशय्यामाश्रितौ, ममापि गेहे बालस्तनयः क्षुधाक्लेशेन मूर्च्छितो भूमौ पतितस्तिष्ठति, ममापि गेहे साध्वी वनिता पुत्रमनशनेन मूर्च्छितमपि समुपेक्ष्य दुर्बलान्यङ्गानि वोढुमक्षमा शिथिलितसन्धिबन्धा मृत्युवक्त्रमीक्षते ! वयस्य, यदि जानासि, कथय, कस्तेषां जीवनोपायः ?

मा नाम सूर्येण समं दिनान्ते मद्बान्धवा मृत्युमुखं विशेयुः ।
हा हा कथं तानिह जीवयेयं ? वयस्य का वा गतिरुच्यतां मे ॥

पुरुषः—वयस्य, रत्नाकर, सम्यग् दृष्टोऽसि, तदलं वैक्लव्येन, अस्त्येव सञ्जीवनोपायः ।

रत्ना—वयस्य, कथय कथय, को नामासौ ?

तदर्थं किमु गन्तव्यं दुरारोहं गिरेः शिरः ?
सागरो वा प्रवेष्टव्यः ? क्षणो मम युगायते ॥

पुरुषः—वयस्य, रत्नाकर, नैव तदर्थं शैलाग्रं गन्तव्यं, नापि सागरः प्रवेष्टव्यः । वयस्य, कण्ठस्थितमपि चामीकरं मोहान्न जानासि !

रत्ना—वयस्य, समुत्कण्ठितोऽस्मि, तदविलम्बितं ब्रूहि ।

पुरुषः—वयस्य, रत्नाकर, किं वा कथितेन,

मारुतस्येव ते शौर्यं कृतान्तस्येव साहसम्।

सहायं यदि विन्देम तदा करगता गतिः ॥

रत्ना—वयस्य, किमभिप्रेतं भवतः ?

पुरुषः—अस्माकं साहसिकानां वर्गे भवन्तमीश्वरं कर्तुमिच्छामि।

रत्ना—अहो धिक्! पातकमिदमतिनिष्ठुरञ्च।

( ततः प्रविशति शून्यमार्गे गायन्ती नियतिः )

( गीतम् )

स्वजनान् संस्मर दीनान्

जनको मूर्च्छति जननी रोदिति लयमुपयाति विवस्वान्।

मूर्च्छिततनयं त्वमुचितविनयं पश्यसि न कथं धीमान्।

क्षुधया विकलान् परिहृतकुशलान् स्मरसि न कथमिह दारान् ?

( तिरोभूता )

रत्ना—देवि, देवि, कथय कथय, अपि नाम ते समुच्छ्वसन्ति ? अद्यापि समुच्छ्वसन्ति ? ( अदर्शनमभिनीय ) हा कथं लुप्तैव ? सखे वीरबल, भीतोऽस्मि, तदन्यं पन्थानं ब्रूहि।

पुरुषः—वयस्य, कस्माद् भीतोऽसि ?

रत्ना—धर्मात्—

पुरुषः—किं कृतमेतावत्कालं ते रक्षितेन धर्मेण ?

अपि साहायकं दत्तं तेन बान्धवरक्षणे ?

मुधैव कल्पनासारं सुकृतं बहुमन्यसे।

रत्ना—आम् एवमिदम्! वयस्य वीरबल, तथापि भीतोऽस्मि!

पुरुषः—वयस्य, रत्नाकर, किं वा कथयामि, मिथ्यैव त्वं निपुण इत्यभिधीयसे। धिक् ते पातकभीतिं यया क्षुधाजनितेन क्लेशेन परिमूर्च्छितौ पितरौ मूर्च्छितां दयितां कृतान्तस्य कवले प्रविशन्तं प्राणाधिकं पुत्रकञ्च माध्यस्थ्येन समुपेक्ष्य केवलं वाङ्मात्रेण वात्सल्यमभिनयसि। यद्यस्ति

पुत्रे वात्सल्यम्, यद्यस्ति पित्रोः श्रद्धा, यद्यस्ति च प्राणप्रियायां पत्न्यां प्रणयः, तदा उत्तिष्ठ, दूरे वर्जयित्वा कल्पनामात्रसारात् पातकाद् भीतिं पौरुषेण कृत्ये प्रवर्तस्व, एवमेव समुद्यमिनं त्वां लक्ष्मीरुपेत्य स्वयमभिनन्दिष्यति! मा तावदद्यापि आलस्यदोषेण मध्यस्थः स्वजनविध्वंसं कार्षीः। तदलं विलम्बेन, अचिरमेव साहसिकानामस्माकमात्मना प्रभुदण्डं गृहीत्वा स्वमनोरथं निर्वर्त्तयेथाः।

रत्ना—वयस्य, वीरबल, परवशः कृतोऽस्मि, तत् क्षणं तिष्ठ, यावदवधारयामि।

पुरुषः—धिक्! अद्यापि क्षणमपेक्षसे? स्वजनानां वदने यदा मृत्युच्छाया पदं करोति, तदापि धर्मभीतः क्षणमपेक्षसे? अहो धिक् तव विवेकशून्यताम्।

रत्ना—अहह! सत्यं सत्यमेव पश्यामि, स्वजनानामाननेषु मृत्युच्छायां पश्यामि। मूढ रत्नाकर, अद्यापि पातकं चिन्तयसि? धिङ्मूर्ख, अपध्वस्तोऽसि।

प्रत्यक्षं पितरौ सुतः प्रियतमो भार्यानुकूला तथा
मृत्योर्वक्त्रगताः क्षितौ निपतिता दीर्घं श्वसन्तो यदा।
दृष्ट्वा तान् समुपेक्ष्य मोहवशतोऽदृष्टे दधानो रतिं
स्वर्गं वाञ्छसि किं? चिराय भवतः स्वर्गः स विध्वंसताम्॥

सखे, वीरबल, एष सज्जोऽस्मि, तदुपनय प्रभुदण्डम्।

पुरुषः—(स्वदण्डमुपनीय) एष प्रभुदण्डः, गृह्यताम्।

रत्ना—(गृहीत्वा) एष गृह्णामि। नमः सर्वविप्लवकारिणे स्वजनस्नेहाय।

पुरुषः—अहो कृतार्थोऽस्मि।

रत्नाकरस्य भुजविक्रम-साहसाभ्या-
मभ्यागतामिव पुरः कलयामि लक्ष्मीम्।

तेनाद्य चौरसमितेः समधिष्ठिताया
लोकोत्तरा धनिकनिग्रहशक्तिरासीत् ॥

रत्ना—वयस्य, वीरबल, स्वजनदशामनुस्मृत्य व्याकुलोऽस्मि ।

पुरुषः—सखे, रत्नाकर, शनैः शनैर्मन्त्रय ।

रत्ना—कथमिव ?

पुरुषः—( नेपथ्याभिमुखं दर्शयित्वा ) किं न पश्यसि ? एष कश्चन शाकटिकः सूपतण्डुलाद्युपकरणोपेतं दण्डधारिणा आपणिकेन समधिष्ठितं शकटं वाहयन्नित एवाभिवर्तते, तदत्रैव ते प्राथमिकहस्तरेखापातः कर्तव्यः । एहि यावद् वृक्षान्तरालमाश्रित्य प्रतिपालयावः । इहैव निहिता ते स्वजनानामनशनेन मूर्च्छतां रक्षा । तदलं विलम्बेन, कृत्ये प्रवर्तस्व । शेषं कर्णे कथयिष्यामि ।

रत्ना—एवमस्तु । नमः सर्वविप्लवकारिणे स्वजनस्नेहाय ।

( निष्क्रान्तौ )

( ततः प्रविशति सपरिजनः क्षुधाविकलश्च्यवनः )

च्यवनः—अये, अवसितप्रायो दिवसः ! तथाहि—

दूराद् विहङ्गनिचयः समुपैति नीडं
क्षेत्रात् परापतति धेनुगणः समन्तात् ।
यात्येष संहृतकरो रविरस्तचूडां
शैलाग्रगैरिकरजोभिरिवानुलिप्तः ॥

अद्यापि वत्सो मे रत्नाकरो नागच्छति, न जाने कियति दूरे वत्सो मे कथं वर्तत इति । वत्सस्य रत्नाकरस्य क्षुधापरिक्लिष्टानां मुहुर्मुहुः संज्ञाशून्यानामिव भूमौ पततां परिजनानाञ्च कृते सुतरां चिन्ताकुलोऽस्मि । तत् किन्तु खलु वत्सो मे—

गृहे गृहे दीनवचःप्रपञ्चैः सम्प्रार्थ्य हा व्यर्थबहुप्रयासः ।
नायाति लज्जाजडितः स्वगेहं भिक्षार्थमाहो स गतः सुदूरे ॥

यथा तथा वा भवतु, किमिदानीं करोमि ? एष वत्स आत्रेयः प्रखर-सूरातपपरिक्लान्तं प्रसूनमिव वात्यासमुत्पातितस्य पादपस्य नेत्रयोर्मे रुजा-मुत्पादयति, क्षणे क्षणे समाशङ्कते मे हृदयम् ? अहह ! सुबहु समन्विष्यापि गतिं न लभे, अहह ! अशरणोऽस्मि—

एष प्रसूनदलकोमलदेहभारः
सारो मदीयहृदयस्य कृशः क्षुधार्तः ।
मूर्च्छामितो वत सुषुप्त इवाद्य भूमौ
ग्रन्थिं छिनत्ति मनसो मम हा हतोऽस्मि ।

वत्स, आत्रेय, वत्स, उत्तिष्ठ, किमेवं शिथिलकरणो भूमौ शयितोऽसि ? अयि स्नुषे, कथं भूमिशयने स्थितमवशमात्रेयं नाङ्के दधासि ? ब्राह्मणि, किमेवं पतितासि ? एष आत्रेयः प्राणाधिको भूमौ मूर्च्छति, एषा कल्याणमयी स्नुषा मोहपरतन्त्रा पुत्रमप्यनपेक्षमाणा विवशा शेते, कथमेतौ नावेक्षसे ? भूमिं परित्यज्य सान्त्वय स्नुषामात्रेयञ्च ! अथवा तिष्ठत, तिष्ठत यूयं तथैव,

यावन्मोहस्तावदेवास्ति शान्ति-
र्दुःखं तावद् यावदेव प्रबोधः ।
दौर्भाग्यान्मे नास्ति मोहो न मृत्यु-
र्मृत्यो दुःखान्मोचयैनं सुशीघ्रम् ॥

अथवा ममैव चेन्मरणं तदा को नाम तादृशं दुःखं सहेत ? अहह !—

प्रत्यक्षमेते स्वजनाः क्षुधार्ता भूमौ लुठन्तो यमदत्तहस्ताः ।
तद्दर्शनार्थं वत हा विधात्रा व्यधायि मे शल्यसमः प्रबोधः ॥

हा हतविधे,

विप्राणां विमले कुले जनिमगां सौम्यानिमान् बान्धवान्
बुद्धिं वस्तुविचारसाधनफलां देहं रुजा वर्जितम् ।
यद् यत् कामफलं तदद्य सकलं लब्ध्वापि पुण्योचितं
तेऽद्भुर्यास्तव दैन्यवह्निविहतो मन्येऽखिलं निष्फलम् ॥

र-माता—अहह ! आर्यपुत्र, विचेतनापि अन्तरान्तरा आत्रेयस्य वत्सायाः स्नुषायाश्च परिक्लेशं स्वप्नं मनेव स्मरन्ती विषीदामि, नास्ति मे मोहेऽपि प्रशान्तिः ! अहह ! सुदुःसहापि क्षुधातृष्णाप्रभवा वेदना तथा न व्यथयति यथा किल वत्सस्य आत्रेयस्य वत्साया वध्वाश्च सुदुःसहं कातर्यम् ! तत् कमद्य शरणमुपेत्य व्यसनप्रतीकारं करोमि । किञ्च गण्डस्योपरि विस्फोटकेनेव प्रदोषेऽपि वत्सस्य रत्नाकरस्यादर्शनेन सुतरां शङ्कितास्मि । तदस्या विपत्तेः प्रतीकाराय कमिदानीं शरणं गच्छामः ?

च्यवनः—ब्राह्मणि, देवतां ! देवतामेव शरणं गच्छ । विपत्तौ देवतामन्तरेण कोऽन्यः शरणं दुर्गतानाम् ?

र-माता—आर्यपुत्र, अपि नाम देवताः सन्ति ?

च्यवनः—प्रिये, किमिदं ब्रवीषि ?

र-माता—यदि सन्ति, किमिति तथा कातरं विलपतां पदे पदे कृपां भिक्षमाणानामपि नास्माकं दयन्ते, तन्नूनमसन्तो देवाः ।

च्यवनः—ब्राह्मणि, मा मैवम्, नैवं देवतामधिक्षेप्तुमर्हसि । लोकानां स्वेनैव कर्मणा जनितमदृष्टमनुपतन्तो देवा नार्हन्ति स्वातन्त्र्येण किञ्चित् कर्तुम्, तदलं देवताधिक्षेपमहापातकेन । अधिक्षिप्यतां स्वमेवादृष्टं येन वयं तथा दुःखमये विपाके निक्षिप्ताः स्मः ।

र-माता—आर्यपुत्र, नावगच्छामि, यद्याराधिता अपि देवाः प्रीणिताः स्वच्छन्दतो नार्हन्ति किञ्चित् सम्पादयितुं, कथन्तर्हि देवा आराध्यन्ते ?

च्यवनः—ब्राह्मणि, न जानासि तत्त्वं, यदेवं वदसि !

र-माता—किमिव ?

च्यवनः—देवाराधनेति नित्योऽयं विधिर्गृहस्थानाम् । अकृता सा प्रत्यवायमुत्पादयेत् तेन च कष्टात् किमपि कष्टतरमापतितं स्यात् ।

र-माता—किमितोऽपि नः कष्टतरम् ?

च्यवनः—ब्राह्मणि, निर्विचारमभिहितम् । तथाहि पश्य,

अद्याप्यावासहेतोः परिजनसहिता वृक्षमूलं न याता
सोच्छ्वासैः पुत्रपौत्रादिभिरपि कलिता यापयस्येव कालम् ।
अद्याप्यानन्दधारां वहसि निजदृशा लोकयन्ती स्वर्गं
श्रोत्रेणाकर्णयन्ती स्वपरिजनकथां विन्दसेऽद्यापि मोदम् ॥

तद् देवाराधनामकुर्वाणा प्रत्यवायपराक्रमेण किमेतावदपि क्षपयितुमिच्छसि ?

र-पत्नी—( संज्ञां लब्ध्वा ) अहो ! अवसन्नास्मि ! मातः ! अथ अद्यापि नागतस्ते पुत्रः ?

र-माता—वत्से, स्थिरा भव, एष आगतप्राय एव ।

र-पत्नी—अप्रकाशेन जानामि प्रदोषो वर्तत इति । तदद्यापि नागतः ? हा हतास्मि मन्दभागिनी । न जाने किमतः परमपि कष्टतरं स्यात् ! अहह ! एष प्राणाधिको वत्सो मे मूर्च्छितः क्षितौ शेते ! दुर्वहश्चेदं शरीरम् ! आर्यपुत्र ! क्वासि ? कियद्दूरे वर्तसे ? दृढं शङ्कितास्मि, तदेहि, सत्वरमेहि ।

आत्रेयः—पितामह, कथमद्यापि तातो नागतः ?

च्यवनः—वत्स, स्थिरो भव, एष आगतप्राय एव ।

आत्रेयः—सुचिरं कथयसि आगतप्राय इति, तन्नातः परं विश्वसिमि ! अहो ! शुष्कः कण्ठो मे, नार्हामि वाचमपि वक्तुम् ! घूर्णते शिरः ! क्षीणा दृष्टिः ! अवशं शरीरम् ! मातः ! कण्ठः शुष्यति ! दीयतां पानीयम्, ( मूर्च्छति ) ।

सर्वे—वत्स आत्रेय, किमेवं करोषि ?

च्यवनः—वत्से, शीघ्रं पानीयमाहर ।

र-पत्नी—हा देव, हा आर्यपुत्र, ( सत्वरं निष्क्रम्य पानीयमादाय प्रविश्य ) वत्स, इदं पानीयम् ! हा हा वत्स, किमेवं मूर्च्छां गतोऽसि ?

च्यवनः—( चक्षुषोः पानीयं निक्षिप्य ससंज्ञं दृष्ट्वा ) एष संज्ञां लभते !

आत्रेयः—पितामह, देहि पानीयम् ।

र-माता—वत्स, इदं तत् पानीयं, पीयताम् । ( पानीयं समुपनयति )

आत्रेयः—( पानीयं पीत्वा ) आः ! समुज्जीवितोऽस्मि । मातः ! पितामह, पितामहि, यूयमपि पानीयं पिबत । येन पितुरागमनकालं यावत् स्वस्था भविष्यथ ।

च्यवनः—अहो वात्सल्यमात्रेयस्य ! भवतु, ब्राह्मणि, तदेव क्रियताम् ।

( सर्वे पानीयं पिबन्ति )

र-माता—आर्यपुत्र, किञ्चिद् वक्तुमिच्छामि ।

च्यवनः—कथय ।

र-माता—आत्रेयस्य स्नुषायाश्च वैक्लव्यं समीक्ष्य दृढं शङ्कितास्मि, रत्नाकरोऽपि सुतरां विलम्बते, तद् यदि नात्यायासकरं तदा प्रतिवेशिगृहे तावन्तं वृत्तान्तमावेद्य कथमपि शरावार्द्धमितं तण्डुलं समासादय, एवमपि वत्सयोरनयोः प्राणान् धारयितुं शक्नुयाम ।

च्यवनः—ब्राह्मणि, न जानासि प्रतिवेशिनामत्रत्यानां हृदयं, येनैवं ब्रवीषि, तथाहि

बहुकृत्वः कृता भिक्षा मया तेषां समीपतः ।
श्रुता च परुषा वाणी या स्मृता दहतीव माम् ॥

र-माता—यद्येवं धनदत्तस्य वणिजः समीपं गत्वा नातिचिरं निर्यातनीयेन मूल्येन तण्डुलानेतावन्मितान् समानय ।

च्यवनः—ब्राह्मणि, प्रभूतमृणं तस्मात् पुरैव गृहीतवानस्मि, येन धनदत्तः साम्प्रतं मां समीक्ष्य दूरे तिष्ठति, नालापमपि कुरुते । किं बहुना कथञ्चिद्दर्शनपथं गतः परुषामपि वाणीं प्रयुङ्क्ते । ब्राह्मणि, अपराधो मे तस्माद् गृहीतपूर्वमृणं न निर्यातितमिति । तत्रैव पुनरपि ऋणार्थं गमनमुपदिशसि ? अथवा निष्फलमेव तत्र गमनमिति ।

आत्रेयः—नहि, नहि, तत्र ऋणार्थं न गन्तव्यम्, हीनः खल्वसौ ; कदाचित्तस्य पुत्रो मां दरिद्रपुत्र इत्युपहसितवान्, तत्र नानेन प्रतिषेधः कृतः,

परं स्मितेन पुत्राचरणस्य आनुकूल्यमेव प्रदर्शितम्। तत् तत्र न गन्तव्यम्।

च्यवनः—अहो तादृशीमवस्थां गतस्य बालस्यापि सत आत्रेयस्य अभिमानः! (प्रकाशम्) वत्स, स्थिरो भव, नाहं तत्र गमिष्यामि।

आत्रेयः—पितामह, कथमद्यापि तातो नागच्छति?

च्यवनः—अलमाशङ्कया, अचिरमागमिष्यति (स्वगतम्) रत्नाकरं प्रति भृशमभिशङ्कते मे हृदयम्। अपि नाम दारिद्र्यनिर्विण्णेन तेन न किञ्चिदत्याहितमाचरितं भवेत्? हा हतविधे, कियदपरं घटयिष्यसि? अथवा शान्तं पापं प्रतिहतममङ्गलं मे वत्सस्य!

र-माता—आर्यपुत्र, एवं गते न स्थैर्यं गन्तुमर्हामि, वत्से रत्नाकरे बहुलमाशङ्कते मे हृदयम्। तद् यदि नातिदुष्करं तदा कियद्दूरमनुसृत्य तत्त्वमवगन्तुमर्हसि।

च्यवनः—आं ममापि रत्नाकरे विविधमनिष्टमाशङ्कते चेतः! क्रमेण प्रदोषतमसा समं प्रवर्धते शङ्का। तत् किन्नु खलु करिष्ये। अनशनेन मानसवैक्लव्येन च सुदुर्वहान्यङ्गानि! तथापि नैवं शक्यमुपेक्षितुम्। हा विधे,

मा नाम ह्रियतामेष दरिद्राणां समाश्रयः।
हतेऽस्मिन्नेष दीनानां वर्गः सर्वो विनङ्क्ष्यति॥

ब्राह्मणि, दीयतां मे यष्टिका, यावत् पश्यामि।

र-माता—(यष्टिमुपनीय) एषा यष्टिका!

च्यवनः—(यष्टिमवलम्ब्य स्थितः) अहो स्थितस्यापि मे कम्पितौ चरणौ, कम्पते चायं हस्तः! तथापि प्रयत्नेन बहिः कियद्दूरं गत्वा वत्सं रत्नाकरमाकारयामि! (पदान्तरं गत्वा) ब्राह्मणि, ब्राह्मणि, एहि अवलम्बस्व मां! अवशानि मे अङ्गानि, घूर्णते शिरः! एषोऽहं नालमस्मि शरीरं धारयितुम्। (मूर्च्छितः पतति)

र-माता—हा आर्यपुत्र, समाश्वसिहि, हा आर्यपुत्र, ममैव मन्दभाग्यायाः प्रेरणया विपद्यसे ! हा हतास्मि मन्दभागिनी ।

र-पत्नी—हा तात, कथमेवं पतसि ?

आत्रेयः—हा पितामह, कथमेवमसि ? ( उत्थातुमिच्छन् मूर्च्छति )

र-पत्नी—हा हा ! वत्सो मे आत्रेयोऽपि मूर्च्छितः ! हा आर्यपुत्र, क्वासि, सत्वरमेहि, पश्य ते तातस्य आत्रेयस्य च विषमां दशाम् । हा ! हा !!

र-माता—अहह ! किं करोमि, विमूढास्मि, आर्यपुत्र, समाश्वसिहि, वत्से, स्नुषे, शीघ्रं सलिलमुपानय, यावद् एतौ उपचरामि ।

र-पत्नी—( सलिलमुपनीय ) इदं सलिलम् ।

र-माता—( उभौ यथाक्रमं सलिलेन उपचरति )

( ततः प्रविशति तण्डुलाद्युपकरणभारनम्रकायो रत्नाकरः )

रत्ना—अहो ! प्रथमेनानेन कठोरसाहसेन लज्जित इव संवृत्तोऽस्मि ! अपि कृतो मया कुशल एष समारम्भः ? अथवा सुदूरमतिक्रान्तोऽस्मि, नायं समयः शुभाशुभे विचारयितुम् ! यत् कृतं, सुष्ठु कृतम्, अयमेक-एव मे पन्थाः स्वजनसञ्जीवनाय । तदिदानीम्—

साहसैरेव लब्धेन द्रव्येण मुदितो भृशम् ।
पितरौ वनितां पुत्रं जीवयाम्यविलम्बितम् ।

वृत्तं भग्नं भज्यतां किन्ततो मे ?
प्राणा नष्टा दीनयोः किन्ततो मे ?

पित्रोः पत्न्याः पुत्रकस्यात्मनश्च
प्राणा लब्धा लाभ एष प्रकामम् ।

द्वयोर्जीवननाशेन बहूनां यदि जीवनम् ।
लोकतो धर्मतो वापि किमनिष्टं ततो मम ?

अथवा धर्म इति कल्पनामात्रसारं स्वार्थेषु प्रबुद्धानाम् ।

कुतः ?

तावत्कालं रक्षितो धर्ममार्गः
किं तस्मान्मे क्लेशहानिः प्रजाता ?
अस्मादूर्ध्वं धर्मसिद्धान्तवैरं
कृत्वा कृत्वा स्वामवस्थां परीक्षे ।

अये कथमेतावद्गभीरः प्रदोषान्धकारः ! ( दृष्ट्वा ) आं ! मेघैः संवृतमन्तरीक्षम् ! अहो सुमहदुपकृतं खलु गभीरान्धकारेण रत्नाकरस्य । कुतः ?

हत्वा शाकटिकं तथा धनपतिं द्रव्याणि हृत्वा तत-
श्चौराणां वसतिं समीक्ष्य निभृतामद्रौ च तैः पूजितः ।
स्कन्धेनापि वहन् बहूपकरणं मार्गं सशङ्कं श्रितः
प्राप्तोऽहं तमसैव संवृतवपुः पौरैरदृष्टः पुरम् ।

( वीरबलमुद्दिश्य ) सखे वीरबल, न जाने कीदृशस्त्वया सह मे जन्मान्तरीणः सम्बन्धः, येन स्वजनरक्षाया निरुपमं मार्गं प्रदर्शितवानसि । भवतु साम्प्रतं स्वजनानविलम्बितं पश्यामि, अपि नाम सर्वानेव कुशलिनः पश्येयम् ? ( परिक्रम्य दृष्ट्वा ) अये सर्व एवैते एकस्था दृश्यन्ते, अये किमिदम् ? जननी भूतले शयानं तातमुपचरति, प्रिया माधवी च तत्रैव शयानमात्रेयम् । मूढ रत्नाकर, अपि नाम विफलस्ते सर्वो महानारम्भः ? ( उपसृत्य ) हा तात ! हा आत्रेय ! हा मातः ! हा प्रिये माधवि ! ( भारं त्यक्त्वा उपसर्पति )

र-माता—वत्स, रत्नाकर, आगतोऽसि ? हा ! हा ! पश्य ते पितुः पुत्रस्य च समवस्थाम् ! आर्यपुत्र, उत्तिष्ठ, देहि प्रतिवचनम् । एष ते रत्नाकरः प्राप्तस्तं कथं न सम्भाषसे ? वत्स, आत्रेय, उत्तिष्ठ, तातं परिष्वजस्व ।

च्यवनः—ब्राह्मणि, रोदिषि ? मा भैषीः, न च्यवनो म्रियते ! क्व नु खलु रत्नाकरः ?

रत्ना—तात, एष ते सन्तापमात्रहेतुः पुत्रः पादयोः पतितोऽस्मि ।

आत्रेयः—तात, अपि आगतोऽसि ? तात, अपि प्राप्तानि भोज्यद्रव्याणि ? ( परिष्वजते )

रत्ना—वत्स, अथकिम् । ( अङ्के स्थापयति )

र-माता र-पत्नी च—अहो समुज्जीवितास्मि द्वयोरेव संज्ञालाभेन ।

च्यवनः—वत्स, रत्नाकर, अलमिदानीं वाचां प्रपञ्चेन । ( उपकरण-भारं दृष्ट्वा ) संक्षेपतः कथय, कुत एतानि प्रभूतभोज्यद्रव्याणि समासादितानि ?

रत्ना—( स्वगतम् ) किं सत्यं कथयामि ? अथवा एवं तावत् कथयामि ; तात,

अद्य केनापि मित्रेण सन्दृष्टेन कृपावता ।
अस्माकं रक्षिताः प्राणाः प्रभूतद्रव्यदायिना ।

सर्वे—अहो दैवानुबन्धः ! अहो तस्य महानुभावता !

च्यवनः—वत्स, क एष महानुभावो नाम, यं द्वारीकृत्य विधात्रा दरिद्रकुलमिदमनुगृहीतम् । अप्यसाविहैव प्रतिवसति ?

रत्ना—नहि, नहि, स खलु दूरे प्रतिवसति । महानुभावश्चासौ नास्माभिः स्वनाम कीर्त्यमानमिच्छति । तदलं तदीयनामश्रवणनिर्बन्धेन । परमद्य प्रभृति तमेतं महान्तमेव बान्धवं ज्ञातुमर्हसि ।

च्यवनः—अहो ! देवतास्तस्य सर्वतः स्वस्ति करिष्यन्ति । वत्से स्नुषे, अलमद्यापि कालहरणेन, सत्वरमेव महानसं गत्वा भोज्यं निष्पाद्य आदौ वत्सस्य आत्रेयस्य समुज्जीवनं कुर्वीथाः, रत्नाकरस्य विलम्बकारणादिकमतः परं यथावसरं श्रोतव्यम् ।

र-पत्नी—यथाज्ञापयति तातः । ( निष्क्रान्ता )

प्रथमाङ्कः समाप्तः

# द्वितीयाङ्कः

( ततः प्रविशति दण्डहस्तो रत्नाकरः )

रत्ना—अहो प्रसादः ! निःशेषमद्य निर्वासितं चिरसञ्चितं मनसो मालिन्यम् ! कुतः ?

द्वारे द्वारे प्रातरारभ्य पूर्वं
सायं यावत् पर्यटन् व्यर्थकामः ।
भाग्यात् स्वेषां मृत्युवक्त्रे स्थितानां
रक्षाकृत्ये शक्तिमाप्तः कथञ्चित् ॥

अपि च

दूरे कोमलवृत्तयः परिचिता निर्वासिता मानसाद्
धर्म्यं शास्त्रवचः प्रवञ्चनपरं निर्धारितं सर्वतः ।
वृत्तिः क्रूरतमा तमालमलिना सम्पूजिताऽर्घ्यादिभि-
र्हस्ते न्यस्तकुशे विशेषविधये दण्डः समारोपितः ॥

अहो, एतावतो दिवसान् प्राक्तनसंस्कारखलीकृतेन चेतसा विनयं सेवमानेन मया महदन्याय्यमनुष्ठितम्, येन किल तावान् दुःखभोगः समर्जितः ।

मिथ्यैव मुग्धजनता जननाय भूते-
र्धर्म्यान् विधीन् परिचरन्ति परानुगत्या ।
दृष्टं विहाय फलमत्र परत्र लोके
किं नाम संस्मरति हा मतिमानदृष्टम् ॥
व्यर्थं दैवतपूजनं हतफलं धर्माद् भयं देहिनां
सत्यं निष्फलतामुपैति परितः सत्रञ्च सापत्रपम् ।
यद् यत् पौरुषसञ्चितं निजहितं सत्यं तदेवोचितं
लुप्तं सन्तमसं क्षणेन हृदि मे विज्ञानदीपोदयात् ॥

तद् यावत् स्वल्पेनैव कालेन ममैवानुमतिमनुरुन्धानान् वीरपरीवारा-नाहूय स्वकीयं कृत्यविशेषमारम्भयामि ! तत् क नु खलु वीरबलः ? (स्मृत्वा) आं ! स खलु प्रेषितो मयैव पर्वतोपत्यकायां सन्निहितायां नवीनस्य रत्नपुरस्य नगरस्य संघटनाय। यतः प्रतिदिनमेव स्वल्पप्रयत्नमनुतिष्ठता-मपि दारिद्र्यपरिक्लिष्टैर्जानपदैरुपचीयते वर्गः, तदिदानीं नवीननगर-सन्निवेशमन्तरेण न शक्या स्ववर्गव्यवस्था साधयितुम्। भवतु शेषानामन्त्र्य कृत्यमारम्भयामि। ( वंशीं वादयति )

( ततः प्रविशन्ति दण्डहस्ताश्चत्वारः पुरुषाः )

१मः—जयति जयति स्वामी। समादिशतु कार्यम् !

रत्ना—आं प्रीतोऽस्मि, यथाकालं प्राप्ताः स्थ ! अपि पारयिष्यथ यदहं ब्रवीमि।

१मः—स्वामिन्, अस्यत्र प्रश्नावकाशः ? संरक्षिता वयं स्वामिना सपरिजना मृत्युमुखं प्रविशन्तः। तदिदं जीवनमपि प्रभोरायत्तं, का कथा शरीरस्य ? तदादिशतु स्वामी, येन तदादेशपरिपालनेन वयं कृतार्था भवामः।

सर्वे—कः सन्देहः ?

रत्ना—यद्येवं शृण्वन्तु भवन्तः, संप्रति हि—

दुर्भिक्षरक्षः परितो महाभयं<br>
व्यादाय वक्त्रं ग्रसते जनोच्चयान्।<br>
दिने दिने मृत्युमुखं विशन्त्यमी<br>
धनी जनो दुःखमिदं न बुध्यते॥

तद् वित्तवतामनिच्छतामपि वित्तानि यथा दरिद्रसेवायामुपयुज्येरन् तथास्माभिः करणीयम्। अस्ति किल युष्मच्छरीरे शौर्यम्, अस्ति चात्मनि भूयान् समुत्साहः। तदेवं स्वजनानां दुर्भिक्षदावानलेन दह्यमानानां दीनानाञ्च दुःखमौदासीन्येन कथम् उपेक्षणीयम्। उत्तिष्ठत, धनिकानां

धर्नं बलात्कारेण गृहीत्वा दुर्गतानां दुःखशतानि निर्वापयत। स्वजनानां मुखमालिन्यमपसारयत, स्वीयं जीवनं शान्तिमयं कुरुत।

गर्वं खर्वयत प्रभावजनितं वित्तेश्वराणां मुहुः
सर्वेषां समताऽस्तु भूमिवलये दैन्यं लयं गच्छतात्।
एको भूरिविलासभोगनिरतो भोज्यं विना चापरः
प्राणैरेव वियुज्यते, कथमिदं वैषम्यमालोक्यताम्।

सर्वे—सत्यमाह स्वामी। तदस्य प्रतीकारं वयं करिष्यामः॥

रत्ना—यद्येवं श्रूयताम्।

सर्वे—अवहिताः स्मः।

रत्ना—प्रतिदिनमेव वर्द्धते बलमस्माकम्। ये दुर्गताः स्वजन-पोषणाशक्ताः शक्तिमन्तः, ये वा दुरन्तवृत्तेन राज्ञा कामेश्वरेण निर्विचारं निगृहीताः, ते सर्व एव दारिद्र्यविद्रावणकामा वा वैरप्रतीकारवाञ्छया वा अस्मदीयं पक्षमस्मत्प्रयुक्तैरुपजापैरनुप्रविशन्ति, तदिदानीं यथा नवीन-नगरसन्निवेशस्तेषां वसतिसौकर्याय साधयितव्यस्तथैव प्रभूतधनसंग्रहोऽपि तेषां शरीरयात्रानिर्वहणाय कर्तव्यः।

सर्वे—आज्ञापयतु स्वामी।

रत्ना—यः किलास्य प्रान्तस्य महीपालः कामेश्वरो नाम, तस्य किल-

अत्याचारेण परितो दीना दुर्भिक्षपीडिताः।
अनिच्छन्त्यः प्रजा हन्त ग्रस्यन्ते मृत्युना पुरः॥

अपि च

दुरन्तशीलः स विलासहेतोः प्रभूतमर्थं क्षपयत्यजस्रम्।
दीनाय दानं न कपर्दकस्य विधित्सते हन्त वहन्नवज्ञाम्॥

तदादौ तस्यैव दुष्टभूपतेरभिग्रहं भवद्भिः क्रियमाणमिच्छामि।

सर्वे—युक्तम्! स्वामिन्, उपदिश्यतां कृत्यमार्गः!

रत्ना—श्येनक, त्वं सत्वरं गत्वा नवनगरसन्निवेशव्यापृतं वीरबलं

विज्ञापय,—यथा अद्यैव रात्रौ मया सह वीरबलाधिष्ठितैः कतिपयैः पुरुषैः कामेश्वरस्य दुष्टमहीपालस्य राजधानीप्राकारोपकण्ठे सन्निहितैर्भवितव्यम् ।

यूयमपि—

भाण्डागाराद् गृहीत्वा मितमुपकरणं स्वीयसंसारयोग्यं
गत्वा गेहं स्वकीयं शमयत सुहृदश्छादयित्वा स्वतथ्यम् ।
भूयः काले प्रदोषे गिरिगहनमिदं प्राप्य कृत्यं स्मरन्तः
सोत्साहं शौर्यराशिं प्रकटयत, शुभाः सन्तु वः कृत्यमार्गाः !

सर्वे—यथाज्ञापयति स्वामी ।

( निष्क्रान्ताः )

रत्ना—तद् यावदहमपि परममित्रेण कायस्थेन वसुदासेन सत्वरं कपटलेखं कारयित्वा कामेश्वरसकाशं प्रापयामि ।

( निष्क्रान्तः )

---

( ततः प्रविशति सविदूषकः कामेश्वरो विभवतः परीवाराश्च )

कामे—अहो, राज्यं नाम परमप्रमोदस्थानं राज्ञाम् !

भीत्या प्रजाभिः प्रतिपादितेन
स्वच्छन्दतोऽर्थेन भवन्ति भोगाः ।
ते ह्यन्यदोषं समुदाहरेयु-
स्तद्दोषमन्ये न हि वक्तुमर्हाः ॥

शास्त्रं तस्य कथामात्रं नीतिस्तस्यैव वासना ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ।

तदेवम्भूतस्य राजपदस्य सौभाग्यवशादुपात्तस्य स्वच्छन्दतो भोगमकुर्वाणः कथं तस्य निष्फलतां सम्पादयिष्यामि ? प्रजानां दैन्यादिकं विचारयतो राज्ञः स्वभोगपरिभ्रंशेन निष्फलतैव राज्याधिकारस्य ! आत्मन एव हि कामाय सर्वमिदं जगत् प्रियं भवति, न जातु कामाय परेषामिति

भगवती श्रुतिरपि साटोपमेव प्रतिपादयति। तदात्मसुखनिरपेक्षः कथं प्रजासुखमीक्षेय। ( प्रकाशम् ) आर्य वाचस्पते, कथ्यतामद्यतनं राजकार्यम्।

मन्त्री—देव, सन्ति कानिचित् प्रार्थनापत्राणि, तेषां विचारमादौ देवः कर्तुमर्हति।

राजा—प्रार्थनापत्राणि? केषां पुनस्तानि?

मन्त्री—कतिपयजानपदानाम्।

राजा—किमधिकृत्य?

मन्त्री—राजकोषादर्थप्राप्तिमधिकृत्य।

राजा—चित्रं भोः चित्रं! गरीयानेष कालमहिमा, यत् प्रजा दत्तापहार-दोषमविगणय्य राजकोषादर्थं कामयन्ते! तदार्य वाचस्पते, विज्ञाप्यन्तां जानपदाः—

दत्तापहारदोषस्य प्रजासु विनिवृत्तये।
राजकोषधनं राज्ञा प्रजाभ्यो नैव दीयते।

पश्य,—
राज्ञो राजेत्याख्यया किन्नु कृत्यं
कोषाद् वित्तं गृह्यते चेत् प्रजाभिः।
षष्ठं भागश्चापि राज्ञा गृहीतं
मोहाविष्टा हन्त नैताः सहन्ते।

मन्त्री—यथाज्ञापयति देवः।

( ततः प्रविशति सम्भ्रान्तः पुरुषः )

पुरुषः—जयति जयति महाराजः। महाराज, एष कश्चिद् ब्राह्मण उन्मत्तकल्पः श्रीमन्तं द्रष्टुमिच्छति, दौवारिकैरन्यैश्च मुहुः प्रतिषिध्यमानोऽपि न निवर्तते, श्रुत्वा देवः प्रमाणम्।

राजा—सर्वतः पुरुषैरधिष्ठितं प्रवेशय।

पुरुषः—यथादिशति स्वामी। ( निष्क्रान्तः )।

राजा—अहो! प्रत्यहमेवं जनपदानां कातरकोलाहलेन समुद्वेजितोऽस्मि।

आर्य वाचस्पते, इतो मुक्तेरुपायः परिचिन्त्यताम्। किं वात्र वसन्तको मन्यते ?

मन्त्री—देव, राजशरणा दीनप्रजाः कं वाऽन्यं शरणं व्रजन्तु, भवतु तथापि राजादेशादुपायं चिन्तयिष्यामि।

वसन्तकः—वयस्य, अहं मन्ये याचकानां विद्रावणाय कश्चित् पणः स्थापयितव्य इति।

राजा—कीदृशः पणः ?

वसन्तकः—अस्ति किल दुष्टतमानां दण्डविधानाय भवतः पञ्जरगतस्तीक्ष्णविषो भुजङ्गः।

राजा—किन्तेन ?

वसन्तकः—यस्तं विषधरं भुजङ्गं स्वकरेण गृह्णीयात्, स एव सत्यं दीनतया गृह्यमाणो राजकोषादर्थं लभेत।

राजा—यदि बहवस्तथैव कुर्य्युः, क्षीणस्तर्हि कोषः।

वसन्तकः—वयस्य, उन्मत्तोऽसि ? ननु नास्ति तादृशं दैन्यम्, येन स्वजीवनं तृणीकृत्य तदपनुत्तये भुजङ्गोऽपि शक्यः स्वेच्छया समाक्रमितुम्। तदेवं गतः कोलाहलो दीनानाम्।

मन्त्री—महाब्राह्मण, दैन्यस्य तत्त्वं नावगच्छसि, येनैवमविचारितं ब्रवीषि,

तथाहि—

यदा दैन्येनान्यं शरणमुपगच्छन्ति मनुजा
यदा स्वेषां प्राणान् कथमपि नवा रक्षितुमलम्।
तदा वह्निज्वाला ज्वलति शिरसि भ्रश्यति मति-
र्भुजङ्गः स्रग्भावं भजति यदि दैन्यक्षतिरतः॥

(ब्राह्मणेन सह प्रविश्य पुरुषः)

पुरुषः—अये, अद्यापि कथासक्तो देवः, तदवसरं प्रतिपालयामि।

मन्त्री—(दृष्ट्वा) देव, एष तेन ब्राह्मणेन सह प्रविष्टः पुरुषो देवस्यावसरं प्रतिपालयति। श्रुत्वा देवः प्रमाणम्।

राजा—उपसर्पतु ।

मन्त्री—अरे ! प्रविश ।

पुरुषः—एष देवस्तिष्ठति, तदुपसर्पतु भवान् । जयति जयति देवः, एष स ब्राह्मणः ।

ब्राह्मणः—अहो राजश्रीः !

गेहं मौक्तिकमालिकाद्युतिजुषा चन्द्रातपेनोज्ज्वलं
सौम्या चामरधारिणी कतिविधैः सम्भूषिता भूषणैः ।
एतत् काञ्चनदण्डमण्डितमितः सद्रत्नसिंहासनं
किं लोकान्तरमागतोऽस्मि, किमथो स्वाप्नश्रियं लोकये ॥

अपि नाम एष एव नो दुर्भिक्षराक्षसनिगृहीतानां दीनजानपदानां पालको राजा ? नैवं विश्वसितुमर्हामि,

कुतः ? प्रजानां ग्रसते यत्र प्राणान् दुर्भिक्षमन्वहम् ।
तस्य राज्यस्य राजासौ विलासेन प्रवर्द्धते ॥

यथा तथा वा भवतु, प्रस्तुतमिदानीमनुसरामि । ( प्रकाशं ) देव,

राजा—अये, जयशब्दमनुच्चार्य प्रथमत एव देवेत्यामन्त्रणं न प्रजासमुदाचारः ! अथवा उन्मत्तः खल्वेषः !

ब्राह्मणः—( स्वगतम् ) अहो राजगर्वः (प्रकाशम्) आं ! देव, सत्यमुन्मत्तीकृतः समुदाचारं विस्मृतवानस्मि ।

राजा—केनैवमुन्मत्तीकृतोऽसि ?

ब्राह्मणः—देव, दारिद्र्यपिशाचेन ।

राजा—तत् को भवान् ?

ब्राह्मणः—महाराजेन समधिष्ठितस्य विष्णुपुरपत्तनस्य काश्यपे कुले जातः सुतपा नाम ब्राह्मणः ।

राजा—अस्ति ते माता पिता च ?

ब्राह्मणः—आं ! देव, इयमेवेदमासीत् ।

राजा—अथ साम्प्रतम् क ?

ब्राह्मणः— साम्प्रतं देव, द्वावेव तौ मन्दभाग्यस्य दारिद्र्यदूषितस्य मे भोज्यनिष्पादनशक्तिविरहेणैव —

क्षुधया परिशीर्णविग्रहौ शमनेनाधिकृतौ दिवं गतौ।
अधुनापि दहत्यहर्निशं हृदयं लोहमयं हि तत्स्मृतिः॥

राजा—अस्त्यपरः कोऽपि ?

ब्राह्मणः—देव, देव, ( रोदिति )।

राजा—अलमनेन रोदनेन, वक्तव्यं ब्रूहि।

ब्राह्मणः—देव, देव, अत एव भवन्तं प्रपन्नोऽस्मि

राजा—विदितमेवेदं, तद् विशेषं ब्रूहि।

ब्राह्मणः—देव, अस्त्येवाद्यापि मे मन्दभाग्यस्य पतिव्रता पत्नी वत्सलः शिशुः पुत्रश्च।

वसन्तकः—पतिव्रतेति वाङ्मात्रमेतत् !

ब्राह्मणः—कथमिव ?

वसन्तकः—स्त्रीणां पातिव्रत्यं स्वर्णकाराणां चौर्यविमुखता च इत्येतदुभयमेव नः समं प्रतिभाति।

ब्राह्मणः—धिक् प्रहसनम्! मूढ, ब्राह्मण, स्त्रीणां गौरवं न वेत्सि, येनैवं परिहासकृते महापातके पतन्तमात्मानं न रुणत्सि। मूढ,—

स्त्री मातृरूपा स्तनदुग्धदायिनी
सर्वं जगत् पाति शुभानुकम्पया।
भक्त्या स्त्रियो यत्र भवन्ति पूजिताः
सर्वे सुरास्तत्र वहन्ति तुष्टताम्॥
श्रुत्वा पत्युः शङ्करस्यापवादं
दाक्षायण्या जीवनं त्यक्तमारात्।
कत्येवान्याः स्वामिशोकान्म्रियन्ते
पातिव्रत्यं नास्ति तासां तथापि ?

तदेवंवादिनी जिह्वा तव च्छेदनमर्हति ।
नूनं राज्ञा सखित्वेन पातकी नैव दण्ड्यसे ॥

राजा—ब्राह्मण, संयमः परिपाल्यताम् । प्रस्तूयतां शेषः । वयस्य, अलं परिहासभाषितैरन्यथा वा अन्तरा प्रतिबन्धेन । ब्राह्मण, ज्ञायते, अस्ति ते पतिव्रता पत्नी वत्सलः शिशुः पुत्रश्चेति । किं तयोः ?

ब्राह्मणः—देव, किं कथयामि, वदतो मे दीर्यत इव हृदयं ! तावपि क्षणादुत्तरमसन्ताविव पश्यामि ।

राजा—कथमिव ?

ब्राह्मणः—देव, तावपि मन्दभाग्यस्य ममैवाधन्यतया राजयक्ष्मणा समाक्रान्तौ ।

सर्वे—आं ! राजयक्ष्मणा समाक्रान्तौ ? धिक् कष्टम् !

राजा—तत् किमिति राजसभामुपगतोऽसि । वैद्यं पश्य, येन रोगानुरूपं भेषजमुपदेष्टव्यम् ।

ब्राह्मणः—देव, कृतं तत् ।

राजा—अपि तेन दत्ता जीवनाशा ?

ब्राह्मणः—अथ किम् । उक्तं तेन 'अस्ति मणिसुवर्णादिघटितमहार्घभेषजप्रयोगेण बलाधायकविविधखाद्यविनियोगेन च उभयोरेव जीवनाशा' इति ।

राजा—तत् कृतमाकुलतया, एवं क्रियताम् ।

ब्राह्मणः—देव, देव, यस्य मम दीनाधमस्य पत्नी पुत्रश्च भृशमनशनेन क्लिश्यमानौ राजयक्ष्मणा समाक्रान्तौ, यस्य मे नास्ति तयोरशननिष्पादनसामर्थ्यमपि, सोऽहं कथमिव नानाविधमणिसुवर्णादिघटितमौषधं बलाधायकं प्रभूतक्षीरनवनीताद्याहारं वा निष्पादयेयम् । देव, अशरणोऽस्मि ! मम पत्न्याः पुत्रस्य च अचिरं सम्भाव्यमानया विपदा पर्याकुलोऽहम् उन्मत्त इव प्रतीकाराय भवन्तं प्राप्तोऽस्मि । तत् प्रसीद, परिपालय मम पत्नीसुतप्राणोपहारेण ममापि दरिद्रस्य ब्राह्मणस्य प्राणान् ।

राजा—आं ! श्रुतम् ! अप्यस्ति ते वाक्यशेषः ?

ब्राह्मणः—देव, अनशनेन तातः पञ्चत्वं गतः, माता मृता, पत्नी सुतश्च चरमं निश्वासं मुञ्चतः, इतोऽपि शेषापेक्षा ? अथवा

एतयोर्यदि न प्राणा रक्षिताः स्युस्त्वया नृप !
प्राणानेष विहास्यामि तच्छेषं वचनस्य मे ॥

राजा—ब्राह्मण, अपि नियमेन दत्तस्त्वया राजकरः ?

मन्त्री—( स्वगतम् ) अहो स्वामिनो नैष्ठुर्यम् ?

ब्राह्मणः—कुतः खलु मे दारिद्र्यपीडितस्य राजकरप्रदानसामर्थ्यम् ?

राजा—मूढ, ब्राह्मण, अनिष्पादितराजकरोऽपि राजानमलज्जः प्रार्थयसे ? अहो धिक् साहसम् !

ब्राह्मणः—देव, प्रसीद, विषमविपत्पातपर्याकुलाय मे न कोपं कर्तुमर्हसि । तदनुकम्पस्व माम् ।

राजा—अहो, निर्लज्जता ! नह्यनुकम्पामात्रं जीवनं राज्ञाम् ।

ब्राह्मणः—देव, दीनानुकम्पिनस्ते देवताः प्रसीदेयुः ।

राजा—अलमनर्थेनाक्रोशनेन ! नियतकरनिष्पादनमन्तरेण नास्ति ते मोक्षः । अरे रक्षिणः पुरुषाः ! तावदेष कारागारे रक्ष्यतां, यावदनेन राजकरो न प्रतिपाद्यते ।

रक्षिणः—यथाज्ञापयति स्वामी ।

ब्राह्मणः—अये भिक्षां भिक्षितेनानेन भिक्षामदत्त्वा कुक्कुरः प्रधावितः । राजन ! अप्येष राजधर्मः ?

राजा—निर्मर्याद, अलमेवं वाक्प्रपञ्चेन दण्डमानं वर्द्धयित्वा, संयतो भव । अरे राजपुरुषाः ! कि कुरुथ ? शीघ्रमेनं—

कारागारे तमश्छन्ने शतकीटनिषेविते ।
विना पानं विना भोज्यं स्थापयध्वं स्वभूतये ॥

तत् किं निमेषमपि यापयथ ?

रक्षिणः—यथाज्ञापयति देवः ! ( ब्राह्मणं निगडेन बध्नन्ति )

ब्राह्मणः—महाराज, इतोऽपि तीक्ष्णतरं मे दण्डं धारय, नास्ति ततोऽपि मे भीतिः, किन्तु तथा कुरुष्व, यथा मम दीनाधमस्य प्राणसंशये पतितौ पत्नीसुतौ नैव जीवनेन विमुच्येते! महाराज, एष ते पादयोः पतामि। पश्यतु देवः—

प्रजानां पालको राजा पितुरप्यधिको मतः।
तस्य प्रजासु नैष्ठुर्ये कस्तासां रक्षको भवेत्?

राजा—धिक् चापलम्! न हि राजधर्मोपदेशाय भवानाहूतः। तदलमनेन प्रपञ्चेन। सम्प्रति स्वकर्मार्जितं फलमनुवर्त्तस्व।

ब्राह्मणः—महाराज, अद्यापि विचारय राजधर्मम्। एवं नयातिक्रमं प्रत्यक्षमीक्षमाणा देवा नूनं न सहिष्यन्ते।

राजा—अहो, अविधेयता रक्षिणाम्!

रक्षिणः—अरे! एहि (आकर्षन्ति)

ब्राह्मणः—(साक्रोशम्) भो राजन्,

यदि त्रिसन्ध्यं नियमेन तेजो
ध्यातं मया तत् सवितुर्वरेण्यम्।
तदा विधिस्तत्प्रभवात् प्रभावात्
कर्त्ता विचारं तव कृत्यराशेः।

अपि च—

विधानेन तवानेन पत्नी पुत्रश्च मे यदि।
जीवनेन वियुज्येते तत्त्वं सर्वं विनङ्क्ष्यसि।

सर्वे—शान्तं पापं प्रतिहतममङ्गलं महाराजस्य!

राजा—अहो, साहसम्! अरे राजपुरुषाः! शीघ्रमस्मात् प्रदेशादपसार्य ताडनेनास्य वाचं स्तम्भयत, यावदतः परमपि नायं मोहादपभाषेत।

रक्षिणः—एहि रे एहि। (ताडयन्ति)

ब्राह्मणः—एष आगच्छामि। (रक्षिभिः सह प्रस्थितः)

राजा—आर्य वाचस्पते, नूनमेष उन्मत्त एव।

मन्त्री—एवं किल स्यात् ।

वसन्तकः—वयस्य, एष उन्मत्तो वा रुद्राक्षो वा स्वयं रुद्रो वा भवतु । तथापि नाहमेतस्य तेजः सोढुमर्हामि । अहं पुनस्तदा अचिन्तयं, यथा अनेन बहुलग्रन्थिककर्कशेन दण्डकाष्ठेन दुष्टवटुकस्य मस्तकं भङ्क्त्वा दुःशीलतामस्य प्रशमं नयामीति । ( नेपथ्याभिमुखे दण्डं दर्शयति )

राजा—भवतु वयस्य, अलमिदानीमतिक्रान्ते आक्रोशेन । आर्य वाचस्पते, विक्षिप्तोऽस्मि अनेन व्यापारेण, तदिहैव राजकार्यं समाप्य सर्वान् पारिषदान् विसर्जयतु, भवानपि यथाकामं श्रान्तिं विनोदयतु ।

सर्वे—यथाज्ञापयति स्वामी । ( विभवतः परीवारान् राजवसन्तकौ च विना सर्वे निष्क्रान्ताः ) ।

राजा—वयस्य, कथय केन साम्प्रतं चित्तनिर्वृतिमासादयामि, अचिन्तितोपनतेन दुष्टब्राह्मणवृत्तान्तेन सुतरां विक्षिप्तान्तःकरणोऽस्मि । तथाहि—

उन्मत्ततैव तस्याद्य जीवनं पर्यपालयत् ।
कामेश्वरविरोधेन कोऽन्यथा वक्ति तादृशम् ।

वसन्तकः—वयस्य, त्वं ननु सहिष्णुरेवासि ।

राजा—भवतु, अलं पुनरनेन विक्षेपहेतुना स्मृतेन । साम्प्रतं चित्तनिर्वृतेरुपायमेव चिन्तय ।

वसन्तकः—वयस्य, किमेवं चित्तनिर्वृतये चिन्तां वहसि, एहि साम्प्रतमेव विविधपानभोजनजुष्टं भोजनगृहं प्रविश्य चित्तं निर्वर्त्तयावः ।

राजा—वयस्य, नेदमिदानीं रोचते ।

वसन्तक—(विचिन्त्य) तर्हि चतुरङ्गक्रीडाकौतुकेनात्मानं विनोदय ।

राजा—नेदमिदानीं रोचते ।

वसन्तकः—( विचिन्त्य ) जनकोलाहलशून्ये श्यामलारण्ये प्रविश्य मृगयाव्यापारेण चित्तं निर्वर्त्तय ।

जारा—नेदमिदानीं रोचते ।

वसन्तकः—(विचिन्त्य) तर्हि पुष्पवाटिकायाः प्रमोदोद्याने मौक्तिकसरः-सोपानमधिष्ठाय मरालमिथुनक्रीडां पश्य ।

राजा—नेदमपीदानीं रोचते, परं सन्निहितोऽसि ।

वसन्तकः—( सप्रतिभहर्षम् ) आं ! ज्ञातम् ! एवन्तर्हि तत्रैव मौक्तिक-सरसो नातिदूरवर्त्तिनि माधवीकुञ्जे ललितलावण्यायाः ससखीजनाया लीलावत्या नित्यरमणीयाभ्यां नृत्यगीताभ्यामेव निर्वृतिं लभस्व ।

राजा—आं ! इदमिदानीं मे दृढं रोचते । तद्वयस्य, त्वरितं पुष्पवाटिकायामेव प्रविशावः ।

वसन्तकः—भोः सुतरां विस्मितोऽस्मि तवानेन व्यवसायेन ।

राजा—वयस्य, कथमिव ?

वसन्तकः—यत् सर्वानेव विनोदनोपायानेकान्ततो दूरे वर्जयित्वा तस्यां लीलावत्यामेव स्थापितो महिमा । तत् किन्नु खलु इदम् ?

राजा—वयस्य, न ममैव नेत्राभ्यां लीलावतीं दृष्टवानसि, येनैवं ब्रवीषि ! तथाहि—

सा कल्पनाकलितकोमलसर्वदेहा
धात्रा कृता निखिलसुन्दरवस्तुसारैः ।
शिल्पैरनल्पललितैरपि नृत्यगीतैः
स्वर्णाम्बुजे सुरभिता विहिता विविक्ता ।

वसन्तकः—वयस्य, सर्वदा त्वमेवं वदसि, मम तु सा नैवंविधा प्रतिभाति, येन तामेव सर्वान्तःपुरवनिताभ्यः प्रशस्तां मत्वा तत्रैव सर्वं हृदयं समर्पयितुं शक्यते ! अथ वयस्य, कथं नु सा विप्रदुहितापि भवतो हस्त-गता इति विशेषतः श्रोतुमिच्छामि ।

राजा—वयस्य, श्रूयताम्,—अस्ति तावदस्यैव नगरस्य पर्यन्ते वनोप-कण्ठे ब्राह्मणपल्ली । तत्रैव केशवदासनाम्नः कस्यचिद् ब्राह्मणस्येयं मृतमातृका दुहिता लीलावती नाम । मया कदाचित् मृगयार्थं वनोपकण्ठमासाद्य एषा पुष्पचयनव्यापृता एकाकिनी गायन्ती विलोकिता । दृष्ट्वैव तदा

तामनिन्द्यसुन्दरीं श्रुत्वा चास्याः सुललितं सङ्गीतं सहसैव कन्दर्पेण वशीकृतोऽभूवम्, सापि मदीयतुरङ्गमपदशब्देन परावृत्तवदना मामालोकयन्ती तथैवात्मानं भावपर्याकुलं प्रत्याय्य प्रथममनोविकारप्रच्छादनकामनयेव सन्निहितं स्वमावासं प्रति प्रातिष्ठत ।

वसन्तकः—ततस्ततः ?

राजा—ततश्चाहं—तया सह गतं चित्तं तत्रैव प्रतिपालयन् ।
सुदीर्घं समयं मोहाद् व्यतीतं नावबुद्धवान् ॥

वसन्तकः—ततस्ततः ?

राजा—ततश्च मृगयासन्निवृत्तेन परिजनवर्गेण प्रबोधितः कस्माच्चन प्रतिवेशिपुरुषात्तत्परिचयं संगृह्य भग्नहृदयः पुरे प्रत्यावृत्तोऽभूवम् ।

वसन्तकः—कीदृशोऽस्याः परिचयः, येन परिचयलाभानन्तरं हृदयभङ्गः ?

राजा—एषा सा केशवदासस्य मृतमातृका दुहिता बालविधवा चेति ।

वसन्तकः—धिक् कष्टम् ! ततस्ततः ?

राजा—वयस्य, किं कथयामि, सर्वं प्रतिषेधमतिक्रम्य तथा प्रज्वलितस्तामधिकृत्य मे कामहुताशनो येन प्रत्यहमेव तादृशे काले तस्या दर्शनार्थं तत्र गमनव्यापृतोऽभूवम् । अथ तृतीय एव दिवसे तामपि सुतरां कामगृहीतामालोक्य तया सह प्रीत्या रहः सङ्गतोऽभवम् ।

वसन्तकः—ततस्ततः ?

राजा—ततः कथमपि गृहीतवृत्तः केशवदासो यावदेव दुहितरं दृष्टिपथाद् बहिर्गच्छन्तीं नानुमेने, तावदेवाहमेकदा गुप्तघातकेन तं घातयित्वा जनानामजानतामेव लीलावतीं गृहीत्वा नवीनपुष्पवाटिकायां रहस्यं स्थापयित्वा समुचितवयोरूपरमणीयाभिः सखीभिः परिवार्य नृत्यगीतकलाशिक्षणाय कस्यचिन्निपुणस्य कलाविदः करे तां न्यस्तवानस्मि । अथ तेन शिल्पिना विहितोपदेशाया तया स्वल्पेनैव कालेन स्वां निपुणतां प्रकटय्य विस्मयं नीता वयमिति साम्प्रतमुपदेशको विसृष्टः ।

वसन्तकः—अथ वयस्य, एवं किल कन्यापहारिणं त्वां कथं जानपदा नोत्प्रेक्षितवन्तः ? अथवा उत्प्रेक्षमाणा अपि कथमुपेक्षितवन्तः ?

राजा—वयस्य, अनुपेक्षमाणाः किं वा कुर्वन्तु, राजशक्तिरनभिभाव्या भवति। तथापि मया शान्तिसंरक्षणाय तेभ्यो ज्ञातवृत्तेभ्यः सुमहानर्थराशिर्विसृष्टः। तत एव सर्वथा शान्तिः !

वसन्तकः—अहो, सर्वमेव साध्यमर्थस्य !

राजा—वयस्य, लीलावतीवृत्तान्तेनानेन सुतरामुत्कण्ठितो नालमस्मि क्षणमपीदानीं तद्दर्शनदुःखमनुभवितुम्। तदेहि, यावत्तत्रैव पुष्पवाटिकायां गत्वा प्राणाधिकां प्रियां पश्यन्नात्मनो निर्वृतिं निर्वर्त्तयामि।

वसन्तकः—भो वयस्य, दूरमधिरूढः सविता, तदद्यापि पानभोजनविरहेण खिन्नोऽस्मि, तदस्य कष्टस्य प्रतीकारं कृत्वा अनन्तरमेव तत्र गमनमुचितं पश्यामि।

राजा—अलं चिन्तया, तत्र गत्वैव प्रबन्धं करिष्यामि।

वसन्तकः—का वा दीनस्य मे गतिः ? ( निष्क्रान्तौ )।

( ततः प्रविशति पुष्पवाटिकायां ससखीजना लीलावती )

लीला—हञ्जे, यूथिके, अपनय प्रसाधनोपकरणानि, अद्य नात्मानं प्रसाधयिष्यामि।

यूथिका—सखि, कथमिव ?

लीला—हञ्जे, किं वा मया प्रसाधितया, यस्या एतावतापि समयेन प्रियो नायाति ?

यूथिका—सखि, लीलावति, किमेवमभिमानं वहसि, भर्त्ता खलु राजा, तस्य कार्यान्तरमपि नातिक्रमणीयम् !

लीला—यूथिके, कीदृशं तत् कार्यान्तरं, येन प्रियजनो न दृश्यते।

यूथिका—सखि, राजकार्यं किल तत् ! सखि, राजैव शुभाशुभयोः प्रतिभूः प्रकृतीनाम्, यद्यसौ राजकार्यमनपेक्ष्य माध्यस्थ्यमवलम्बते, तदा महानेव विपत्पातः प्रजानाम् !

लीला—मूढे न जानासि। आदौ कामपरिभाविना रूपेण मामेवमवशीकृत्य नूनं साम्प्रतमन्तःपुरिकागृहीतचेताः शठोऽसौ माध्यस्थ्यमवलम्बते, न राजकार्यपारतन्त्र्येण।

यूथिका—सखि, मा मैवम्, भर्त्तारमधिकृत्य नैवं सम्भावयितुमर्हसि।

लीला—कथमिव?

यूथिका—तदिदं स्वयमपि जानास्येव, तथापि किमिति प्रबुद्धाऽपि सुप्तिमभिनयसि।

लीला—न जानामि, तत् कथय।

यूथिका—सखि, अपि नाम दृष्टं त्वया तस्य राजकार्यान्तरालेऽपि लब्धावसरस्य त्वामदृष्ट्वा माध्यस्थ्येन समवस्थानम्? त्वदर्थमेव परिकल्पितायामस्यामेव पुष्पवाटिकायामवसरे विश्राम्यति, निशां यापयति, जलक्रीडामारचयति, त्वयैव साकं प्रमोदनिर्भरेण मनसा माधवीकुञ्जे परिभ्रमति, सङ्गीतकलामासेवते, तव वदने स्मितलेशमपि वीक्षमाणः स्वर्गसुधामहावारिधिमवगाहते, तव मुखे कारणान्तरेण समुपजातं मालिन्यं दृष्ट्वा च सर्वमेवेदं चराचरमन्धकारमयं दुःखमयं पापमयं वह्निज्वालाजटिलञ्च पर्यालोकते। त्वामेव शुभाशुभे प्रमाणं गणयति। प्राणैः पणैरपि तवैव प्रीतिमुत्पादयितुं प्रयतते। सखि, एवंविधेऽपि राजनि मा अविश्वासिनी भूः।

लीला—आम् एवम्! तथापि प्रतिक्षणं तत्प्रेमविपर्ययशङ्कया व्याकुलीभवामि। हञ्जे, यूथिके, कथय कदा स समागमिष्यति?

यूथिका—सखि, अलं वैक्लव्येन, नूनमिदानीमेव भर्त्तारं द्रक्ष्यसि!

लीला—तद् यावदसौ नागच्छति, तावदेकां प्रेमगीतिकां चिन्तयामि (गीतिकां चिन्तयति)।

यूथिका—अहमपि लब्धावकाशा तव केशप्रसाधनं करोमि (केशप्रसाधनं करोति)।

( ततः प्रविशति स-वसन्तको राजा )

वसन्तकः—भो वयस्य, एषा सा पुष्पवाटिका, तदेहि प्रविशावः ।

राजा—अहो रामणीयकं पुष्पवाटिकायाः !

एषा पुष्पनिलीनभृङ्गनिचया वल्ली स्थिता तोरणे
वातोद्वर्तितपल्लवा सविनया सम्भाषमाणेव माम् ।
प्रत्युद्गच्छति पुष्पवृष्टिभिरलं सम्पूजयन्ती तथा
चित्रं चेतनकृत्यमद्य कुरुते निश्चेतना वल्लरी ।

तद् यावत् प्रविशामि । ( उभौ प्रविशतः ) ।

वसन्तकः—भो वयस्य, एतत् पन्थानमुभयतः स्थितमशोकलतायुगलमालोकय । अहो लोकोत्तरं लावण्यमशोकस्य !

राजा—वयस्य, पश्यामि,

एषा प्रसूनस्तनभारनम्रा सुश्यामलाशोकलता सुरक्ता ।
ततेव कान्ता तरुणी मनो मे विदूनमेतद् विदधाति शान्तम् ॥

वसन्तकः—भो वयस्य, इतोऽपि पश्य, एषा कुरुवकश्रेणी इयं वकुलश्रेणी, इमे नवकिशलयरमनीया रसालपादपाः, इमाश्च विविधप्रसूनसमलङ्कृता वल्लर्यः ! नूनमिदं नन्दनादप्यधिकमानन्दनं मे प्रतिभाति ।

राजा—वयस्य, युक्तं ते प्रतिभाति, तथाहि

पुष्पाण्यसंख्यानि कसन्ति नन्दने
सुराङ्गनाश्चापि लसन्ति नन्दने ।
अनुत्तमा सृष्टिरसौ प्रजापतेः
लीलावती तत्र परं न राजते ॥

तत् क नु साम्प्रतं लीलावतीं प्रेक्षिष्ये ?

वसन्तकः—( परिक्रम्य दृष्ट्वा ) भो ! वयस्य, दिष्ट्या वर्द्धसे ।

राजा—कथमिव ?

वसन्तकः—एषा ससखीजना लीलावती प्रसाध्यमाना किमपि चिन्तयन्ती माधवीकुञ्जमधितिष्ठति, तदेहि ।

यूथिका—सखि, अपि चिन्तिता गीतिका ?

लीला—अथ किम्।

राजा—वयस्य, गीतं प्रवर्तते, तत् क्षणं प्रतिपाल्य प्रविशावः।

(अन्तराले तिष्ठतः)

यूथिका—तदिदानीं स्वरसंयोगेन गीयताम्, येन शब्दगुणकमाकाशमयं श्रोत्रं सार्थकगुणं सम्पद्येत।

लीला—त्वमपि वीणातन्त्रीं परिवर्त्तय, येन झङ्कारः समलङ्कारो भविता।

यूथिका—यथाज्ञापयति प्रियसखी (वीणां गृहीत्वा वादयति)।

लीला—(गायति)—

(गीतम्)

वसन्तकं वीक्ष्य मनो मम हि चञ्चलम्।
सहते नहि पिकरुतमिह कुसुमकोमलम्॥
एहि दयित मानसे चिरसञ्चिततामसे।
दूरे कथमसि निष्ठुर वितनु मङ्गलम्॥
मनसिजशरताडिता क नु गच्छतु बाधिता।
करुणा तव दीनशरण परमसम्बलम्॥

वसन्तकः—अब्रह्मण्यं भो अब्रह्मण्यम्! (सहसा लीलावतीमुपसृत्य) भद्रे लीलावति, एष दरिद्रब्राह्मणः पादयोस्ते पतति, अनुकम्प्यतामयं वराकः, एष राजा मे प्रियवयस्यो वर्तते, अस्मिन्नेव ते देवताजनदुर्लभं प्रेमाणमावर्जय, एष पुनर्दीनो ब्राह्मणबन्धुरेकस्या एव प्रणयेन तथा संवृत्तो यथा स्मर्तुमपि नालमन्यस्याः प्रणयस्य! यदि सा चण्डी लेशतोऽपि वृत्तमिदं जानीयात्, तदा श्मश्रूणि कुन्तलाश्च मे निरन्वयं विनाशं गच्छेयुः। तदनुकम्प्यतामेष तपस्वी।

यूथिका—अये, वयस्यो वसन्तकः! (दृष्ट्वा) अहो, दूरे भर्तापि! सखि दिष्ट्या वर्द्धसे! एष वयस्यो वसन्तकः, अदूरे भर्ता च।

लीला—कथं महाराजः ! तत् कथमेवं वसन्तकः क्रोशतीति नावधारयामि ।

राजा—(स्वगतम्) अहो मुग्धता वसन्तकस्य ! प्रियया लीलावत्या वसन्तमृतुमधिकृत्य कृतेऽपि सङ्गीते स्वनाम्ना भ्रान्तः क्रोशति । भवत्वेवं तावत् । (प्रकाशम्) वयस्य, अप्येतन्निदर्शनं भवतो बाल्यतः प्रभृति निरूढस्य वयस्यभावस्य ? धिग् वञ्चितोऽस्मि चिरं कपटपटुना पयोमुखेनेव विषकुम्भेनानेन !

वसन्तकः—भो वयस्य, प्रसीद, प्रसीद, एषोऽहं पवित्रसूत्रं स्पृष्ट्वा शपे, नाहमस्य प्रेमवृत्तस्य कथामपि जानामि ।

लीला—आम् ! वसन्तक इति नाम्नैव वयस्यो भ्रान्तः ! अहो समुज्जीवितास्मि ! राज्ञो वचनादहमपि तदा भीता संवृत्तास्मि ।

राजा—कः प्रत्ययः ?

वसन्तकः—पृच्छ्यतामेषा लीलावती कदापि मम मर्यादातिक्रमं दृष्टवती न वेति ?

राजा—भोः कापटिक ! चौरव्यवहारे चौरान्तरस्य साक्षितां न खल्वर्थशास्त्रमनुमन्यते ।

वसन्तकः—हा हतोऽस्मि, तत् को वा अपरो मम निर्दोषतायां साक्षी भविष्यति, हा हा हतोऽस्मि । हा ब्राह्मणि ( रोदिति ) ।

राजा—अहो महद् वैक्लव्यं गतो मे प्रियवयस्यः, तदस्य सत्येन शान्तिमुत्पादयामि । ( प्रकाशम् ) भो वयस्य, भ्रान्तिमुपगतोऽसि ।

वसन्तकः—( सरोदनम् ) कथमिव ?

राजा—एषा सङ्गीतं कुर्वती लीलावती वसन्तमृतुमधिकृत्य वसन्तक इत्याह, न तु वसन्तकं मे प्रियवयस्यम्, तदलं वैक्लव्येन । कौतुकेन च मृषैव मया दूषितोऽसि ।

लीला—सुतराम् ऋजुक एष ब्राह्मणः ।

वसन्तकः—आम् एवम् ? अहो निर्वृतोऽस्मि, अपगतो मे शीर्षात्

सुमहान् पर्वतभारः। तदिदानीं लीलावत्याः सुधास्यन्दिना सङ्गीतेन स्मृतेन परं सन्तोषमुपलभे।

राजा—प्रिये लीलावति, किमिदानीं तूष्णीम्भवसि ?

सङ्गीतेन सुधारसेन सुचिरादाप्लावयन्ती नभः
शान्तिं कामपि दैवताभिलषितां सम्पादयस्वान्तरे।
नृत्येनापि विलक्षणेन नयनं सम्प्रीणयस्वाञ्जसा
लज्जानम्रमुखं त्वया जितगुणा देवाङ्गना वृण्वताम्॥

लीला—शठ, अलमेतेन कपटप्रणयनिवेदनलाघवेनाबलामिमां वञ्चयित्वा। गच्छ तस्या एव सङ्गीतश्रवणाय, या किल तावत्कालं समाराधिता।

राजा—प्रिये, किमेवं वदसि ?

त्वं जीवितं मम कथं कुपितासि तन्वि
प्राणांस्त्वदेकशरणान् परिरक्ष तुष्टा।
का वाऽपरा प्रणयिनी भवतीं विना मे
यस्या भ्रमे निपतितासि शुभे प्रसीद।

तदिदानीम्—मानं जहीहि कुरु कोमलदृष्टिपातं
प्रेम्णा समेत्य कृपया सुपरिष्वजस्व।
विच्छेददावदहनेन सुदीर्घकालं
दग्धं मनो मम शर्म प्रतियातु दिष्ट्या।

वसन्तकः—भद्रे, उपसर्प, स्वेच्छया करोपनतः स्वर्गो न हातव्यः। हा हा कियता भाग्येन स्त्री भवति ?

राजा—वयस्य, ननु लीलावती भवतीति वक्तव्यम्।

वसन्तकः—आम् एवम्।

यूथिका—अहो भर्तुः सख्यां मे अनुरागविशेषः! सखि, नातः परमपि मानं कर्तुमर्हसि। तत् प्रसीद।

लीला—अहो, बलात्कारेण मानं प्रदर्शयन्ती नातः परमपि मानं रक्षितुमर्हामि। तदेवं तावत् कथयिष्ये। (प्रकाशम्) यूथिके, अथ यदि राज्ञो

मयि न कपटप्रणयस्तव कुतोऽन्यथा स मे हीरकहारो यमसौ पूर्वस्मिन् पञ्चमदिवसे मया याचितः ?

राजा—आम् ! ज्ञातम् ! अत एवायमभिमानः ! प्रिये, मानं जहीहि, अद्यैवायम्प्रियायाः कण्ठसङ्गेन स्वं वर्द्धयिष्यति ।

लीला—अहो प्रीतास्मि, हृदयेश्वर, दासीमिमां क्षन्तुमर्हसि, एषाहमपराद्धा प्रणिपातेन भवन्तं प्रसादयामि ( प्रणमति ) ।

राजा—न भूमिपातस्तव युज्यते प्रिये तवासनं योग्यमुरःस्थलं हि मे ।
तदेहि कामेश्वरचित्तदेवते कृपावती भूरि परिष्वजस्व माम् ॥

( उत्थाप्य परिष्वजते )

लीला—( जनान्तिके ) आः ! किं करोषि ? एष वसन्तकः, एषा च सखी मे यूथिका प्रत्यक्षं पश्यतः ।

राजा—( जनान्तिके ) प्रिये, रमणीयमेतयोः प्रच्छादनोपायं कथयामि, एतौ तीव्रां सुरां पाययित्वा विवशीकृत्य निरन्तरायं यथाकामं विहरिष्यावः । तदेवं करोमि । ( प्रकाशं ) वयस्य, वसन्तक, रमण्या नृत्यं सङ्गीतञ्च सुरां विना न मे स्वदेते । तत् सुरामेव समादिशामि । कः कोऽत्र ?

प्रविश्य प्रतीहारी—आज्ञापयतु देवः ।

राजा—उच्यतां सुराधिकृतः पुरुषः, एष महाराजः सुरया सह त्वामचिरं द्रष्टुमिच्छति इति ।

प्रतीहारी—यथाज्ञापयति देवः (निष्क्रान्तः ) ।

( ततः प्रविशति सुरामादाय सुराधिकृतः पुरुषः )

पुरुषः—देव, एषा राजपेया सुरा, पातुमर्हति देवः, ।

( सुरापात्रमुपनयति )

वसन्तकः—अब्रह्मण्यं भो अब्रह्मण्यम् ।

सर्वे—( ससम्भ्रमात्तिष्ठन्ति )

राजा—किन्नु खल्विदम् ?

वसन्तकः—अपि नाम राज्यमिदमराजकं संवृत्तम् ।

राजा—कथमिव ?

वसन्तकः—न चेदराजकं राज्यम्, कथन्तर्हि पुरुषः सुरामुपनयति ? पश्यन्त्याः कामिन्याः पुरुषेणोपनीतया सुरया पुरुषो दण्डमर्हति।

पुरुषः—वयस्य, वसन्तक, अनपराद्धोऽहं राजादेशादुपनीतवानस्मि।

राजा—भवतु अलमाशङ्कया, गच्छ त्वम्। सुराभाण्डमिहैव स्थापय।

पुरुषः—यथाज्ञापयति देवः। ( निष्क्रान्तः )।

राजा—प्रिये लीलावति, एहि यावदिदानीं त्वया सहैव सुरां पीत्वा त्रिदिवानन्दमभिविन्दामि। तथाहि—

> यावत् सुरायां दयिताननस्य
> संक्रान्तिमायाति न रम्यगन्धः।
> तावत् सुराया विफलैव जाति-
> र्न कामिनां तत्र रसो विभाति।

लीला—अहो अनुगृहीतास्मि ( एकपात्रे सुरां पिबति )।

राजा—( वसन्तकं सुरां पाययितुं लीलावत्याः संज्ञां ददाति )।

लीला—वयस्य, वसन्तक, त्वया अनुपयुज्यमाना चेद् विफलैव सुराजातिः, तदिमां पानेन अनुग्रहीतुमर्हसि।

वसन्तकः—भद्रे लीलावति, कथमद्यैव तवेदृशी मतिः प्रादुर्भूता ?

लीला—यत एतावत्कालमप्रबुद्धा अद्य सहसा प्रबुद्धाऽस्मि। तदुपयुज्यताम् ( पात्रमुपनयति )।

वसन्तकः—अहह ! भद्रे, तिष्ठ, तिष्ठ, ब्राह्मणस्य मे सुतरां विरुद्ध एष आचारः। तद् विरम।

राजा—( नयनसङ्केतेन लीलावतीं तथैव आदिश्य ) वयस्य, त्वं प्रत्यहं 'शौण्डिकानां करस्पृष्टेन जलेन निर्मितां सुरामहं पिबामि' इति कृत्वा मामधिक्षिपसि, अद्य तु तीर्थजलेन ब्राह्मणैरेव सुरां कारितवानस्मि, तदतः परं न मामधिक्षेप्तुमर्हसि।

लीला—अहो निपुणवादिता स्वामिनः !

वसन्तकः—आम् एवम् ? तदतः परं तवाधिक्षेपाद् विरतो भविष्यामि ।

लीला—वयस्य, वसन्तक, एषा सुचिरं पानपात्रे स्थिता प्रकर्षं जहाति, तदविलम्बितं पीयताम्, अन्यथा नाहं मुञ्चामि ।

यूथिका—महाब्राह्मण, पीयतां, सौभाग्यादिदमीदृशं लभ्यते ।

( सुरां पिबति । )

वसन्तकः—आ दास्याः पुत्रि, किं मया दरिद्रब्राह्मणेन सुरया उन्मादितेन ।

राजा—वयस्य, ससखीजना लीलावती प्रीता भवति, तत् सकृत् पीयताम् । अनन्तरं लघुना प्रायश्चित्तेन पापं क्षालयिष्यसि ।

वसन्तकः—सत्यं ब्राह्मणीभिस्तीर्थजलेन निष्पादितैषा ?

राजा—अथकिम् ।

वसन्तकः—भवतु तिष्ठ क्षणं यावद् ब्राह्मण्यं दूषणाक्रमणात् परिपालयामि । (यज्ञसूत्रं कर्णलम्बितं कृत्वा ) इदानीम् उपनय, का गतिः ?

लीला—वयस्य, महानन्दं लप्स्यस इति सकृत् पीत्वैव ज्ञास्यसि (उपनयति) ।

वसन्तकः—अहह ! तीव्रो गन्धः, न सोढुं शक्यते, भद्रे, लीलावति, किमेष ते महानन्दस्य समारम्भः ?

लीला—वयस्य, दुःखं विना सुखं दुर्लभमेव, तदत्रापि आदितस्तीव्रेण गन्धेन किञ्चिद् दुःखम्, अनन्तरं परमानन्दः !

वसन्तकः—सत्यम् ? वयस्य, अपि सत्यम् ?

राजा—अथकिम् ।

वसन्तकः—भद्रे, दीयतां, नासानिरोधेनापि पिबामि ! कुतः खलु परीक्षां विना तत्त्वसिद्धिः ? (तथा पिबति) ।

लीला—अहो कृतार्थास्मि ।

वसन्तकः—अहो तीक्ष्णता मधुरता च मदिरायाः !

राजा—वयस्य, कथं मन्यसे ?

वसन्तकः—निरंतरामानन्दमनुभवामि ।

राजा—उत्तरोत्तरं स एष वृद्धिमेव यास्यति। प्रिये, पुनरपि वयस्याय सुरां यच्छ (सुरां पिबति)।

लीला—तथा ( सुरां ददाति )।

वसन्तकः—वयस्य, आनन्दसागरे मग्नोऽस्मि, सर्वत एव परमानन्द-तरङ्गाः प्रतिभान्ति। भद्रे लीलावति, गीयतां पुनरपि गीयताम्, अहं नर्तितु-मिच्छामि! भोः वयस्य, किमेवं तूष्णीं वर्तसे? उच्यतां लीलावती, गीयतां नृत्यतामिति। अहमपि एतया सह ताललयशुद्धं सङ्गीतं नृत्यञ्च करिष्यामि।

राजा—(स्वगतम्) अहो प्रभावः सुरायाः! (प्रकाशम्) प्रिये लीलावति, एवं क्रियतां वयस्यसन्तोषाय।

लीला—यथाज्ञापयति महाराजः। (सनृत्यं गीतं करोति)

( गीतम् )

कुञ्जवने कुसुमकुलं किरति सुस्मितम्
मलयपवनकम्पिततनु पतति पुञ्जितम्।
कुरु सुमधुरमालिकां हृदयदयितरञ्जिकां
दयितकण्ठमपि शोभय सुखय शाश्वतम्।
सुरया कुरु मानसं विरहितघनतामसम्
अधरे धर मधुराधरमेतु ललितनन्दितम्।

वसन्तकः—('अधरे धर मधुराधरमेतु ललितनन्दितम्' इत्यनुगायन् नृत्यकौशलमभिनयति )

राजा—वयस्य, किं मत्तोऽसि?

वसन्तकः—न हि, न हि, इन्द्रोऽस्मि, एष स्वर्गः, एषा देवभोग्या सुधा! एषा च उर्वशी नृत्यगीतकुशला श्रोत्रं नेत्रञ्च नः परितर्पयति। अयि उर्वशि, कथं विरतासि, नृत्यं सङ्गीतञ्च कुरु, तथैव कुर्वती मह्यं रोचसे, न तु तूष्णीं तिष्ठन्ती; तदलं मौनेन। अहमपि सुधां पीत्वा परमानन्दं विन्दामि। अयि मेनके, उपनय सुधाम्।

राजा—भो, यदि भवानिन्द्रः, अहन्तर्हि कः ?

वसन्तकः—(विचिन्त्य) त्वं चन्द्रो भव। स किल बहुतरताराकलत्रोऽपि स्वैः कलत्रैरपरितुष्यन् इतस्ततो ललितललनाकुलं विचिन्वंश्च गुरुपत्नीमपि तारां न जहौ, तत् त्वमपि तस्यैव तुलामर्हसि।

राजा—भो देवराज, अहल्यापि तव का ?

वसन्तकः—अहल्या नाम ? ( विचिन्त्य ) सा मम गुरुपत्नी।

राजा—तत् कथं चन्द्रस्यैव दोषं पश्यसि ?

वसन्तकः—आम् ! तर्हि नाहमिन्द्रो भवामि। चतुराननो भवामि।

राजा—आम् ! स्वसुतां कामयमानश्चतुराननोऽपि अनपराद्ध एव।

वसन्तकः—धिक् शान्तम् ! तिष्ठतु तावदेष दग्धाननश्चतुराननः, अलं मम तेनापि कलङ्किना, तत् को नु खलु भवामि ? ( विचिन्त्य ) आं दृष्टम् ! अहमिदानीं कैलासपतिर्महादेवो भवामि। यस्य महान्तमेव महिमानं मुनयोऽपि समामनन्ति।

राजा—भृशमप्रशस्तस्यापि कुजस्य मङ्गलसंज्ञेव भृशमकिञ्चनस्य तस्य महादेव इति संज्ञा। ततस्तव तद्भावोऽपि न मे दृढं रोचते।

वसन्तकः—तस्य अकिञ्चनत्वं कथं जानासि ?

राजा—बहुभिरेव कारणैः। तथाहि पश्य—

अस्थीन्याभरणानि चर्म वसनं भस्माङ्गरागस्तथा
स्नेहाभाववशाज्जटात्वमभजन् केशाः कठोरक्रमाः।
प्रेताः पारिषदाः प्रियः पितृवने वासो वृषो वाहनं
द्वारि द्वारि वनीयकस्य विधिवा दुःखाकरं जीवनम्॥

वसन्तकः—आं गृहीतम् ! तदलं मे तया महादेवतयापि, यत्र सुचिरशिक्षिता भिक्षावृत्तिरनुवर्तनीया।

लीला—हताश, तत् को वा भविष्यसि ?

वसन्तकः—पश्यामि तावत् ( विचिन्त्य स्मृत्वा नृत्यं नाटयित्वा ) आं ! दृष्टम् ! दृष्टम् !!

राजा—किं दृष्टम् ?

वसन्तकः—लीलावती भविष्यामि, यत्र प्रियवयस्यो मे कामेश्वरोऽपि सुतरामायतते। हुम्! इदानीं नाहं तवायत्ता, त्वमेव सम्प्रति ममायत्तोऽसि। इदानीमुपलालय माम्। एषा गायामि, एषा नृत्यामि, अयि, यूथिके, सुधामुपनय।

यूथिका—एषा सुधा ( इति सुरामुपनयति, स्वयञ्च पिबति )।

राजा—( सुरां पिबन् ) अहो माहात्म्यं सुरायाः! पीतया खल्वनया।

अन्धः पश्यति शून्यमार्गचलितानश्वांस्तथा कुञ्जरान्
मूको गायति गीतिकां पिकरुतैः खञ्जोऽप्यलं नृत्यति।
निःशेषं लयमेति दुःखवलयो जाड्यं परं लीयते
मद्यं मोदमहार्णवोत्थममृतं किं काम्यमस्मात् परम्॥

वसन्तकः—अयि देवि सुरे, प्रसीद, एतावतो दिवसानुपेक्षमाणस्य मे महान्तमपि दोषं क्षन्तुमर्हसि ( भूमौ प्रणमति )।

राजा—प्रिये, लीलावति, एष सुतरां मत्तो वसन्तकः! अयि प्रिये!

रम्भादिभिस्त्रिदिवधाम वृथैव गर्वं
धत्ते त्वया विरहितं सुकृतेन हीनम्।
त्वन्नेत्ररश्मिविनिपातमसीमपुण्यैः
प्राप्ता वयं सुकृतिनो नितरां वरेण्याः॥

अयि प्रिये,—कण्ठे ममार्पय भुजौ परिपीड्य गाढं
पीनस्तनौ घटय वक्षसि कामतप्ते।
रक्ताधरामृतरसं परिपातुकामं
कामेश्वरं जनय तन्वि समाप्तकामम्॥

( इति यथोक्तं व्यवस्यति )

( नेपथ्ये—परित्रायतां परित्रायतां महाराजः )

राजा—(श्रुतिमभिनीय) अये, किन्नु खल्विदम्? महानेष तोरणद्वारे कोलाहलः! तत् किन्नु खलु स्यात्?

प्रविश्य प्रतीहारी—जयति जयति महाराजः।

राजा—महाश्वेते, क एष कोलाहलः ?

प्रतीहारी—देव, दुर्भिक्षपीडितानां प्रजानां राजकरं दातुमशक्तानां गृहा राजपुरुषैरग्निना दाह्यन्ते। तत्प्रतीकाराय ता एव भवन्तमभिगताः।

राजा—धिक्! अत्रापि प्रजापरित्रासः! नास्ति अत्रापि निस्तारः ? महाश्वेते, गच्छ, कथय प्रजाः, तासां स्वकृतस्यैव दुष्कृतस्य फलमिदम्, तदस्य नास्ति प्रतीकारः। यदि तथापि न निवर्तेरन्, तदा कर्कशाभिः कशाभिः सन्ताड्य निवर्तय।

प्रतीहारी—( स्वगतं ) अहो स्वामिनो निष्ठुरता !

राजा—गच्छ सत्वरं स्वनियोगमनुतिष्ठ।

प्रतीहारी—यथाज्ञापयति स्वामी ( निष्क्रान्ता )।

राजा—धिक् कष्टम्! प्रतिपदमेव प्रत्यूहव्यूहेन विघ्नितप्रसरो जन्मवतां मनोरथलाभः। स्वार्थमुग्धं जगत् सन्ततमेव स्वार्थमभिसन्धत्ते, न पुनः परार्थमपि। यद्येवं किमिति मयापि परार्थं प्रवर्तितव्यम् ?

( नेपथ्ये—हा हा हताः स्मः, मारिताः स्मः, कठोरकशाघातेन मारिताः स्मः )।

राजा—( श्रुत्वा ) दुष्टाः स्वकर्मफलमनुभवन्तु। अयि प्रिये, लीलावति !

सर्वं जगद् व्रजतु नाशमकालहीनं
किन्तेन मे तव च शाश्वतरागभाजोः।
पीत्वा तवाधरसुधामधरेण तृप्तः
कालं चिरं गमयितास्मि लयं प्रसीद ॥
परिष्वजस्व मां कण्ठे निरन्तरमनन्तरम्।
अधरामृतपानाय प्रसादं मयि योजय ॥

( यथोक्तं कर्तुं व्यवसितः )

लीला—प्रियतम, एष एव स्वर्गो ननु ?

राजा—प्रिये, अथ किम् ।

लीला—प्रियतम, सरयूवक्षसि नौविलासो मे दृढं रोचते ।

राजा—यदि तुभ्यं रोचते, नचिरं कारयिष्यामि ।

लीला—अनुगृहीतास्मि ।

वसन्तकः—( उत्स्वप्नायते ) अयि यूथिके, कथं दूरीभवसि, परिष्व-ज्स्व माम्, अलं विलम्बेन, एहि ।

यूथिका—हताश, ध्वंसस्व ।

लीला—आम् ! उद्घाटितं चित्त-रहस्यं सुराप्रभवेन वैक्लव्येन । अयि यूथिके, गच्छ, वसन्तकमुपलालय ।

यूथिका—धिक् ! व्रीडितास्मि । तत् पुनरपि सुरां पीत्वा व्रीडां नाशयामि ।

राजा—प्रिये, किन्तु खलु त्वं—

व्याजेन भुजबन्धं मे परिमुञ्चसि चञ्चले !
चिरमेवं गतायास्ते प्रमोदः किं न रोचते ॥

( आलिङ्ग्य चुम्बितुं व्यवसितः ) ।

प्रविश्य प्रतीहारी—देव, अत्याहितम् !

राजा—किमिव ?

प्रतीहारी—देव, परिजनसकाशाद् अस्या आर्याया लीलावत्याः कृते सुघटितस्य लोकोत्तरहीरकहारस्य वृत्तान्तमुपलभ्य देवी शीलवती राज-भवनं प्रति सहीरकहारमागच्छन्तं मणिकारश्रेष्ठिनं विश्वावसुं छलेन आकारितवती ।

राजा—ततस्ततः ?

प्रतीहारी—ततो लोकोत्तरं तं हीरकहारं दृष्ट्वा पृष्टोऽसौ यावच्छलेन बहून् वाक्यभेदानकथयत् तावदेव कोपकषायितलोचना देवी तस्य मिथ्या-भाषणं व्याजीकृत्य कारागारनिक्षेपं समादिशत् । श्रुत्वा देवः प्रमाणम् ।

राजा—अहो चण्डस्वभावा देवी ! प्रिये, लीलावति, अचिरं मोचनीयः

सहीरकहारो विश्वावसुः। तदेषोऽहं नातिचिराद् सिद्धसमीहितः प्रत्यावर्तिष्ये। त्वमपि वसन्तकं प्रबोध्य ससखीजना गृहाभ्यन्तरं प्रविश। ( निष्क्रान्तः )।

लीला—एवमस्तु। अहो शीलवत्या देवीपदाधिकारगर्वः! भो वयस्य, वयस्य, उत्तिष्ठ।

वसन्तकः—भवति, क्षुधया बाधितोऽस्मि। क्व नु खलु प्रियवयस्यो गतः ?

लीला—( कर्णे ) एवमेवम्। तदेहि पानभोजनप्रबन्धाय गृहं प्रविशामः।

वसन्तकः—अहो देवीप्रभावः! भवतु साम्प्रतं क्षुधोपशमाय अभ्यन्तरं गच्छामः। ( उत्थाय यूथिकां प्रति ) अरे दास्याः पुत्रि, हस्तालम्बं देहि, यावन्न पतितो भवामि।

यूथिका—हताश, यद्येवं, कथमेतद् विषं निपीतम् ?

वसन्तकः—पुनर्न पास्यामि, दास्याः पुत्रि, पुनर्न पास्यामि। तदेहि।

यूथिका—एहि हताश, एहि।

लीला—अहो! कदा पुनः प्राणेश्वरमासादयेयम्। तमपश्यन्त्याः क्षणोऽपि मे कल्पवत् प्रतिभाति ( निष्क्रान्ताः सर्वे )।

द्वितीयाङ्कः समाप्तः

---

# तृतीयाङ्कः

( ततः प्रविशति वीरबलमेघवर्णप्रमुखैः पुरुषैः सहितो रत्नाकरः )

रत्ना—भो भो वीरबलप्रमुखाः प्रधानपुरुषाः! यथाकालमेव यूयं सङ्केतस्थानमुपगताः। एषा घोरान्धकारभीमा रजनी, अस्यामिदानीं नैव सन्दृश्यते स्वदेहोऽपि, विशेषतश्चात्र परितः पादपप्रतानप्रच्छन्ने भूमिभागे। तथाहि—

कृष्णाभवसनच्छन्नदेहानां तिमिरोच्चये।
पुरो विलीयते देहः कालिन्द्यां नीलपद्मवत्॥

सम्प्रति समग्रं जगत् स्वपिति, विश्रान्ताः सुतरां सर्वत्र जनकोलाहलाः, अन्तरान्तरा केवलमाकर्ण्यते सुदूरं काननमधितिष्ठतां नातिप्रकाशो घोषो ग्रामघोषाणाम्! विकटो रावश्च कौशिकानाम्! तद्रावश्रवणसमुद्वेजिताश्च क्वचित् क्वचित् प्रान्ते शब्दायन्ते भवनसारमेयाः। एष एव नः कालः स्वाभीष्टं निर्वर्तयितुम्। यावद् यावदेव भीषणः प्रपञ्चस्तावत् तावदेव समुत्साहः समुदेति नः स्वान्तेषु। यस्मादपरे भीता निवर्तन्ते, तत्रैव वयमानन्देन प्रवर्तामहे। वयं कुतोऽपि साहसान्न बिभीमः, प्राणिघातमतिनिष्ठुरमपि क्रीडामात्रं विद्मः। तथाहि—

कातर्यं श्रयतां शुचा प्ररुदतां स्वेषां जनानां पुरो
हत्वा गेहपतिं कृपाविरहितैरस्माभिरस्मत्प्रियम्।
ऐश्वर्यं परिगृह्य साहसवशादाशाशतैरन्वहं
रत्नागारमकारि यस्य नियतं वृद्धिः समाशास्यते॥

वयस्य, वीरबल!

वीर—आज्ञापय।

रत्ना—अद्य सुमहत् साहसमनुष्ठातव्यम्।

वीर—किमिति?

रत्ना—अवधानेन समाकर्ण्यताम्। अयमदूरे संदृश्यते सर्वतः श्वेतो राजप्रासादः ?

वीर—अथ किम्! सुष्ठु खल्वेष शोभते।

रत्ना—आम्, शोभत एव। तथाहि—

वर्णैः सितैरेष विलिप्तकायस्तमःप्रतानेषु विशालवर्ष्मा।
नीलाम्बरे चन्द्रिकयेव चन्द्रः संदृश्यते नेत्रजुषां सुखार्थम्॥

तदत्रैव महत् साहसमनुष्ठेयम्।

वीर—निरूप्यतां प्रकारः।

रत्ना—प्रासादं परितो दृश्यते कश्चित् समुच्चः प्राकारः ?

सर्वे—आम्, दृश्यते।

रत्ना—एनमतिक्रम्य अभ्यन्तरे प्रवेष्टव्यम्। वीरबलप्रमुखा यूयं पञ्चैव मया सह अभ्यन्तरं गमिष्यथ, शिष्टाश्चापरे मया समादिष्टेन पथा कृत्यं प्रवर्तयिष्यन्ति।

वीर—वयस्य, समुच्चः किलैष प्राकारः, तदस्यातिक्रमे का गतिः ?

रत्ना—वीरबल, अविदिततत्त्व इव पृच्छसि। तदलमाशङ्कया, तत्र गतिमहमेव देक्ष्यामि।

वीर—स्थाने खलु निगृहीतोऽस्मि।

मेघवर्णः—स्वामिन्, किञ्चित् प्रष्टुमिच्छामि।

रत्ना—किमिव ?

मेघवर्णः—स्वामिन्, अस्य राजप्रासादस्याभ्यन्तरे सन्ति तत्परिरक्षणाय नियुक्ताः सशस्त्राः प्रहरिणः सैनिकाश्च, तदभ्यन्तरं प्रविष्टानामस्माकमात्मपरिरक्षणे कीदृश उपायः ?

रत्ना—तत्रापि पूर्वमेव मया कृतः प्रबन्धः।

सर्वे—कीदृशः सः ?

रत्ना—परितः पर्यालोक्यताम्, अस्ति कश्चिद् बाह्यो जनो नवेति ?

मेघवर्णः—( इतस्ततो निपुणमन्विष्य ) स्वामिन्. न कश्चिद् दृश्यते।

रत्ना—तदिदानीं श्रूयताम् ?

सर्वे—अवहिताः स्मः ।

रत्ना—अस्ति मया वसुदासेन कायस्थेन छद्मना किञ्चित् पत्रं सुविहित-लेखं कारितम् ।

वीर—कः कस्मै लिखति, किञ्च तत् पत्रम् ?

रत्ना—ज्ञायते, अस्त्यस्य राज्यस्य सीमान्ते दुर्गेश्वरेण सिंहवर्मणा समधिष्ठितं शैलदुर्गम् ?

वीर—अस्ति ज्ञायते, किं तेन ?

रत्ना—स एव दुर्गेश्वरो राज्ञो कामेश्वराय लिखति ।

वीर—किमिति ?

रत्ना—इदं लिखति,—स्वस्ति निखिलराजन्यगुणालङ्कृताय परम-भट्टारकाय कामेश्वराय, सीमान्तदुर्गाधिकृतः प्रणतः सिंहवर्मा श्रीमत्पादपीठोल्लुठितशीर्षः प्राप्तकालं निवेदयति,—अस्माकं भूम्यनन्तरः शत्रुः शैलराजः प्रभूतबलवाहनः सम्प्रति दुर्गमत्रत्यमाक्रमितुमीहते । अपर्याप्तानि किलात्रत्यानि बलानि वाहनानि च तत्प्रतिरोधाय । तदेतच्छ्रुत्वा देवः प्रमाणम्, इति ।

वीर—पत्रमिदमासाद्य किं प्रतिपन्नं कामेश्वरेण ?

रत्ना—यदभिसन्धाय प्रयुक्तमस्त्रं तथैव प्रतिपन्नं तेनापि !

वीर—कथमिव

रत्ना—पत्रार्थमवगत्यैव राजा स्वैरमात्यैः साकं मन्त्रयित्वा प्रायेण सर्वानेव सैनिकान् शस्त्रग्राहिणस्त्वरितमेव तस्मिन्नन्तपालदुर्गे सम्प्रेषितवान् । केवलं पुररक्षणोपयुक्ताः कतिचिदेव राजप्रासादमधितिष्ठन्ति ।

विशालाक्षः—स्वामिन्, एवं स्थिते सर्वमेव पुरं सम्भ्रान्तं वर्तते, तेन च अप्राप्तसुप्तिके राजपुरे कथमिव नः समीहितसिद्धिः ?

रत्ना—विशालाक्ष, रत्नाकरमद्यापि न जानीषे, येनैवमाशङ्कसे । किं वा कतिपयैर्जागरितैः, ये कथमपि सुप्तास्तानपि स्वेच्छया जागरयिष्यामि ।

सर्वे—कथमिव ?

रत्ना—काले सर्वं द्रक्ष्यथ, इदानीं यथादिष्टमनुतिष्ठत ।

सर्वे—आदिशतु स्वामी ।

रत्ना—शूरसेन, अपि सन्निहितानि मदादिष्टानि सर्वाण्युपकरणानि ?

शूरसेनः—अथकिम्, एषा स्थूलरज्जुः, एतदरणिकाष्ठम्, इदं महादात्रम्, एताश्च गोणिकाः । अपि शिष्यते किञ्चिदपरम् ?

रत्ना—न शिष्यत इति प्रतिभाति ।

वीरबलः—वयस्य, दिशेदानीं कृत्यम् ।

रत्ना—वयस्य, वीरबल, एतत्प्राकाराभ्यन्तरे राजगृहस्यानतिदूरे सन्त्यमात्यानां गृहाः, तत्र केचित्तृणमयाः सन्ति, प्राकारमतिक्रम्य तत्र त्वया निपुणमग्निः प्रक्षेप्तव्यः, तेन प्रक्षिप्तेन वह्निना यावद् गृहाः प्रज्वलिष्यन्ति, तावदेव प्रज्वलितान्यतिसन्निहितानि भवनानि रक्षितुकामाः सर्वे तां दिशं प्रति प्रस्थास्यन्ते, तदैव शून्यप्राये राजप्रासादे सुतरामस्माकं कामचारो भविष्यति । तदलं विलम्बेन, यावत् प्राकारसमीपं गत्वा सत्वरं कृत्यमारभयामः ।

सर्वे—अहो, स्वामिनः साहसं निपुणदर्शिता च ।

वीर—यथादिशति प्रियवयस्यः ।

रत्ना—वीरबल, त्वं, मेघवर्णः, शूरसेनो, भीमबाहुः, विशालाक्षश्चेति पञ्चभिरेवाहमनुगन्तव्यः । अहं हि प्रथमतः—

प्राकारमुल्लङ्घ्य महाजवेन क्षणेन सम्प्राप्य पुरप्रवेशम् ।
बध्नामि रज्जुं तदुपान्तवृक्षे यत्संश्रयाणां भवतां गतिः स्यात् ॥

अन्यच्च, ये किलास्मदीया अपरे, तेऽपि प्राकाराद् बहिरस्मानपेक्षिष्यन्ते, यावद् वयं साहसकारिणो द्रव्याणि यथाकामं सञ्चित्य तेभ्यो दास्यामः । यदि कश्चित् सहसा दृष्टः प्रतिपक्षस्तदा सोऽयमकालहीनमविचारितं हन्तव्यः । सति च व्यसनोपनिपाते निरपेक्षमेव प्रस्थातव्यम् ।

सर्वे—यथादिशति स्वामी ।

रत्ना—तदलमत्र कालातिपातेन। यावच्छीघ्रं प्राकारोपान्तमेव समुपसर्पामः।

सर्वे—एवं कुर्मः।

रत्ना—अहो! एषा वामतः शिवा धावति, दक्षिणतो मृगः प्रसर्पति, तद् नूनमयमारम्भो नः शुभाय सम्पत्स्यते।

सर्वे—जयति—( अङ्कोंक्ते )

रत्ना—धिक् शान्तम्! अलमत्यावेगेन, मूकाः कर्म कुरुत।

सर्वे—तथा—( निष्क्रान्ताः सर्वे )।

( ततः प्रविशतो भीतभीताविव रक्षिपुरुषौ )

१मः—अरे महावीर, अद्य भीषणाभोगा तामसी रजनी घोरं वक्त्रं व्यादाय ग्रसितुमिव नः समुपसर्पति। सर्वतः सुप्ते जगति जागरितावावाम्। अहो कष्टं खलु दास्यं नाम। येन ईदृशेऽपि घोरान्धकारे जीवनसंशयं पश्यतोरपि आवयोरशक्या कृत्यनिवृत्तिः।

२यः—अरे, वज्रहस्त, तावदेवात्र बहुतरं यत्, राज्ञा सीमान्तदुर्गे सम्प्रेष्य सद्य एव वयं न प्राणसंशयं प्रापिताः।

१मः—आ मूर्ख, एवं ब्रुवाणस्त्वं तत्त्वं नावगच्छसि।

२यः—कथमिव?

१मः—यदा प्रतिपक्षा मानवास्तदा अन्तरालगतस्य तेभ्यः सम्भाव्यते मोक्षः, इह तु कामरूपी कामचारी च भूतयोनिः प्रतिपक्ष इति नास्ति अन्तरालगतस्यापि ततो मोक्ष इति।

२यः—धिङ् मूर्ख, स्वस्य मूढतामजानन् परं मूर्खं ब्रवीषि!

१मः—कथमिव?

२यः—अपि न जानासि रे, यदयं नाम्ना नोत्कीर्तनीय इति, तदनेन ते व्यवसितेन सुसन्निहितमनिष्टं पश्यामि।

१मः—कस्मादनिष्टमाशङ्कसे?

२यः—तस्मात्!

१मः—कस्मात् कस्मात् ?

२यः—यस्तावदन्धकारमुपजीवति ।

१मः—स कः ? स्पष्टं कथय ।

२यः—स भू—( अर्द्धोक्ते ) नहि नहि न पुनरहमपि तं नाम्नैव कीर्तयिष्यामि ।

१मः—किं नामकीर्तनेन ? अप्यसौ नामकीर्तनमात्रेणैव सन्निहितो भविष्यति ?

२यः—आ मूर्ख, अथ किम् । यदि न प्रत्येषि श्रूयतामितिहासः ।

१मः—कथय ।

२यः—कदाचिद् द्वौ सुहृदौ कार्यवशादमानिशायां ग्रामान्तरगमनाय घोरान्धकारप्रावृतं काननमार्गं परिप्राप्तौ ।

१मः—ततस्ततः ?

२यः—ततस्तयोरेकतरेण तदीयभयोद्विग्नेनापरः पृष्टः, भो मित्र, अप्यत्र कानने अस्ति ? अपरेणोक्तं भो मित्र, कस्य सत्तां पृच्छसि ? तेनोक्तं तस्य इति । ततोऽपि पुनः पुनरसौ तेन मित्रेण विशेषं पृष्टो यावदमुं नाम्ना कीर्त्तितवान्, तावदेव तत्र समीपे वर्तमानस्य महान्यग्रोधस्य शाखाग्रात् तालविशालौ चरणौ दृष्टिपथं प्राप्तौ ।

१मः—भो महावीर, प्राकारं निकषा दृष्टिं देहि, तत्र किमपि दृश्यत इव ।

२यः—अरे, अन्धकारेण दृष्टिः प्रतिहन्यते, तत् स्पष्टं कथय यत् पश्यसि ।

१मः—अरे, प्राकारसन्निहिते पादपे दृष्टिं देहि ।

२यः—हा ! हा ! हा ! हा ! वज्रहस्त, समीपमेहि. एष एव नूनं सः, प्राकाराद् वृक्षं, वृक्षाच्च भूमिम् अवतरति । हा ! हा ! हा ! अतःपरं भूमिमार्गेण समागत्य आवयोर्घाटां मोटयिष्यति । आ ! आ !! आ !!! आ !!!!

१मः—अरे, मूर्ख मा तावदुच्चैः शब्दं कुरु, एवमसौ प्रबोधितः सत्वरमित एवाभिवर्तेत। तदेहि यावत् सत्वरं राजकुलं प्रविशावः।

२यः—( दृष्ट्वा ) अरे वज्रहस्त, आदौ एक एव, इदानीं पुनः पादपस्याधस्ताद् बहवो दृश्यन्ते ! हा ! हा ! हताः स्मः।

१मः—आम् एवमिदम् ! अरे, न खलु अतः परमपि अत्र स्थातव्यम्। एहि, एहि, शीघ्रमेहि, यावत् पलायावहे।

( ततः पुनः प्रविशन्ति रत्नाकरप्रमुखाः पञ्च पुरुषाः )

रत्ना—भो भो वीराः ! निर्विघ्नं वयं प्राकारमतिक्रान्ताः स्मः। अथेदानीं समीहितसाधनावसरः। क नु खलु शूरसेनः ?

शूरसेनः—स्वामिन्, एषोऽस्मि, आज्ञापय।

रत्ना—अपि सन्निहितमरणिकाष्ठम् ?

शूरसेनः—स्वामिन्, अथ किम्।

रत्ना—वीरबल, शूरसेनादरणिकाष्ठं गृहीत्वा स्वनियोगं सम्पादयस्व। एता दृश्यन्ते नातिदूरे अमात्यगृहश्रेणयः, तत्र ये तृणमया गृहास्तेषु अरणिनिर्मन्थनेन वह्निमुत्पाद्य सत्वरं संयोजय। सुप्ता सर्वैव पुरी, तदयमेव साधीयान् कालः स्वाभीष्टमस्माकं सम्पादयितुम्।

वीरबल—( शूरसेनादरणिकाष्ठं गृहीत्वा ) यथादिशति वयस्यः, एष समीहितसाधनाय गच्छामि ( निष्क्रान्तः )।

रत्ना—बाढं गच्छ, अस्तु ते सफलः समारम्भः। मेघवर्ण, शूरसेन, विशालाक्ष, भीमबाहो, यूयमपि सन्नद्धा भवत, यावदेव वीरबलेन अमात्यगृहश्रेण्यां वह्निः संयोजितो भविष्यति; तावदेव प्रज्वलिताममात्यगृहश्रेणीं रक्षितुकामाः प्रासादवासिनः सर्वे तत्र गमिष्यन्ति, तदानीं कोषरक्षका अपि नूनं सत्वराः कोषगृहमविचारितमुपेक्ष्यमाणास्तत्रैव मिलिता भविष्यन्ति। ततस्तमेव शुभावसरमासाद्य वयं कोषगृहं प्रविश्य स्वामिलषितं सम्पादयिष्यामः।

सर्वे—आं ! गृहीतोऽर्थः।

रत्ना—भद्र शूरसेन, अपि गृहीतो वीरबलेन दण्डः ?

शूरसेनः—अथ किम्, गृहीतः ।

रत्ना—भवतु वीरबलस्य कृत्यं प्रतिपालयामः । ( नेपथ्याभिमुखमवलोक्य ) अहो एष वीरबलः सावधानं गच्छति ! एष गच्छति ! एष गच्छति ! एष इतस्ततो निपुणं वीक्षते ! एष तृणगृहश्रेणीमुपगतः ! हा धिक् प्रमादः ! एष कश्चन रक्षिपुरुषः ! अये एष वीरबलो दृष्ट्वा उत्प्लुत्य दण्डेन तमभिहन्ति, अहो एकाघातेनैव मूर्च्छितः पतितः ! अये एष वीरबलः समुपेत्य समाप्तपरीक्षस्तं मृतं निश्चित्य पुनः प्रचलति । एष स्थितः, एषः अरणिं निर्मथ्य अग्निमुत्पादयति, अां जातोऽग्निः, अये पुनरितस्ततो निरूप्य तृणपटलकप्रान्ते दण्डाग्रेण अग्निं योजयति । एष वातसन्धुक्षितः समुद्दीप्यते वह्निः, एष शिखां विस्तारयति । एष इतस्ततो दृष्ट्वा प्रत्यावर्तते वीरबलः । साधु वीरबल, साधु, सिद्धप्रायं नः समीहितं पश्यामः ( नेपथ्ये कलकलः ) ।

मेघवर्णः—अहो, एते गृहपतयः प्रबुद्धा विदितमहाविपत्तयो बहिरुपेत्य समुच्चैः क्रोशन्ति, क्रमेणायं प्रवर्द्धते लोकसम्मर्दः ।

रत्ना—ही ही भोः ! एते प्रासादमधिवसन्तोऽपि सहसा पौरजनकोलाहलेन प्रबुद्धा निर्विचारमग्निज्वालासन्दर्शनपर्याकुलास्तमेवाग्निमभिधावन्ति । अहो मे कृत्यसाफल्यम् ! एष प्रासादाद् बहिरागच्छति सङ्कुलो जनसमाजः ! एष गच्छति ! एष गच्छति !! एष गच्छति !!! अथेदानीं स्त्रीखञ्जरुग्णादिमात्रप्रचारं राजकुलं सम्भाव्यते । भो वीराः ! अलमद्यापि कालक्षेपेण, एष एव नः समयो राजकुलं प्रविश्य कोषागारं दूषयितुम्, तदागच्छत, पक्षद्वारकेण राजकुलमेव प्रविशामः ।

सर्वे—यथाज्ञापयति स्वामी ( सर्वे प्रविशन्ति ) ।

रत्ना—( समीपे रक्षिणं दृष्ट्वा ) अये, अद्याप्यत्र सशस्त्रो रक्षी ? भवतु प्राप्तकालं प्रतिकारं करोमि । ( सहसा समुपसृत्य दण्डप्रहारेण

रक्षिणं पातयित्वा ) मूढ, अद्यापि उच्छ्वासं वहसि ? तद् गच्छ, यमेन स्मृतोऽसि। ( पुनरपि दण्डेन प्रहृत्य ) मूढ, म्रियस्व।

रक्षी—आ ! आ ! आ ! ( मरणमभिनयति )

रत्ना—निःशेषं मृतः ! भो वीराः ! अस्तं गतो विघ्नः। तत् प्रविशत, ( प्रविश्य ) अये इदमुद्घाटितकवाटमेव कोषागारम् ! अहो भाग्यम् !

गर्भो रत्नकरैर्भाति कोषागारस्य भास्वरः।

मेघवर्णः—स्वामिन्, अत्रापि रक्षी !

रत्ना—पूर्वस्यैवानुकारेण यमद्वारं गमिष्यति ॥

तदत्र अन्तराले क्षणं तिष्ठत, यावदहं निपुणमुपसृत्य समीहितं साधयामि (सावधानमुपसृत्य एकदण्डप्रहारेण पातयति)।

रक्षी—हा हतोऽस्मि ! (भूमिगतो विचेष्टते)

रत्ना—मूढ, अद्यापि न मृतोऽसि, (पुनः प्रहृत्य कण्ठं निष्पीड्य मारयति)।

रक्षी—आ ! आ ! अ ! अ—(अव्यक्तं शब्दं कुर्वन निश्चेष्टतां नाटयति)।

रत्ना—(विशेषतः परीक्ष्य) गतं विघ्नेन। भो वीराः ! अलं कालक्षेपेण, इदं रत्नागारद्वारम्, अत्र सत्वरं प्रविश्य

यावच्छक्यं रत्नराशिं गृहीत्वा<br>
तेनोत्साहाद् गोणिकाः पूरयित्वा।<br>
सर्वं विघ्नं शक्तियोगेन हित्वा<br>
प्रत्यावृत्तिं वर्तयध्वं समेताः ॥

यावदहमपि समुद्यतेन दण्डेन निर्विघ्नतां वः साधयामि।

( समुद्यतदण्डो द्वारे तिष्ठति )

सर्वे—यथाज्ञापयति स्वामी। ( प्रविश्य ) स्वामिन, रत्नानां किरणैः प्रतिहन्यन्ते नश्चक्षुषस्तेजांसि।

रत्ना—नायं कालः कथान्तरस्य, तत् स्वकृत्येष्ववहिता भवत।

सर्वे—तथा, ( प्रविश्य गोणिकासु रत्नानि स्थापयित्वा ) स्वामिन्, रत्नैः परिपूरिताः सर्वा एव गोणिकाः।

रत्ना—समाप्तं कृत्यम्, अथेदानीं निर्गत्य मामनुसरत, अहं दण्डधारी भवतां सम्मुखचरो भवामि।

सर्वे—यथाज्ञापयति स्वामी ( निष्क्रान्ताः )।

( ततः प्रविशन्ति प्रज्वलितानि गृहाण्युदीक्षमाणाः सम्भ्रान्ताः पौराः )

१मः—भो भो बान्धवाः! दग्धप्रायाणि क्षुद्रगृहाणि समुपेक्ष्य साम्प्रतमपि कथञ्चिद् ध्रियमाणानि विशालगृहाणि रक्षितुं प्रयत्नमातिष्ठत।

२यः—भो! भो! रक्षणार्थमनन्तरं यत्नं करिष्यथ। आदौ तावद् निरूपयत, केनायमग्निः प्रदीपित इति।

१मः—अहो विवेकलाघवम्! आर्य बृहस्पते, आदौ अग्निप्रदीपकस्यान्वेषणे क्रियमाणे स्वयमेव दाह्याभावादग्निः प्रशाम्येत्, न तु भवतां प्रयत्नलेशोऽपि तत्रापेक्ष्येत। तदादौ क्रियतामग्निनिर्वापणप्रयत्नः, किंवा अनर्थहेतुना आत्मनो विज्ञम्मन्यतया अकाण्डे प्रकटनेन।

३यः—अहो! अत्याहितम्! एतदाक्रान्तमग्निना प्रवरामात्यस्य वाचस्पतेर्बहिर्गृहम्। तद् यावदस्यैव गृहं रक्षितुमादौ यत्नं कुर्मः।

१मः—हा धिक् कष्टम्! स्वल्पेनैव कालेन प्रबलवातसन्धुक्षितः प्रवर्द्धते प्रलयकारी ज्वलनः। तदिदमपि गृहं न शक्यं रक्षितुम्! मुहुः सलिलसेकादिभिरुपायैः प्रतिक्रियमाणस्यापि प्रबलेन पराक्रमेण प्रज्वलतो ज्वलनस्य नैव शक्यते प्रभावः प्रतिरोद्धुम्। मा तावदयं वह्निः सहसा प्रसृतः प्रासादमाक्रामेत्।

२यः—अरे, पश्यत, सर्वे गृहवासिनः सबालस्त्रीवृद्धा बहिः प्राप्ता न वा?

३यः—आम्! एते सर्व एव निर्गताः पादपतलमाश्रित्य व्याकुला विलपन्ति। प्रधानामात्यो वाचस्पतिश्च सर्वान् सान्त्वयति।

१मः—अये, किन्नु खल्विदम्, एषा कापि स्त्री सोरस्ताडं रुदती

प्रज्वलिताद् गेहान्निर्गता, अये एषा किमपि याचमाना प्रत्याख्याता इत एवाभिवर्तते। तत् किन्तु खल्विदम् ?

( ततः प्रविशति सोरस्ताडं रुदती स्त्री )

स्त्री—भो भो महात्मानः ! परित्रायन्तां परित्रायन्तां मे पुत्रम् !

१मः—विशेषं ब्रूहि।

स्त्री—भद्रमुख, एषाहं दासी प्रधानामात्यस्य, एष मे विधवाया एकमालम्बनं पुत्रः स्तनन्धयो दहनेन सर्वतः प्रदीपिते गेहे विपद्यते। नास्त्यस्य कोऽपि त्राता। हा पुत्र ! कासि, हा पुत्र !

२यः—को वा स्वजीवनं तृणीकृत्य तव पुत्रस्य रक्षणार्थं स्वेच्छया दहनं प्रविशेत् ? तावतैव सन्तोषं भज, यदात्मनो जीवनं प्राप्नासि।

३यः—को वा संशयः ?

स्त्री—हा हा ! तर्हि सत्यमेव नास्ति मे वत्सस्य कोऽपि परित्राता ? हा वत्स, नयनानन्द, हा दुःखिनीजीवन, हा मातृप्रिय, कथं त्वां जीवितमासादयेयम् ? अथवा अलं कालहरणेन, एषा अहमपि वत्सेन सहैव ज्वलनप्रवेशं कृत्वा प्राणांस्त्यक्ष्यामि। ( गन्तुमीहते )।

१मः—भद्रे, क्व गच्छसि ?

स्त्री—वत्सस्य मे प्राणाधिकस्य वियोगं सोढुमशक्ता ज्वलने प्रवेष्टुम्।

१मः—भद्रे, अलमलं साहसेन, निवर्तस्व, एषोऽहम्

स्वजीवनव्ययेनापि ज्वलनात्तव पुत्रकम्।
पलकेनोद्धरिष्यामि दिश पन्थानमग्रतः ॥

स्त्री—इत इतो भद्रमुख। ( निष्क्रान्तौ )।

३यः—अहो अस्य औदार्यम् ! येन स्वजीवनं संशयगतमुत्प्रेक्ष्यापि परार्थं प्रवर्तते।

२यः—अत्र औदार्यं कारणं सौन्दर्यं वेत्यत्र नास्ति मे निर्णयः।

४र्थः—धिक् प्रहसनम् !

देवव्रत धूतशीलेऽस्मिन् कलङ्कः कल्प्यते त्वया ।
स्वस्वभावानुरूप्येण वृत्तमन्यस्य मन्यते ॥

२यः—भवतु, समये द्रक्ष्यथ ।

४र्थः—बाढं द्रक्ष्यामः ।

( ततः प्रविशति सपुत्रया तया स्त्रिया सह प्रथमः )

१मः—मातः ! यथाकालमेव भवत्या वयं प्रबोधिताः स्मः, येनायं पुत्रकस्ते निराबाधं जीवनं प्राप्तः । यदि क्षणादूर्द्धं प्राबोधयिष्यः सत्यं पुत्रकं नालप्स्यथाः ।

स्त्री—वत्स, कृतज्ञतया न मे वाचः स्फुरन्ति । तत् किमपरं कथयामि, एवं कुर्वाणः सुचिरं सुखेन जीव ।

१मः—मातः ! नायमधिकं वक्तुं समयः । पश्य—

दहनेन प्रदह्यन्ते गृहस्थानाममी गृहाः ।
जीवनं संशयं प्राप्तं गतिस्तेषां सुदुर्गता ॥

तदलं मामधिकृत्य भवत्याः कृतज्ञतया, एनं दीर्घायुषं ते पुत्रकमिव मामपि दीनं पुत्रकमेव मन्येथाः । तत् क्षणमन्तराले तिष्ठ, यावदहं लब्धावसरस्त्वां मदीयाया मातुः सकाशं प्रापयिष्यामि, अलं स्वकुटुम्बपरित्राणमात्रव्यसनिना-मावासे तवावस्थानेन ।

स्त्री—अहो सुतरामनुगृहीतास्मि ।

१मः—आर्ये, नानुगृहीता खल्वेतेन भवती, परमहमेव सुतरामनु-गृहीतोऽस्मि । तथाहि—

* उपकाराय सामर्थ्यं धात्रा यस्मै वितीर्यते ।
स एव सुतरां धन्यो न त्वेवोपकृतो जनः ॥

तदलमत्र भवत्याः कृतज्ञतानिवेदनलाघवेन ।

स्त्री—भवतु, भवदनभिमतत्वेन परिहृत्य अन्तरालमेव समाश्रित्य मम पुत्रस्य प्राणदातारमपेक्षे ।

१मः—एवं क्रियताम् । ( निष्क्रान्ता सपुत्रा स्त्री ) ।

३यः—अये, कथञ्चित् प्रशान्तिमुपयातो ज्वलनः ।

१मः—अहो, भूयसा प्रयत्नेन पौराणां प्रासादमधिवसतां सैनिकादीनाञ्च प्रायः शान्तिमाप्तो वह्निः ! तथापि वह्निशेष ऋणशेषो व्याधिशेषश्च नोपेक्षणीया इति निःशेषमसौ शमयितव्यो वह्निः । अहो !

याक्च्छीघ्रं वृद्धिमायाति वह्निस्तावच्छीघ्रं नास्ति तस्योपशान्तिः ।
रोगः स्वल्पेनैव कालेन दृप्तः कालेनाल्पेनैव नोपैति शान्तिम् ॥

अहो दहनस्य नैष्ठुर्यम् !

बहुप्रयत्नैरुपकल्पितं गृहं क्षणेन नीत्वा बत भस्मशेषताम् ।
निराश्रयस्तेन कृतो जनोऽश्रयस्तरोस्तलं जातममुष्य सम्बलम् ॥

केचिद् बान्धवनाशशोकविकलाः क्रन्दन्ति तारस्वरं
केचिद् द्रव्यपरिक्षयेण परितो भ्राम्यन्ति मत्ता यथा ।
केचिद् वह्निशिखाविदग्धवपुषः सीदन्ति दीनस्वराः
कष्टा हन्त दशा विभाति पुरतो दैवी गतिर्दुस्तरा ॥

कथङ्कारमाविर्भूतोऽयमग्निरिति शक्यमिदानीं विचारयितुम् ।

वैरं शोधयितुं किं वा केनचिद्दुष्कृतं कृतम् ?
न सर्वपुरविध्वंसमस्मानमूढेन चिन्तितम् ॥

अथवा नूनं राज्ञो दुरन्तवृत्तदुर्मनायिताः पौरा एव राजकुलदाहं कल्पयन्तस्तथाऽनुष्ठितवन्तः । अहो मूढता पौराणाम् !

भूपतेरपराधेन दीनामात्या निपीडिताः ।
पश्यतामपि तेषां यत् केचिद्दग्धाः स्वबान्धवाः ॥

अथवा प्रतिकूले दैवे किं वा शक्यं प्रतिविधातुम् । अये, एते राजप्रासादात् सम्मिलिताः पुरुषाः एकैकशो निवर्तन्ते, प्रायेण शान्तिमुपगतो वह्निः ।

( नेपथ्ये 'अत्याहितं भो महदत्याहितम् !' )

सर्वे—किन्नु खलु स्यात् ?

( पुनः नेपथ्ये )

राजप्रासादमासाद्य हत्वा च द्वाररक्षिणः ।
हृतानि राजकोषस्य रत्नानि खलु तस्करैः ॥

१मः—( स्वगतं ) अहो, युक्तमनुष्ठितं तस्करैः, तथाहि—

अन्यायेनार्जितं वित्तमेवमेव प्रणश्यति ।
अनेन खलु चौराणां नास्ति पातकमण्वपि ॥

नूनमस्यैव साहसिकस्य कर्मणः सुसम्पादनाय वह्निप्रयोगोऽपि तस्करैरेव कृतः प्रतिभाति । अहो निपुणता चौरपरिवृढानाम् ! तत् केन खलु निपुणकेनायमधिष्ठितस्तस्करसमाजः ? अपिनाम परममित्रेण मे रत्नाकरेण समधिष्ठितः स्यात् ? अथवा कः सन्देहः ?

विना रत्नाकरं को वा साहसे तादृशे क्षमः ।
को वा पञ्चाननादन्यो जायतां गजमर्दनः ॥

तन्मयापि रत्नाकरमैत्रीमपदिश्य राज्ञः कोपविजृम्भितपरिहाराय कुटुम्बसौकर्याय च परममित्रं रत्नाकर एवानुवर्तितव्यः । तद् यावद् द्वितीयां मातरमादाय गृहं गत्वा स्वीयजनन्या समं मित्रमेवान्विष्य समीहितं सम्पादयामि ।

नैपथ्ये—'भो भो निशाधिकृता रक्षिणः ! एष महाराजः समाज्ञापयति—सत्वरं चौरग्रहणाय क्रियतां परिकरः ।

यदि न ग्रहणं शक्यं चौराणां श्वो रवौ स्थिते ।
तदा प्राणहरो दण्डः सर्वेषां वो विधास्यते ॥

१मः—अहो, विधिवैशसं स्वल्पवृत्तिभाजां रक्षिणाम् ! भवतु राजकुलमत्याकुलं वर्त्तते । तत् सत्वरं गच्छामि ।

सर्वे—अये, राजकुले चौर्यम् ! अहो महद् भयं प्राप्तम् ! तत् स्वं स्वं गेहं प्रति गच्छामः । ( निष्क्रान्ताः सर्वे ) ।

( ततः प्रविशति सचिवेन सह सपरिवारो राजा )

राजा—अहो, साहसं तस्कराणाम् !

उग्रे जाग्रति भूनाथे मयि दण्डनियामके।
ममैव गेहे चौराणां मर्यादाभङ्गसाहसम् ॥

आर्य मित्रावसो, नूनं सन्निधिस्थाः पुरुषा एव तस्करा इति मन्ये, अन्यथा कथं यावदेव ज्वलितो वह्निस्तावदेव सङ्गच्छते चौर्यसिद्धिः? तत् क्रियतां निपुणतया चौरनिर्णयप्रबन्धः। आदिष्टाश्च वृत्तश्रवणमात्रेणैव मया रक्षिणः;

मन्त्री—किमिति?

राजा—यदि न ग्रहणं शक्यं चौराणां श्वो रवौ स्थिते।
तदा प्राणहरो दण्डः सर्वेषां वो विधास्यते॥

मन्त्री—देव, न सन्निहितेष्वेव तस्करान पश्यामि।

राजा—अन्यथा दैवाद् वह्निज्वलनदशायां शून्यं राजपुरं वीक्ष्य नासन्निहितानां तदैव युक्ता प्रवृत्तिः?

मन्त्री—देव, वह्निप्रयोगमपि चौरप्रयुक्तमेव सम्भावयामि। नियतं निपुणकेन केनापि साहसिकेन नियन्त्रा समधिष्ठितश्चौरसमाजः, येनैवं सम्भाव्यते।

राजा—अहो, नूनमविचारितमनुष्ठितं दुर्गेश्वरलिपिलाभपर्याकुलेन मया सबलवाहनानसंख्यानेव सैनिकान् दुर्गं प्रति सम्प्रेष्य प्रायेण पुरमिदं निःसहायं कृतवता! तत् स्वकृतस्यैव कर्मणः फलमिदमास्वाद्यते।

मन्त्री—देव, तत्रापि संशयितोऽस्मि।

राजा—कीदृशः संशयः?

मन्त्री—अपि नाम सा लिपिरपि कूटघटिता स्यात्?

राजा—आर्य मित्रावसो, नैवं सम्भवति।

मन्त्री—कथमिव?

राजा—सुष्ठु प्रत्यभिज्ञायते मया दुर्गेश्वरस्य सिंहवर्मणो हस्तलेखः।

मन्त्री—आम्! सुनिपुणैः कूटेन घटिता लेखाः सुतरामादर्शलेखमनुकुर्वन्ति।

राजा—आर्य, अप्येवं सम्भवति?

प्रविश्य प्रतीहारी—जयति, जयति देवः।

राजा—अयि, जयसेने ! सम्भ्रान्तासि, तद् विवक्षितं ब्रूहि ।

प्रती—देव, एष तुरङ्गमारुह्य समागतो दुर्गेश्वरेण सिंहवर्मणा प्रेषितः पुरुषो महाराजं सत्वरं द्रष्टुमिच्छति ।

राजा—सत्वरं प्रवेशय ।

प्रतीहारी—यथाज्ञापयति देवः ( निष्क्रान्ता ) ।

राजा—आर्य मित्रावसो, पर्याकुलोऽस्मि, भवान् पुनः किं मन्यते ?

मन्त्री—दृढ एव मे तत्र संशयः । जानामि भवत्प्रेषितान् सैनिकान् सहैव च प्रेषितं पत्रमुपलभ्य विदिततत्त्वो विपत्परिहाराय सिंहवर्मा तुरङ्गेण पुरुषमिमं प्रेषितवानिति ।

राजा—भवतु, अनन्तरमेव निर्णयं गमिष्यामः ।

( प्रतीहारी पुरुषेण सह प्रविश्य )

प्रती—एष देवस्तिष्ठति, उपसर्पतु भवान् । ( निष्क्रान्ता ) ।

पुरुषः—जयति जयति देवः ।

राजा—भद्र, कथय अपि प्राप्ता दुर्गरक्षणाय इतः प्रेषिताः सैनिकाः ?

पुरुषः—देव, अथ किम् । तान् भवत्प्रेषितं पत्रञ्च समुपलभ्य सुतरां विस्मितो दुर्गेश्वरः पत्रमिदं विलिख्य भवन्तं सत्वरं प्रापयितुं तुरङ्गमेण मां प्रेषितवान् । तदिदं पत्रमेव देवं विदितार्थं करिष्यति ।

राजा—शीघ्रमुपनय ।

पुरुषः—इदं तत् पत्रम् ।

राजा—आर्य मित्रावसो, दृश्यतां पत्रम् ।

मन्त्री—( गृहीत्वा वाचयति ) स्वस्ति देवाय, एष प्रणतः सिंहवर्मा विज्ञापयति, सत्यपि निःसपत्ने दुर्गे शैलेश्वरेण दुर्गमाक्रान्तमावेद्य मन्नाम्ना कूटलेखसम्पादनेन दृढं वञ्चितः श्रीमान् केनापि । तत् सम्भावितानिष्ट-परिहाराय त्वरितगामिना तुरङ्गेणायं पत्रवाहः पुरुषः प्रेष्यते । ज्ञात्वा देवः प्रमाणम् । किञ्च नातिचिरमेव पुनः प्रेष्यन्ते श्रीमता परिप्रेषिताः सैनिका इति । एतत् पत्रम् ।

राजा—भद्र, गच्छ, विज्ञापय दुर्गेश्वरं सिंहवर्माणं सत्यं वञ्चितोऽस्मीति।

पुरुषः—यथाज्ञापयति देवः। (निष्क्रान्तः)।

राजा—आर्य, मित्रावसो, विस्मितोऽस्मि तस्कराणामनेन कपटप्रबन्धेन। तदस्य प्रतीकारश्चिन्त्यताम्।

मन्त्री—देव, नैते साधारणास्तस्कराः। महानेष तस्करसमाजो नूनं केनापि चतुरचूडामणिना नियामकेनाधिष्ठित इति तर्कयामि।

राजा—आर्य मित्रावसो, यथा तथा वा भवतु, आदिश्यन्तां दृढं राजपुरुषाः,

सन्देहो यत्र यत्र स्यात् तत्र तत्र कृतक्रमाः।
सान्त्वं वा परुषं वापि कुर्वतां चौरनिर्णयम्॥

आर्य, मित्रावसो, दुर्भिक्षेण सर्वतो विक्षुभिते जनपदे वृत्तभङ्गः सम्भाव्यते जानपदानाम्, श्रूयते च केचिद् अलब्धगतयः क्वापि प्रस्थिता इति, तदादौ त एव मृग्यन्ताम्।

दारिद्र्यदोषेण कुटुम्बयुक्ता ये राज्यमेतत् परिहाय याताः।
ये चाप्यकस्माद्धनिकाः प्रजाता दैन्यात् परं संशयगोचरास्ते॥

मन्त्री—युज्यते।

राजा—अहो, दुर्विलसितं साहसिकानाम्! न केवलं रत्नागारमेव चोरितम्, भूयसां प्राणिनां प्राणा अपि अपहृताः। तथाहि—

केचिद् विपन्ना ज्वलनेन दग्धाः केचित् स्वहस्तेन हताश्च दुष्टैः।
मन्त्री—प्राणैर्विहीना नहि दुःखभाजस्तापो महान् हा सुहृदां स्थितानाम्॥

राजा—भाग्येन खलु भवानभिरक्षितो भवद्गृहञ्च दूरतः परिवर्जितं हुताशनेन। प्रवरामात्यस्य वाचस्पतेः पुनः सुतरां कष्टा दशा वर्तते, येन तथा विपत्पाते प्रपन्नेऽपि तमाकारयितुं नाहं प्रावर्त्तिषि। भवतु, आर्य मित्रावसो, अलं विलम्बेन, भवान् स्वयमेव राष्ट्रियं कृत्ये नियोजयतु, एवं किल कृत्यं गुरुकं गृह्णीत। तदादिश्यतां मद्वचनाद् राष्ट्रियः—

मन्त्री—किमिति ?

राजा—एवमादिश्यताम्—

रात्रावेव चरन्तु राजपुरुषाः पौराश्चमानश्चमा
गुप्ता गुप्तकृपाणका बलभृतस्ते राष्ट्रियाधिष्ठिताः ।
ये चौरा धनहारिणः सपदि ते नाद्यापि दूरं गताः
पौरा वा यदि तस्करास्तदचिरं शक्या ग्रहीतुं हि ते ॥

प्रभातायाश्च रजन्याम्—

भूतावासतया प्रसिद्धभवनेष्वाप्त्वा प्रवेशं रहो
गेहान्तस्थितकानने च विजने घोरे चरित्वा परम् ।
शैले पत्तनसीम्नि काननवृते दृष्ट्या मुहुस्तीक्ष्णया
चौराणामपि चोरितस्य वसुनः कुर्वन्तु ते निर्णयम् ॥

अथवा आर्य मित्रावसो, भवता सह राष्ट्रियं दृष्ट्वा अहमेव स्वयं कृत्य-गौरवाय उपदिशामि ।

मन्त्री—एवमस्तु । ( निष्क्रान्तौ ) ।

तृतीयाङ्कः समाप्तः

---

# प्रशान्तरत्नाकरम्

## चतुर्थाङ्कः

( ततः प्रविशति विपणिस्थः सपुत्रो धनदत्तः )

धनदत्तः—वत्स, मणिदत्त, लेखं वाचय, येनाधमर्णानां शेषम् ऋणं ज्ञास्यामि ।

मणि—एष वाचयामि ।

प्रविश्य ब्राह्मणः—भो धनदत्त, दीयन्तामद्य मे पञ्चशरावमितास्तण्डुलाः ।

धन—वत्स, मणिदत्त, दृश्यतां लेखगतम्, कियदस्य ब्राह्मणस्य वैशम्पायनस्य देयमवशिष्यते,

मणि—एष पश्यामि ( लेखं निपुणं निरूप्य ) तात, सुमहदवशिष्यते ।

धन—कथय कीदृशमिति ।

मणि—विगतवत्सरात् प्रभृति सङ्कलनेन शतं सम्पद्यते ।

धन—धिग् ब्राह्मण, विगतवत्सरात् प्रभृति मूल्यं न ददासि, पुनरपि ऋणं काम्यते ? धिग् व्रीडाकरमिदं भवादृशाम्, तद्दीयतामतीतम् ।

ब्राह्मणः—भद्र, दास्यामि ।

धन—कदा दास्यसि ?

ब्राह्मणः—क्रमेण दास्यामि ।

धन—नहि, नहि, इदानीमेव दातव्यम् । दास्यामि-वादेन वत्सरो व्यतिक्रान्तः, पुनरपि दास्यामीति न युज्यते ।

ब्राह्मणः—भद्र, धनदत्त, किं कुर्मः दुर्भिक्षविक्षुभिते जनपदे न शक्यते

प्रभूतेनापि प्रयत्नेन धनमर्जयितुम्। तत् क्रियतामनुकम्पा, येन स्वजनान् जीवयितुं शक्नुयाम्।

धन—स्वविनाशतः परविनाशो गरीयानित्यबोधजल्पितम्। तन्नालमहमात्मनो विनाशेन परानभिरक्षितुम्।

ब्राह्मणः—भद्र, धनदत्त, प्रभूतधनशालिनस्तव किमेतावन्मात्रकेण अलब्धेनापि। तत् कियतः कालादनन्तरं दातव्यमित्यनुमन्यस्व।

धन—स्वार्थान्ध, ब्राह्मण, केवलं धनमेव मे पर्यालोकयसि, न पुनर्व्ययमपि, दृश्यतां व्ययमानं, येन प्रभूतमपि धनं स्वल्पमात्रं प्रतिभास्यति। दुर्भिक्षपर्याकुले महाभये जनपदे तस्करादिभ्य आपणपरिरक्षणार्थं नियुक्ताः शस्त्रधारिणः प्रभूतवेतनाः पुरुषाः, क्रयविक्रयादिव्यवहारनिर्वाहार्थमधिकृता दश निपुणाः कर्मठाः, गृहकर्मनिष्पादनार्थं शिशुरक्षणार्थञ्च सन्ति दासा दास्यश्च, सर्व एवैते समधिकं वेतनं गृह्णन्ति। अतः परं बान्धववार्ता,—मम स्वस्य तिस्रो भार्याः, प्रत्येकं पञ्च पुत्राः, प्रतिभार्यं श्वशुरः श्वश्रूः श्यालाः श्यालपत्न्यः श्यालानां पुत्राः पुत्रिकाश्च। वृद्धा जननी तस्याः सपरिजनाः पञ्च भ्रातरः, तिस्रो भगिन्यः पितुः स्वसारः पितृव्याः तत्पुत्राः अन्ये च परम्परया सम्बन्धिनः परिकल्पितसम्बन्धाश्चेति कियतां नाम्ना निर्देशं करोमि ? सर्व एवामी मयि प्रभुभावेन वर्तमाना नक्तन्दिवं सविलासं कालं यापयन्ति। उपकरणानि पुनर्मयैव निष्पादनीयानीत्यत्र किंवा बहु वक्तव्यम् ? तदेवं गते भूयांसोऽप्यर्थाः किमु चिरं तिष्ठन्ति ? बाह्यास्तु जना मुग्धाः केवलमायमेव समीक्षन्ते न पुनर्व्ययभारमपीति प्रभूतवित्तमेव मां सम्भावयन्ति। तदनुगुणं तेषु समनुष्ठातुमशक्नुवन्तञ्च मां नितरां मितम्पचमेव समामनन्ति। तदत्र कथं वा मया शक्यं प्रतिकर्तुम् ?

ब्राह्मणः—भद्र, धनदत्त, उपायान्तरमनीक्षमाणः कथयामि, न तु स्वार्थान्धतया, महालोहभारे शाकगुच्छक इव तवायं भारो नैव दुर्वहतां दधीत, तत् क्रियतां गतिरहितस्य दीनस्य मे कृपालेशः, देवतास्ते स्वस्ति करिष्यन्ति !

धन—एवमेव एकैकशः शाकस्तवकप्रचयेन महान् भारः सम्पद्यते। यः सबलैरपि दुर्वहो भवति। न भवान् एक एव तादृशः, सन्ति शतानि तथाभूतानां, ये भिक्षावृत्तयः परान् परिक्लेशयन्ति। तदलमद्यापि व्रीडाकरेण प्रार्थनानुबन्धेन, त्वमेव पन्थानमवलोकयस्व।

ब्राह्मणः—हा हा निराशोऽस्मि परिजनजीवितेषु। भद्र, धनदत्त, अनिच्छयाऽपि प्रमादेनापि वा धनिकानां बहूनि धनानि नश्यन्ति, एतदपि मत्वा निष्कपर्दके दरिद्रे दयस्व। देवतास्ते स्वस्ति विधास्यन्ति।

धन—मा तावद् भोः! न शक्यते, कथमनर्थमाक्रन्दसि।

ब्राह्मणः—( स्वगतम् ) अथवा का गतिः? कृपणाः खलु वणिजः! तदन्यत्र गत्वा भिक्षाप्रयत्नमनुतिष्ठामि। भगवन् प्रजापते, कथं त्वया दुःखमात्रपरिभोगाय दरिद्रसमाजः सृष्टः? यदि सृष्टः किमित्यनुभवशक्तिस्तत्र वितीर्णा? हा! हा!!

क्षुधा क्लान्तः पुत्रो मृगयति यदा स्वल्पमशनं
प्रदातुं तत्तस्मै कथमपि यदा नालमधमः।
तदा किं मूर्च्छा मां न खलु वृणुते शान्तिशरणं
हतं भाग्यं नित्यं रिपुसमुचितं कर्म कुरुते॥

तदात्मनो भाग्यानुरूपमेव व्यवस्यामि। ( प्रकाशम् ) भद्र, धनदत्त, एष गच्छामि, स्वस्तिमान् भूयाः! ( निष्क्रान्तः )

( ततः प्रविशति सपौत्रो वृद्धश्च्यवनः )

च्यवनः—अहो, सुतरां प्रसन्नमद्यान्तःकरणं मे, यत् सर्वाण्यपराणि ऋणानि परिशोध्य परिजनपरिपोषणाय चिरस्य परिगृहीतं धनदत्तस्यापि सुमहद् ऋणं परिशोधयिष्यामीति। तथाहि—

त एव लोके सुकृतेन धन्या-
स्त एव जीवन्ति सुखेन सन्तः।
ये नोत्तमर्णस्य दृशोः कटाक्षं
न वाऽधमोक्तिं समनुस्मरन्ति॥

अहह ! हीनस्याप्युत्तमर्णस्य दर्पः सर्पप्रभाववत् ।
शस्तस्याप्यधमर्णस्य हीनता दीनताफला ॥

अपिच,—

दृष्ट्वोत्तमर्णस्य मुखं सुदूराद्
यात्यन्तरालं सहसाऽधमर्णः ।
मन्त्रौषधिभ्यामिव रुद्धवीर्यः
सर्पो नतिं गच्छति तत्समीपे ॥

तदद्य सममेव सर्वमृणं धनदत्तस्य निर्यातयितुं सामर्थ्यमुपगतः कृतकृत्यमेवाऽऽत्मानं सम्भावयामि । अहो कीदृशः खल्वसौ महानुभावो रत्नाकरस्य प्रियः सखा, यः स्वीयप्रभूतधनविसर्जनेन बन्धुकुलमिदमनुगृह्णाति ?

अथवा,— धन्यं धनं तस्य महोन्नतस्य
सुरक्षितो येन धनेन बन्धुः ।
विपद्गतं बन्धुमुपेक्ष्य मोहाद्
वित्तं प्रपुष्णन्ति पिशाचकल्पाः ।

तन्नूनमेतस्य सुकृतप्रबन्धेन देवतास्तुष्टाः सर्वतः स्वस्ति करिष्यन्ति । भवतु साम्प्रतं समीहितसाधनाय धनदत्तमुपसर्पामि । वत्स, आत्रेय, एतद् धनदत्तस्य भवनं यावत् प्रविशावः ।

आत्रेयः—यथाज्ञापयति पितामहः ।

धन—( दूराच्च्यवनं दृष्ट्वा ) अये, एकस्य निष्क्रमणानन्तरमेव द्वितीयः प्राप्तः ? एष च्यवनो नूनमस्माकमेव वणिजां महता भाग्येन कतिचिद् दिनानि भिक्षाद्युपायैः परिजनान् परिपुष्य पुनरद्य मन्ये ऋणार्थमेव समुपस्थितः । अहो रे ! कष्टा खलु धनिकता ! तथाहि—

श्रीभाजं प्रसमीक्ष्य भिक्षुकजना याच्ञाव्रतैरन्वहं
क्लेशं वित्तवतां दिशन्ति तदनु प्रान्ते स्थिता बान्धवाः ।
तत्पश्चादपि साहसेन विधिना दृप्यत्तरास्तस्करा
वित्तानां परिरक्षणाय धनिकाः पर्याकुलाः सर्वदा ॥

यद् भवतु तद् भवतु, समुपस्थितस्य च्यवनस्य आसनादिभिरुपचारैर्विशेषतः समादरं न प्रदर्शयिष्यामि। अथ तथापि यदि ऋणं याचेत, तदा—

परुषेणैव वादेन भूतपूर्वमृणं बहु।
स्मारयंश्च्यवनं वृद्धं प्रत्याख्यास्यामि निश्चितम् ॥

वत्स, मणिदत्त, दृश्यतां च्यवनस्य नामलेखः, कियदनेन ऋणं निर्यातनीयमिति।

मणि—तात, एष पश्यामि ( लेखं वीक्षते )।

( ततः प्रविशति विषण्णो राजपुरुषः )

राज-पु—हा कष्टम्! व्यतीता निशा, व्यतीतप्रायश्चायं दिवसः प्राणैः पणैः सर्वत्र चौरसमाजमन्विष्यतां राजपुरुषाणाम्! परमद्यापि कुत्रचिन्नासादिता तस्य वार्त्तापि। हा हन्त अद्यतनदिवाकरस्यास्तमनेन सहैव नूनममीषां दीनानां जीवनदीपो निर्वाणमेष्यति। अपि नाम सममेव कृतमेतैः किमपि तादृशं दुष्कृतं कर्म, येन युगपदेव जीवनमेषां विलुप्येत? भगवन् सूर्य, नित्यमेव तिमिरमपाकृत्य जगतः सर्वाणि वस्तूनि प्रकाशयसि, तदिदानीं दर्शय चौरहतकान्, येन यामिकानां सर्वेषामेकदैव प्राणविपत्तिर्न स्यात्। अथवा,—

दीनेष्वद्य कृपावेशान्माऽस्तं गच्छ दिवाकर!
त्वयाऽस्तं गच्छता सार्द्धमस्तं यास्यन्ति यामिकाः ॥

( परिक्रम्य ) हा धिक् कष्टम्! चौरान्वेषणाय सर्वामेव निशां सर्वञ्च दिवसं निराहारमटतो मे नातः परं पादा अपि प्रसरन्ति। तदेष दृश्यते आपणस्य सुसन्निहितः पिप्पलपादपः, तदस्यैव तले क्षणं विश्रम्य पुनः समीहितसाधनाय प्रवर्त्तिष्ये। ( परिक्रामति )

धन—वत्स, दृष्टम्!

मणि—अथ किम्!

धन—तत् कथय।

मणि—सार्द्धशतम्।

धन—सार्द्धशतम् ? अपि निपुणतया दृष्टम् ?

मणि—अथ किम् ।

धन—अपि कृतं कुसीदसङ्कलनम् ?

मणि—आं ! न कृतम् ।

धन—आ मूर्ख, एवं किल वाणिज्यं वर्द्धयिष्यसि ? त्वया समधिष्ठितं सर्वमेव मे क्लेशसञ्चितमैश्वर्यं विनाशं प्राप्नुयात् । हा अदृष्ट !

मणि—मर्षयतु मर्षयतु तातः । एष क्षणेन सङ्कलय्य कथयामि । ( रेखां पातयित्वा ) तात ! शतद्वयी ।

धन—आम् ! नूनमिदमिदानीं यथार्थं निर्णीतवानसि, एष च्यवनः समुपस्थितप्रायो लक्ष्यते । तदस्यागतस्य वैमुख्यमासाद्य कार्यान्तरव्यग्रता प्रदर्शनीया, मा नाम समादरः !

मणि—यथाज्ञापयति तातः ।

(ततः प्रविशति प्रसन्नमुखः सपौत्रश्च्यवनः )

च्यवनः—स्वस्ति सपरिजनाय धनदत्ताय ।

धन—प्रणमामि । अरे रत्नदत्त, एषा तण्डुलपूर्णा गोणिका इह बहिरेव स्थापिता । शीघ्रमिमां गृहस्यान्तः प्रवेशय । हा हा भवतामौदासीन्येन सर्वमेव मे वाणिज्यं विनष्टं स्यात् !

च्यवनः—भद्र धनदत्त, अपि कुशली भवान् सपरिजनः ?

धन—अथ किम् । अरे रक्षिणः, सावधानास्तिष्ठत, येन साहसिका वा भिक्षवो वा समेत्य न वाणिज्यादिविघ्नमनुतिष्ठेयुः ।

च्यवनः । अहो हीनता धनदत्तस्य । यदेष साहसिकानां भिक्षूणाञ्च तौल्यं पश्यति ! ( प्रकाशं ) भद्र, मणिदत्त, लेखमालायामन्विष्यतां मदीयनामलेखः ।

धन—अरे मणिदत्त, अपेक्षितमादौ पश्य, लिख्यतां चारुदत्तेन वैश्येन दशशरावमितं तैलं गृहीतम्, शोभनशर्मणा च गृहीताः पञ्चद्रोणमितास्तण्डुला इति ।

मणि—( लेखमभिनीय ) तात, लिखितम् ।

च्यवनः—भद्र, मणिदत्त, इदानीं दृश्यतां मदीयनामलेखः ।

धन—कथमिव ? पुनरपि ऋणग्रहणार्थम् ? मा तावद् भोः ! सुचिरात् पूर्वं गृहीतस्य उपकरणजातस्य निःशेषं मूल्यमप्रयच्छतो नास्ति पुनरद्य वस्तुलाभः ! तद् विरम्यताम् ।

च्यवनः—भद्र, धनदत्त, अलमधिक्षेपेण

दारिद्र्यविषदग्धानामिच्छापि प्रतिहन्यते ।
न मनोऽपि दरिद्राणामृणदानपराङ्मुखम् ।

धन—अयि भोः ! मनोमात्रेणैव नोत्तमर्णस्य कृत्यसिद्धिः । तदतीतं निःशेषं निर्यातय, ततो नूतनमृणं लप्स्यसे ?

च्यवनः—भद्र, धनदत्त, तदर्थमेव समागतोऽस्मि । नवीनम् ऋणं न पुनर्ग्रहीष्यामि, अतःपरं यदा यदपेक्षितं तदा मूल्यमदत्त्वा न तद् ग्रहीतुमिच्छामि ।

धन—आर्य च्यवन, कियद्दातव्यं मन्यसे ?

च्यवनः—सर्वमेव दास्यामि ।

धन—आम ! एवमिदम् ? अरे मणिदत्त, लेखं दृष्ट्वा वाचय, कियदनेन प्रदेयमिति, स्पष्टं श्रुत्वा निवर्तताम् । हंहो दैव, एष मन्यते पञ्चषैरेव वा कपर्दकैॠणस्य मोक्ष इति । तत् कथय ।

मणि—आर्येण च्यवनेन शतद्वयमृणं निर्यातयितव्यम् ।

च्यवनः—भद्र, धनदत्त, एष ददामि, गृह्यतामिदं शतद्वयम् । ( वस्त्रग्रन्थिमुन्मोच्य उपनयति )

धन—( स्वगतं ) अये सत्यमेव ददाति ? आश्चर्यमाश्चर्यम् ! अस्य तावताऽल्पकालेन कथमेतावती समृद्धिः ? ( प्रकाशम् ) आर्य, प्रणमामि, मर्षयतु मर्षयतु भवान् मम मन्दभाग्यस्य क्रियान्तरान्तरायजनितमपराधम् ! अरे कः कोऽत्र ? आर्यस्य च्यवनस्य आसनमुपनय, अरे मणिदत्त, अद्यापि मध्यस्थ इव लेखं पश्यसि ? शीघ्रमार्यस्य पादौ

गृहाण। आ मूर्ख, गुरुजनपरिचर्यामपि न जानासि? कथमेतावता युष्माकं कल्याणं सम्पत्स्यते? अरे रत्नदत्त, शीघ्रमस्य बालस्य मत्स्यण्डिकाखण्डमुपहर। अहह! किमहं स्थविरः सर्वत्र युगपद् दृष्टिं प्रवर्तयितुं शक्नोमि? हा हा! सर्व एवामी मध्यस्थाः कर्तव्यार्थेषु! न जाने का पुनरेषां गतिरग्रतो भविष्यति?

( सर्वे यथोक्तं कुर्वन्ति )

च्यवनः—भद्र, धनदत्त, अलमेषामनिमित्तेनाधिक्षेपेण। गृह्यतामिदं तत् शतद्वयम्।

धन—( स्वगतं ) अहो लाभः! दिष्ट्या खल्वद्य वर्द्धामहे। (प्रकाशं) आर्येण प्रदत्तमिदं न स्वहस्तेन ग्रहीतुं शक्यते। अरे मणिदत्त, गृहाण, का गतिः?

मणि—एष आर्यादेशाद् गृह्णामि। ( निपुणं परीक्ष्य संख्याय च शतद्वयं गृह्णाति )

धनः—आम्! निपुणः खलु वत्सो मे मणिदत्तः कार्यं जानाति। आर्य अस्ति मे किञ्चित् कौतूहलम्।

च्यवनः—किमधिकृत्य?

धन—कुतः खल्वयमार्यस्य अकस्मादेतावद्धनागम इति। तद् यदि मया श्रोतव्यमिदं मन्यते, तदा मामेतत्कथनेनानुग्रहीतुमर्हत्यार्यः।

राजपुरुषः—आम्! ममाप्यस्ति कौतूहलम्! तद् अवधानेन शृणोमि! अपि नाम विधिरिहैवास्मासु करुणां कुर्वीत?

आत्रेयः—कथं वा न श्रोतव्यम्? मम तातेन पूर्वेद्युः सुबहूनि धनान्यानीतानि।

धन—रत्नाकरेण?

आत्रेयः—अथ किम्।

धन—आर्य, अपि सत्यम्?

च्यवनः—अथ किम्। चिरादनन्तरं दैवेनाद्य वयमनुगृहीताः।

धन—( स्वगतम् ) अये, कुतः खलु सहसा रत्नाकरस्य तावान् धनागमः ? तत् संशयितोऽस्मि।

राजपुरुषः—( स्वगतं ) अये, नूनमत्रैवास्माकमपि दैवेनानुग्रहः कृतः ! महदिदं सन्देहपदं वर्तते। यदैव राजप्रासादात्तस्कराणां प्रभूतधनहरणं तदैव रत्नाकरस्य दरिद्रस्यापि गेहे प्रभूतधनागम इति। तद् वृत्तमिदमविलम्बित-मेव राजकुले निवेद्य रक्षिणां प्राणान् परिरक्षामि ( निष्क्रान्तः )।

धन—आर्य, बहुतिथः खलु कालो मे मन्दभाग्यस्य भगवत्पाद-सन्दर्शनेन वञ्चितस्य। तत्तादृशीं दुर्गतिं गतस्यापि भगवतः कथमेतावता कालेन तादृगवस्थापरिवृत्तिरिति विशेषतः श्रोतुमिच्छामि।

च्यवनः—भद्र, धनदत्त, श्रूयतां यदि कौतूहलम्। जानास्येव त्वं यथा पूर्वतः प्रायेण प्रत्यहमेव त्वत्समीपतः 'परतो निर्यातयिष्यामि' इत्युक्त्वा सर्वोपकरणमूल्यम् ऋणीकृत्य संसारयात्रां निरवाहयमिति।

धन—एवं जानामि। अथवा किमिदम् ऋणं मन्यते ? सर्वमेव मामकं वस्तु स्वकीयमवगन्तुमर्हत्यार्यः।

च्यवनः—अथ यदा अल्पेनाल्पेनापि प्रत्यहमुपचीयमानेन ऋणभारेण भारो महानेव बभूव, तदा लज्जया पुनः प्रार्थनाय भवत्समीपमुपगन्तु-मसमर्थो भिक्षामेव समालम्बितवानस्मि।

धन—ततस्ततः ?

च्यवनः—ततः क्रमेण दुर्भिक्षपीडिते जनपदे भिक्षापि सुतरां दुर्लभता-माससाद।

धन—ततस्ततः ?

च्यवनः—ततः कदाचित् क्षुधार्तेषु परिजनेषु रत्नाकरः पुत्रो मे भिक्षाट-नाय बहिर्गतः। अथ क्रमेण पश्चिमाकाशप्रान्तपतितेऽपि सवितरि तम-प्रत्यावृत्तं समीक्ष्य गृहे क्षुधया सुतरां परिक्लिष्टान् स्वजनानुपेक्षितुमशक्तः स्वयमपि भिक्षार्थं बहिर्गन्तुमुपक्रान्तो मूर्च्छितः पतितोऽभूवम्। तदैव च

रत्नाकरः प्रभूतोपकरणसमेतो गृहे प्रत्यावृत्तः सर्वान् समुज्जीवितवान्। पृष्टश्चासौ 'केनापि मित्रेण स्वनामकीर्तनमनिच्छता सर्वाण्युपकरणानि दत्तानी'त्यवोचत्। ततः प्रभृत्येव सुखेन संसारयात्रां निर्वर्तयामि। एवमन्तरान्तरैव तेन रत्नाकरस्य परममित्रेण प्रदीयन्ते सर्वाण्युपकरणानि। सम्प्रति च तेन पुनस्तावन्ति धनानि प्रदत्तानि, यैः सुतरामेव दारिद्र्यानमुक्तोऽस्मि।

धन—अहो! परमोदारं खलु मित्रं रत्नाकरस्य, किन्तु नासौ भवतापि नाम्ना परिज्ञायते?

च्यवनः—नहि, नहि, केवलममुं रत्नाकर एव जानाति। रत्नाकरोऽपि प्रायेण तस्यैव गेहे रहस्यमवतिष्ठते। अस्माभिरपि तद्विज्ञानाय न तथा क्रियते निर्बन्धः!

धन—(अपवार्य पुत्रं प्रति) हा मूढ, एवं कञ्चन सुहृदमपि नासादयितुमर्हसि? (प्रकाशम्) तदिदानीं दिष्ट्या सुखित आर्यः?

च्यवनः—कथमपि देवताप्रसादात्।

(ततः प्रविशति राजपुरुषैः सह राष्ट्रियः)

राष्ट्रियः—आं समादिष्टोऽस्मि महाराजेन, यथा राष्ट्रिय, भिक्षामात्रजीवी रत्नाकरस्य पिता च्यवनो नाम सहसा प्रभूतधनसमृद्धो धनदत्तस्याद्य शतद्वयम् ऋणं निर्यातयति, तदेतेन गृहीतप्रायं तस्करमवगच्छामि, त्वं सत्वरं धनदत्तस्यापणे गत्वा च्यवनं सपौत्रं बद्ध्वा कठोरकशाप्रहारैः सन्ताड्य प्रकृतं तथ्यं मूढस्य रत्नाकरस्य स्थितिपदञ्च समुद्घाटयेति। तद् यावत् तत्र गत्वा स्वं नियोगमशून्यं करोमि। (दृष्ट्वा) अये एष सपौत्रश्च्यवनो धनदत्तस्यापणमधितिष्ठति, तद् यावत् प्रकृतमनुतिष्ठामि। (उपसृत्य) अरे राजपुरुषाः! किमद्यापि पश्यथ, बद्ध्वा सबालमेनं ब्राह्मणं ताडयित्वा राजादेशमशून्यं कुरुत।

(राजपुरुषा यथोक्तमनुतिष्ठन्ति)

च्यवनः—अब्रह्मण्यं भो अब्रह्मण्यम्!

आत्रेयः—भो राजपुरुषाः! कथं निरपराधेष्वस्मासु एवं कुरुथ?

राष्ट्रियः—धिक् प्रागल्भ्यम्! अयमपि कारणं पृच्छति! अरे किं पश्यथ, पीडयत। ( राजपुरुषास्तथा कुर्वन्ति )

च्यवनः—भद्र, राष्ट्रिय, किमेवं निरपराधानस्मानेवं पीडयसि ?

राष्ट्रियः—भो ब्राह्मण, परकीयं धनं स्वीयं कृत्वा ऋणं निर्यातयतामपि यदि नापराधाः ? कस्य तर्हि अपराधः स्यात् ? अरे धनदत्त, दीयतां सर्वमिदं धनं, यत् प्रतिपादितमनेन साहसिकेन।

च्यवनः—भद्र, राष्ट्रिय किमिति, नावधारयामि ?

राष्ट्रियः—अवधारयिष्यसि। अरे धनदत्त, देहि शीघ्रम्।

धन—भद्र, राष्ट्रिय, किमिव ?

राष्ट्रियः—किं वा प्रष्टव्यम् ? ( कर्णे ) एवमेवम्।

धन—आम् एवमिदम् ? ममाप्येवमेव संशयः। अहो दशाविपर्यासेन च्यवनस्यैवं चित्तपरिवृत्तिः, रत्नाकरस्यापि ? अथवा सर्वमेव सम्भाव्यते दशाविपर्यासेन! तत् का गतिः ? अरे मणिदत्त, दीयतां सर्वमेव तद्धनम्, यदनेन च्यवनेन दत्तम्! ( स्वगतं ) अहह! शतद्वयमद्य महता भाग्येन करतलगतमपि नश्यति! हा दैव! ( ललाटे कराघातं करोति ) अथवा मूढः खलु मणिदत्तो यः संख्यालेखविचारेण महान्तमेव कालं यापितवान्। च्यवनोऽप्यतिवृद्धतया सुतरां मूढो यः कालमनपेक्ष्य सद्य एव ऋण-निर्यातनाय मामभियातः। ( प्रकाशं ) अरे मणिदत्त, किं विलम्बसे, सत्वरं देहि।

मणि—तात, किं कथयसि, किं ददामि ?

राष्ट्रियः—अद्यापि नावधारयसि ? च्यवनेन दत्तं शतद्वयम्।

मणि—च्यवनेन दत्तम्! अपि तद्दत्तं च्यवनेन ?

च्यवनः—अथ किम् ? प्रदत्तमेव तत्।

मणि—कः साक्षी ?

राजपुरुषः—(उपसृत्य) ननु अहमेव साक्षी।

मणि—कथमिव ? भवानिदानीमेव समागतः।

राजपुरुषः—वणिक्कुमार, अलमनेन कूटप्रबन्धेन, च्यवनेन वसन-ग्रन्थितः समुद्धृत्य प्रदत्तं, त्वया च विशेषतः परीक्ष्य गणयित्वा गृहीतम्।

मणि—किमेवं वदसि ? अहन्तु तथा न स्मरामि।

राष्ट्रियः—भोः पुरुष ! सत्यं ब्रवीषि ?

राजपुरुषः—स्वामिन्, अथ किम्, किमसत्यं स्वामिने महाराजाय च क्षेमकामो निवेदयति ? एष च्यवनाद् गृहीत्वा सन्निहितायां लोहपेटिकायां स्थापितवान्।

राष्ट्रियः—अरे वणिक्पुत्र, उद्घाट्यतां लोहपेटिका।

मणि—( अन्विष्य ) अहो ! अस्याः कुञ्चिका नासाद्यते, क नु खलु सा ?

राष्ट्रियः—दुष्ट, वणिक्कुमार, एष कुञ्चिकामासादयिष्यसि। अरे, राजपुरुषाः ! एष ताड्यतां तावत् यावत् कुञ्चिका नासाद्यते।

( राजपुरुषाः—कशाभिर्मणिदत्तं ताडयन्ति )

मणि—हा हतोऽस्मि, हा मारितोऽस्मि !

धन—भो राजपुरुषाः ! मर्षयत, मर्षयत, एषः अहमेव कुञ्चिका-मन्विष्य धनं ददामि। ( जनान्तिकम् ) मूर्ख, राजपुरुषेष्वपि तथा छलं कुरुषे ? धिङ् मूर्ख ! (स्वगतम्) अथवा नूनमेवं वाणिज्यं वर्द्धयिष्यति। भवतु प्रकृतमनुतिष्ठामि। ( कुञ्चिकामासाद्य तया लोहपेटिकामुद्घाट्य ततो गोणी-गतं शतद्वयं राष्ट्रियाय उपनयति ) भद्र, इदं तद् गृह्यताम्।

राष्ट्रियः—इदं गृह्यते। ( गृहीत्वा ) भोः सत्यवादिन्, वणिक्पुत्र, इदानीं स्मरसि यत् च्यवनेन शतद्वयं दत्तमिति ?

मणि—अथ किम्।

राष्ट्रियः—भो राजपुरुषाः ! निगडेन बद्ध्वा एनं ताडयन्तो राजकुलं नयत, यावदस्य राजधनमपह्नुवानस्य महाराजः स्वयमेव प्राणहरं दण्ड-माज्ञापयति।

राजपुरुषाः—यथाज्ञापयति स्वामी। ( बद्ध्वा ताडयन्ति )

मणि—( सवैक्लव्यम् ) हा हतोऽस्मि, हा हा मारितोऽस्मि !!

धन—भद्र, राष्ट्रिय, मर्षयतु मर्षयतु भवान्। अज्ञानेनेदमनुष्ठितम्।

राष्ट्रियः—मूढ, किं न ज्ञायते, यदज्ञानेनापि समास्कन्दितो वह्निर्दहत्येवेति। तदनुभवतु मूढो राजापथ्यकारितायाः फलमिदानीम्।

धन—भद्र, राष्ट्रिय, अनुकम्पस्व माम्। ( जनान्तिकम् ) किञ्चित्ते सुरामूल्यं दास्यामि।

राष्ट्रियः—आम् ! अथवा वाङ्मात्रे कः प्रत्ययः ?

धन—एतद् गृहाण ( ददाति )।

राष्ट्रियः—एका सुवर्णमुद्रा ? धिक् ! न तावन्मात्रेण शक्यते मोक्तुम्। अरे ताड्यतां पुनरपि।

धन—( स्वगतम् ) हा दैव ! ( प्रकाशम् ) भद्र, मर्षयतु भवान् मर्षयतु। एषः अपरामपि ददामि।

राष्ट्रियः—अरे मुच्यतामिदानीमेषः। पुनरप्येवं कुर्वाणो न सोढव्यः।

धन—को वा सन्देहः।

राजपुरुषाः—यथाज्ञापयति स्वामी। ( मणिदत्तं कण्ठे धृत्वा क्षिपन्ति ) गच्छ रे वराक, स्वामिना मुक्तोऽसि।

मणि—अहो उज्जीवितोऽस्मि।

धन—( स्वगतं ) हा हा सुवर्णमुद्राद्वयं मे विनष्टम्। हा मूर्खपुत्र !

मणि—तात, अलमतः परमपि आपणप्रसारणेन ! सम्प्रति आपणे कबाटं योजयित्वा रक्षिपुरुषान् रक्षणाय संन्दिश्य गेहं प्रतिष्ठामहे।

धन—एवमस्तु। बहुप्रत्यवायो राजपुरुषसन्निधिः। ( प्रकाशम् ) भद्र, राष्ट्रिय, गमनाय नः समाज्ञापयितुमर्हसि।

राष्ट्रियः—एवम्, शक्यमिदानीं प्रस्थातुम्।

धन—( पुत्रेण सह गच्छन ) हा मूर्ख, तवैव बुद्धिलाघवेन न केवलं करगतं शतद्वयं भ्रष्टम्, परं तत्कुसीदरूपेण सुवर्णमुद्राद्वयमपि हारितम्।

मणि—आम् ! सुवर्णमुद्राद्वयम् ? मत्परित्राणाय ? हा धिक् हा धिक् ! तात, अलं मे परित्राणेन ! अलं मे परित्राणेन !!

धन—आः मूर्ख, विरम विरम, अलमिदानीमतिमौर्ख्येण। गच्छ।

मणि—हा सुवर्णमुद्रायुगल ! कदा पुनस्त्वद्दर्शनं लप्स्ये ? (निष्क्रान्तौ)।

राष्ट्रियः—अरे, राजपुरुषाः ! साम्प्रतं प्रकृतं साधयत। ताडयत पुनरपि सपौत्रं च्यवनम्। ( राजपुरुषास्तथा कुर्वन्ति )

च्यवनः—भद्र, राष्ट्रिय, किन्तु खलु बालमेनं वृद्धञ्च मां निर्दयं ताडयसि। विशेषतः कथय, को नामावयोरपराध इति।

राष्ट्रियः—भो ब्राह्मण, कुतस्ते भिक्षामात्रोपजीविनोऽपि एकपदे तावान् धनागमः ?

च्यवनः—कथमस्माकं धनागमे दोषसन्देहः ? तत् किन्तु खल्विदम् ? अथवा

दारिद्र्यस्य प्रभावोऽयं यद्दीने दोषसंशयः।
देवताः स्वस्ति कुर्वन्तु दोषशून्याय मेऽचिरम् ॥

राष्ट्रियः—भोः कथय, अलं मिथ्याश्रयणेन।

राज्ञां चारदृशां नास्ति किमप्यविदितं रहः।
सत्यं कथय भद्रन्ते येन सम्भाव्यते पुरः ॥

च्यवनः—भद्र, राष्ट्रिय, जीवनान्तेऽपि समुपनते च्यवनो न मिथ्या प्रयुङ्क्ते।

राष्ट्रियः—अत एवासौ परधनं स्वीयमिति कृत्वा भृशं निर्यातयितुमुपक्रमते।

च्यवनः—अहो धिग् व्रीडितोऽस्मि।

आत्रेयः—भो राष्ट्रिय, किमेवमसम्बद्धमभिधीयते ?

राष्ट्रियः—असम्बद्धमिति ? धिक् शान्तम् ! मूढ, अपि जानासि, कुतो युष्माकमकस्मादेतावद्धनागम इति ?

आत्रेयः—कथं न जानामि ?

राष्ट्रियः—तत् कथय, कुत इति ।

आत्रेयः—तातप्रसादात् ।

राष्ट्रियः—स तातप्रसादः कस्य प्रसादात् ?

आत्रेयः—तदीयस्य मित्रस्य प्रसादात् ।

राष्ट्रियः—अपि जानासि तस्य मित्रस्य नामधेयम् ?

आत्रेयः—न जानीमः ।

राष्ट्रियः—वयं जानीमः—

च्यवनः—भद्र, कथय, किमिति ?

राष्ट्रियः—पूर्वेद्युः साहसेन राजकुले चौर्यमिति ।

च्यवनः—( स्वगतम् ) अहो ! स्फुटमिदमिदानीम् । तत् किम् ईदृश एव रत्नाकरः संवृत्तः ?

आत्रेयः—धिक् ! मिथ्यैतदाह ।

राष्ट्रियः—अहो रे साहसं चौरपुत्रकस्य ! नातः परमपि शक्यं सोढुम् । अरे राजपुरुषाः ! कर्कशकशाघातेन सत्वरमेनं प्रगल्भबालं शमं लम्भयत । मूढ, चौरपुत्र, पुनः पुनरेव आत्मानमविजानन् जल्पसि ? अरे राजपुरुषाः !

राजपुरुषाः—यथाज्ञापयति स्वामी । ( तथा कुर्वन्ति )

च्यवनः—भो राष्ट्रिय, मा तावदेवम् । मर्षय भो मर्षय—भो भो राजपुरुषाः ! मा तावदेवम् ।

बालानामपराधेऽपि गुरुदण्डो न धार्यते ।
करुणा क्रियतां स्नेहान्मृष्यतां बालचापलम् ॥

आत्रेयः—(कठोरं ताड्यमानः ) हा तात, क्वासि ? हा तात, ( पतति ) ।

च्यवनः—अहह !

प्राणोपमस्य वत्सस्य कशाघातेन देहतः ।
स्यन्दते धारया रक्तं च्यवनोऽद्यापि जीवति ॥

अयि भो राष्ट्रिय, कुरु बालेऽस्मिन् वृद्धे च मय्यनुकम्पम् । अथवा—

यदि नास्ति क्षमैकान्ता चित्ते तदस्य रुदतः शिशोः ।
अपराधानुरूपं यत् तन्मय्येव वितीर्यताम् ॥

राष्ट्रियः—मा तावत् ; एवमविनीतेषु तीक्ष्णदण्डो राजा । भोः पुरुषाः ! ताडयत ।

राजपुरुषाः—तथा ( ताडयन्ति ) ।

च्यवनः—मा नाम भोः ! मा नाम शिशुस्ताड्यताम् । मां ताडयत । हा ! हा !! तथापि ताड्यते ?

राष्ट्रियः—अरे ! कृत्यं प्रतिबध्नात्येष वृद्धः, तदेनमपि भृशं ताडयित्वा शर्मं लम्भयत ।

पुरुषाः—तथा ( ताडयन्ति ) ।

च्यवनः—अहह ! विशीर्यन्ते अस्थिसङ्घाताः ! हा रत्नाकर, क्वासि ?

राष्ट्रियः—भो ब्राह्मण, कथय, क्वाधुना रत्नाकरो वसति ?

च्यवनः—( स्वगतं ) सम्प्रति जानन्नपि न कथयेयम्, तत् किं पुनरजानन् ? ( प्रकाशं ) मित्रगृहे वसतीति मन्यते ।

राष्ट्रियः—क्व तस्य मित्रगृहम् ?

च्यवनः—न जानामि ।

राष्ट्रियः—( सोत्प्रासम् ) मृषावादिन्, एवमुपकुर्वाणस्यापि गृहं न जानासीति सूपपन्नं खल्वेतत् !

च्यवनः—भद्र, राष्ट्रिय, भूतार्थं निवेद्यते । न जानामि ।

राष्ट्रियः—( आत्रेयं प्रति ) अरे प्रगल्भ ! त्वं जानासि ?

आत्रेयः—न जानामि ।

राष्ट्रियः—अरे राजपुरुषाः ! राजादेशात्तावदेतौ ताड्येतां यावदेताभ्यां रत्नाकरस्य साम्प्रतिकी स्थितिर्न प्रकाश्यते ।

पुरुषाः—तथा ( ताडयन्ति ) ।

आत्रेयः—अरे निष्ठुरा राजपुरुषाः ! मा नाम वृद्धं पितामहं ताडयत, अहह ! देहादस्य स्यन्दते रक्तम् ! अहह ! तात, क्वासि ? शीघ्रमागच्छ, मां

पितामहश्च राजपुरुषहस्तात् परित्रायस्व। तात, कासि, हा तात, नातः परं शक्यते सोढुम्। तात, पश्य माम्। अहो! एष सर्वं तमोमयं पश्यामि, पितामह, पिताम—( इत्यर्द्धोक्ते मूर्च्छति )।

राष्ट्रियः—ताडयत, ताडयत, एवं किल राजादेशः!

च्यवनः—निष्ठुराः पुरुषाः! अद्यापि ताडयथ? हा! हा!! न किं पश्यथ, यदेष कशाभिहतो मूर्च्छितः पतति? अहह! किन्तु खलु पाषाणघटितं हृदयं युष्माकम्? हा वत्स, आत्रेय, कासि, देहि मे प्रतिवचनम्। हा वत्स, रत्नाकर, कासि, न जानासि प्राणप्रियस्य ते वत्सस्य आत्रेयस्य चरमां—( अर्द्धोक्ते ) अहह! घूर्णते शिरः तिमिराक्रान्तः संसारः! लुप्ता मे दृष्टिः, न किञ्चित् पश्यामि, हा रत्नाक—( मूर्च्छति )।

पुरुषाः—अरे रे दुष्टौ, उत्तिष्ठतम्, मूर्च्छाच्छलेन जीवनं काम्यते? ( ताडयन्ति )।

राष्ट्रियः—ताडयत, निर्दयं ताडयत।

( ततः प्रविशति वीरबलप्रमुखैः पञ्चभिः पुरुषैः सह रत्नाकरः )

रत्ना—वयस्य, वीरबल, सत्यमेवाह शौनकः। तत् पश्यसि?

वीर—अथ किम्।

रत्ना—तत् किमद्यापि प्रतिपालयसि?

वीर—आज्ञापय।

रत्ना—एतं राष्ट्रियं बहुरत्नमण्डितमर्कटकं स्वयमेवाहमभिगृह्णामि, त्वमपि विशालाक्षप्रमुखैः सहितो युगपदेव पिशाचाधमानपरानभिगृहाण। अहह!

छिद्यते हृदयग्रन्थिः पितरं पुत्रकञ्च मे।
विसंज्ञं रक्तरक्ताङ्गं हन्यमानं प्रपश्यतः॥

तदलं निमेषमपि अतिक्रम्य, शीघ्रमभिगृहाण। अहमप्येष कुपितः केशरी गजस्येव मर्कटकस्य राष्ट्रियस्य शिरसि पतामि।

वीर—यथाज्ञापयति वयस्यः ( सर्वे यथोक्तमभिनयन्ति )।

रत्ना—मूढ, मर्कटक, ( राष्ट्रियस्य शिरः पादेन मर्दयन् )। रत्नाकरं न जानीषे ? मूढ, अनुभवेदानीं स्वीयदुष्कृतफलम्। मित्र, वीरबल, सम्यक् परीक्ष्य ज्ञायतां सर्वे पशवो निःशेषजीविता न वेति।

वीर—( परीक्ष्य ) वयस्य, कथमद्यापि ध्रियेरन् ? जात एव सर्वेषां समाधिः !

रत्ना—वयस्य वीरबल, नातःपरमत्र क्षणमपि स्थातव्यम्। अनर्थ-परिहाराय तातमात्रेयञ्च गृहीत्वा स्वगेहानमातरं दयिताञ्च समादाय नवं रत्नपुरमेव सर्वान् प्रापयामः। तदलं विलम्बेन।

वीर—यथाज्ञापयति वयस्यः।

( रत्नाकरः च्यवनमुत्थाप्य क्रोडे स्थापयित्वा वीरबलश्च आत्रेयं क्रोडे कृत्वा पुरुषैः सह निष्क्रान्तौ )

चतुर्थाङ्कः समाप्तः।

———

## पञ्चमाङ्कः

( ततः प्रविशति गायन्ती सुमतिः )

( गीतम् )

धावसि किमु तिमिरे ?

पश्य दयित चरणाश्रितजनमनुशयसागरे ।
क्व तव मृदुलमानसं प्रभवति वत तामसम्
स्मर निजजनमन्तरधन नाशय शुचमन्तरे ॥
तव हिंसनदूषिता धरणी वत दुःखिता
रोदिति निजबान्धवशुचि पतिता निशि वासरे ।
हिंस्रशतकभीषणं कण्टकमयकाननम्
पुरतो नहि पश्यसि किमु चल चल निजमन्दिरे ॥
तव वियोगविह्वला रोदिमि हृतसम्बला ।
पश्य पश्य पश्य दयित चर चर निजचत्वरे ॥

( ततः प्रविशति कुमतिः )

कुमतिः—का त्वं रोदिषि वत्सले प्रियतमं सम्बोधयन्ती मुहुः ?
नेत्राद् वारिदवत् पतत्यपि कथं बाष्पो विषादेन ते ?
सुमतिः—का त्वं दीनजनस्य कष्टमसमं दृष्ट्वापि हृष्टा परं
सोत्प्रासं वचनं दधासि सदये ? जीव्यात्तवेयं दया ॥
कुमतिः—आं ! सा त्वं सुमतिः ? सदैव कुमतिं मां निन्दया मृद्नती
या लोकोत्तरसौख्यमाश्रितवती ? भद्रे कथं ताम्यसि ?
सुमतिः—आसीन्मे प्रियबान्धवः स सहसा नीतस्त्वया दुष्टया,
तस्मादेव ममाद्य शोकविकलं चित्तं मुहुस्तापितम् ॥

कुमतिः—भद्रे, नीरलवं क्षिपत्रपनयाद्दण्डेन सन्ताड्यते,
किं वा तद् विदितं न ते ? स्मर पुरा यद् यत् कृतं शात्रवम् ।
सुमतिः—क्रूरे किं वद शात्रवं तव कृतं ? येनाद्य कोपं श्रिता
मां सन्तापयसि प्रियस्य हरणादेवं बलात्कारिणी ?
कुमतिः—मूढे ! शैशवतस्तव प्रियतमे प्रेम्णा प्रवेष्टुं मया
यत्नस्तावदकारि भूरि भवती तत्राभवद् वैरिणी ।
तावत्कालमसीमयत्नशरणा प्राप्तास्मि दैवेन तं,
तस्मादद्य ममैव दुःखमसमं त्वं भुङ्क्ष्व तावत्समाः ।
पश्यासौ मनुजान् निहन्त्यपदयः पापाद् भयं नाश्चति
लुप्ता कोमलता कदापि भवतीं नाद्य स्मरत्यन्तरे ।
तत्कृत्यैरभितो विभाति रुदितं पीडाकरं प्राणिनाम्,
शान्तिं मुञ्चति साम्प्रतं नरगणो रत्नाकरेत्याख्यया ।
धनं स लब्धुं निखिलानि पातकान्यभीत एव श्रयतेऽद्य साहसात् ।
जानात्ययं स्वौ पितरौ सुतं प्रियां स्वकीयपक्ष्यानपि केवलं हितान् ।।
सुमतिः—मुग्धे वृथा दर्पमिमं प्रपद्यसे, चिरं न ते स्थास्यति भाग्यमीदृशम् ।
चक्रक्रमावर्तितनेमिसन्निभा दशा विपर्यासमुपैति सत्वरम् ।।
कुमतिः—मूढे तथा चिन्तय चित्तशान्तये परं तवाशा सफला न भाविनी ।
दशाविपर्यासगतस्य देहिनस्तथैव चिन्ता ननु जीवसम्बलम् ।।
सुमतिः—धिक् ते प्रमादं धिगहो वचोविषं धिक् ते प्रगल्भव्यवहारदुर्णयम् ।
क्षणेन लब्ध्वा लघुसम्पदं त्वया यदेवमद्धा खलता प्रपद्यते ।।
वृथैष दर्पः कुमते त्वयादृतः क्षणेन नाशं स गमिष्यति ध्रुवम् ।
कुमतिः—तव प्रभावो लघुरेष मादृशां महाबलानां किमहो विधास्यति ?
सुमतिः—जगत्यकल्याणमयी भवादृशी न हि द्वितीया विदिता ममापरा ।
तदागतं नातिचिराय संक्षयं विमूढचित्ता प्रतिपालय स्वयम् ।
कुमति—निद्रां प्रबुद्धापि विमूढमानसा प्रत्यादयन्ती किमहो न लज्जसे ?
असम्भवं किं परिवर्तनं स्थितेर्विजानती चेतसि दृप्ततां गता ?

पदे पदे हन्ति यदेष मानुषान् यदेष पापेषु महत्सु मज्जति ।
यदेष मिथ्या परलोकमीक्षते कुतो नु तस्य त्वरया विपर्ययः ?
त्वय्यात्परागस्तव यत् प्रियः पुरा फलं महादुःखमयं न किं ततः ?
अथाधुना मामकरागसम्पदा प्रपश्य कां वा न गतः स सम्पदम् ।
प्रदाय दुःखं विपुलं स्वबन्धवे न लज्जसे बान्धवताप्रकाशिनी ?
अलं वृथा हार्दकथाप्रचारणैर्भजस्व शान्तिं स दधातु मङ्गलम् ।

सुमतिः—अहो विचित्रं तव बुद्धिलाघवं यतस्तथा पश्यसि निर्विचारतः ।
रोगे नरा जाग्रति सान्निपातिके वदन्त्यसम्बद्धवचःपरम्पराम् ।
रुजा परीता रसनासुखोदयान्यपथ्यभोज्यानि यदोपभुञ्जते ।
तदा रसास्वादसुखेऽपि रोगिणां कटुर्विपाकः किमु शक्यमोषणः ?
स साहसेनात्र विचारवर्जितो निहत्य वित्तस्य कृते परःशतान् ।
आपाततो यद्यपि मोदमश्नुते तथापि नान्ते भविता महोदयः ।

कुमतिः—तवैव तादृग् वचनं सुशोभनं न रम्यमेतत् प्रतिभाति मादृशाम् ।
परेद्यवि प्राप्यमयूरकाम्यया त्यजन्ति ये प्राप्तकपोतबालकम् ।
वृथाधियस्ते परितो विनिन्दिता ध्रुवं परित्यज्य न सेव्यमध्रुवम् ।

सुमतिः—मूढे न जानासि वृथैव वल्गसि प्रमत्तवन्मानविधौ विमूढधीः ।
खलं फलं शास्त्रनिषिद्धकर्मणाम् इति प्रमाणं वचनं विचार्यताम् ।
सुकृत्यजातेन फलं शुभावहं श्रुतिस्मृतिभ्यां यदि सत्यमीरितम् ।
ततो ध्रुवत्वाध्रुवते भवन्मते कथं वद प्रस्तुतयोर्विपाकयोः ?
प्रत्यक्षतः पश्यसि यादृशं फलं निषिद्धकृत्येन धनागमादिकम् ।
जन्मान्तरे तीक्ष्णतरं सुदुस्तरं कष्टं ततः शास्त्रवचोभिरीरितम् ।
इहैव वा जन्मनि पापमुत्कटं कृतं फलं यच्छति सत्वरं नृणाम् ।
ततः फलेनाव्यभिचारिणः सतः कथं न तस्य ध्रुवता फले स्थिता ।

कुमतिः—प्रवञ्चकैः कल्पितमर्थसिद्धये जन्मान्तरं प्राक्तनकर्ममूलकम् ।
अलं तदालम्ब्य जनप्रवञ्चनैर्विरम्यतां हन्त दुरात्मवर्तनात् ।

न काकतालीयनयं विजानताम् इहैव वा पापफलस्य सङ्गतिः ।
यथा यथायं पुरुषः प्रवर्तते तथा तथैवास्य फलं प्रजायते ।

सुमतिः—अशेषतस्त्यक्तवती त्रपाभरं चिराय वाचं कुरुषे सुदुर्मते ।
यदद्य जन्मान्तरवादमप्यसावपह्नुवाना न विलज्जसे क्षणम् ।
अलं त्वया लौकिकमात्रसारया प्रबुद्धयाऽन्याश्रितसुप्तिकल्पया ।
जगत्सु वैषम्यमवेक्ष्य सर्वतो वयं हि जन्मान्तरमाश्रयामहे ।
न जातमात्रस्य शिशोः कथञ्चन स्तनन्धयत्वं तव सोपपत्तिकम् ।
न पूर्वजन्मानुभवं विना यतः प्रवृत्तिहेतुस्मरणस्य सम्भवः ।
सुसिद्धमेतद् बहुयुक्तिभिः सतां जन्मान्तरं ह्नोतुमलं न तावता ।
पुण्यस्य पापस्य तथा दुरुत्तरं फलं समास्वाद्यमिहापि देहिभिः ।
वृथाभिमानं परिवर्ज्य दुर्मते भविष्यदालोकय सुस्थिरा सती ।
न पापमग्नस्य चिरं समुन्नतिर्नतिः कदाचिन्न परतोऽविलम्बिता ।

कुमतिः—हीनानने इत्थकथा न शोभते विना क्रियां वल्गसि किन्तु दुःस्थिते ।
विरम्यतां कोपविवर्द्धनं परं न साध्यतां मे स्वपथो विलोक्यताम् ।
एषा प्रतिष्ठे स्वजनोपकारिणी प्रियश्च रत्नाकरमाशु लोकये ।

( निष्क्रान्ता )

सुमतिः—सुदुःसहं हा कुमतेर्वचोविषं ममात्र तापाय भवत्यहर्निशम् ।
रत्नाकरं यावदुपैमि नो पुनः पुरेव तावन्न हि तापसंक्षयः ।
तदेहि रत्नाकर पुण्यचत्वरे समस्तकल्याणमये चिराभये ।
त्वया विना शून्यमिदं तमोमयं विधेहि शान्तिं स्वजनस्य मे शुचाम् ।
भवत्विदानीं परिलोकये प्रियं रत्नाकरं दुर्मतिलुप्तचेतनम् ।
यथाशु मोहं परिहाय सम्पदे प्रवर्तते पुण्यपथे पुरा यथा ।

( निष्क्रान्ता )

( ततः प्रविशति पुत्रेण आत्रेयेण सह रत्नाकरः )

आत्रेयः—तात, बिभेमि ।

रत्ना—वत्स, कुतो बिभेषि ?

आत्रेयः—निष्ठुरेभ्यो रक्षिपुरुषेभ्यः खलस्वभावाच्च राष्ट्रियात् ।

रत्ना—वत्स, मा मैवम्, अलमद्यापि तेभ्यो भयेन । ते खलु पापाः किमद्यापि घ्रियन्ते ? वत्स,

यावत् कशाप्रहारेण तवाङ्गाच्छोणितस्रुतिः ।
तावदेव स्वकृत्येन नीतास्ते यमसादनम् ॥

आत्रेयः—आं स्मरामि ! अथ तात, यदि तदीयविनाशेन परिकुपितो राजा वैरप्रतीकाराय इहैवापरान् पुरुषान् प्रेषयेत् ?

रत्ना—तदा ? वत्स, तदा तेऽपि पूर्वेषामनुगन्तारः ।

आत्रेयः—तात, मा मा तावदेवम् ! तथा प्राणिविनाश एव न मे सुतरां रोचते । तदलमेवं प्रतिपदं प्राणिवधानुबन्धेन ।

रत्ना—वत्स, बालोऽसि, न जानीषे संसारमर्यादां, प्रयोजनानुबन्धिनं प्राणिवधं शास्त्रकृतोऽप्यनुमन्यन्ते, किञ्च व्यसनवन्तः परहितपराङ्मुखा यदि जगत्यां निराबाधा घ्रियेरन्, कीदृशस्तावता जनानामुपकारः ? '

आत्रेयः—आं ज्ञातम् । अथ तात, रत्नपुरं रत्नपुरमिति बहुश एव श्रुतं भवन्मुखात् । तत् कुत्र नु खलु तत् रत्नपुरम् ?

रत्ना—आं वत्स, एतदेव अद्यापि न जानासि, इदमेव पुरं रत्नपुरमित्याख्यायते ।

आत्रेयः—आं ! इदमेव ? अथ कथमस्य रत्नपुरमिति संज्ञा ? कियद् वा आयतनमस्य ।

रत्ना—वत्स, श्रूयताम्, अस्त्यत्र पुरे कृतनूतनसन्नाहे किमपि लोकविलक्षणम् अस्माभिरेव सुप्रतिष्ठितं रत्नागारम्, यत्र किल—

रत्नानां किरणैस्तमांसि परितो नाशं श्रयन्ते परं
सर्वामेव तिथिं समेति मुदिता पूर्णा तिथिः पूर्णिमा ।
तेजोदीप्ततरं तदेत्य नयनं व्याहन्यते तैजसं
राज्ञां कामफलं प्रभूतमभितः सञ्चित्य पुञ्जीकृतम् ॥

तत एवास्य नवीन-नगरस्य प्रवर्तिताऽस्माभिः सान्वया रत्नपुरमिति संज्ञा ।

आत्रेयः—गृहीतं संज्ञाबीजम्। इदानीमायतनमस्य तातो वक्तुमर्हति।

रत्ना—वत्स, यैषा दृश्यते गभीरगहनमेखला पर्वतमाला, तस्या महाप्रणाहेषु परःशतेषु गुहागर्भेषु कृतवसतयः कामेश्वरराज्यप्रोषिताः प्रभूतशक्तिसम्भृता अस्मत्सपक्षा गृहपतयः—

येषां वीर्यहृताः करिप्रभृतयस्त्यक्त्वा खलत्वं परं
क्रीडायामनुकूलतां विदधते सम्प्रापिता वश्यताम्।
मामेवानुगता दिवानिशममी तिष्ठन्ति विश्वासिनः
कोशं रत्नपुरं सुविस्तृतमिदं तैरेव सम्पूरितम्॥

मध्यभागे चास्य बहुदूरे गुहागर्भे समवस्थितं विशालं रत्नागारम्।

आत्रेयः—तात, अहं तद् रत्नागारं द्रष्टुमिच्छामि।

रत्ना—नूनं द्रक्ष्यसि।

आत्रेयः—तात, कदा द्रक्ष्यामि?

रत्ना—यदा परिपूर्णयौवनो वीर्यवान् भूत्वा स्वपक्षपरिरक्षणाय अलं भविष्यसि, तदा द्रक्ष्यसि?

आत्रेयः—अहो कदा नु खलु यौवनं लप्स्ये?

रत्ना—वत्स, नियमेन मदादिष्टवर्त्मना व्यायामकारो अचिरमेव यौवनं लप्स्यसे वीर्यञ्च।

आत्रेयः—तात, तत्र नूनं विलम्बः कारितो भवेत् कशाप्रहारप्रभवेण शोणितस्रवेण।

रत्ना—आं! वत्स, आत्रेय, अपि नाम व्यथयति त्वामद्यापि देहक्षतव्यथा?

आत्रेयः—तात, न व्यथयति, आश्चर्यः खलु प्रभावो भेषजस्य! यदैव तेन भिषजा विजयगुप्तेन निसृष्टः शरीरे क्षतस्थानेषु भेषजलेपः, ततः प्रभृति स्वल्पेनैव कालेन जाता मे वेदनाशान्तिः!

रत्ना—(परीक्ष्य) सत्यं महान् प्रभावो भेषजस्य, साम्प्रतं क्षतानां चिह्नमपि नोपलभ्यते। किन्तु अहह! भेषजेनानेन नास्ति मे हृदयक्षतस्य शान्तिः।

आत्रेयः—तात, कथमिव ? कुत्र नु ते हृदयक्षतम् ? दर्शय, यावत् पश्यामि ।

रत्ना—वत्स, न खलु तद् दृश्यते ।

आत्रेयः—तात, यथेदं न दृश्यते, तथा किमस्य भेषजं नास्ति ?

रत्ना—कथं नास्ति ?

आत्रेयः - यद्यस्ति किमिति नासेव्यते ?

रत्ना—वत्स, तत्र कालः प्रबन्धविशेषश्चापेक्ष्येते ।

आत्रेयः—तात, अपि नाम समधिकं बाधते भवन्तं क्षतस्य व्यथा ? नियतं ममैव व्यथाशान्तिमपेक्षसे, स्वस्य व्यथां वाचापि न प्रकाशयसि !

रत्ना—वत्स, किमिव पृच्छसि ?

तुषानलेनेव हृदि क्षतेन
प्रसूयते तीक्ष्णतमो विदाहः ।
रुद्रं विना नास्य भवेत् प्रशान्ति-
स्तमेव तस्माच्छरणं गतोऽस्मि ।

आत्रेयः—तात, कथय रुद्रं, यथा सत्वरमस्यास्ते व्यथाया उपशमं कुर्यात् ।

रत्ना—आम् एवं कथ्यते ।

प्रविश्य पुरुषः—जयति जयति स्वामी ।

रत्ना—अये द्वारे नियुक्तः श्येनकः ! श्येनक, किं विवक्षितम् ?

पुरुषः—स्वामिन्, एष कश्चित् पुरुषः श्मश्रुधारी द्वारे समुपस्थितः 'रुद्रो-भिषगस्मि स्वामिनं द्रष्टुमिच्छामी'ति ब्रवीति । श्रुत्वा स्वामी प्रमाणम् ।

रत्ना—आं ! एष माधवो नाम भिषग् भूपतिगतिविज्ञानाय कामेश्वरपुरे मया प्रेषितः । ( प्रकाशं ) प्रवेशय ।

आत्रेयः—तात, एष स रुद्रो भिषक् प्राप्तः ? तदचिरादेव भविता भवतो वेदनोपशमः ? ( हर्षं नाटयति )

रत्ना—आम् एवं भविष्यति । (स्वगतं) अहो रुद्र इति नाममात्रेण वत्सो

मे भ्रान्तः। भवतु नास्य भ्रमं शोधयिष्यामि। (प्रकाशं) वत्स, कः सन्देहः? रुद्र एव मे व्यथां शमयिष्यति।

प्रविश्य अपरः पुरुषः—स्वामिन्, एष कुमारस्य व्यायामकालः; तदनुमन्यतां कुमारो व्यायामानुष्ठानाय।

रत्ना—साधु, काले प्राप्तोऽसि। तद् वत्स, गम्यतामिदानीं व्यायामनिर्वर्त्तनाय। व्यायामस्य कालातिक्रमो नैव क्षेमाय सम्पद्यते। तदविलम्बितं गन्तुमर्हसि।

आत्रेयः—यथाज्ञापयति तातः। (गच्छन् पुनः प्रतिनिवृत्तः) तात, रुद्रो नाम भिषक् तथा वक्तव्यः, यथा अचिरेणैव ते व्यथाशान्तिमुपदिशेत्। मा नाम स्वशरीरे माध्यस्थ्यम् अवलम्बनीयम्।

रत्ना—वत्स, गच्छ पुनर्दर्शनाय, अकालहीनं व्यायामं कृत्वा प्रवाते सरयूतीरे स्वच्छन्दसञ्चारं कुरुष्व।

आत्रेयः—यथाज्ञापयति तातः। (पुरुषेण सह निष्क्रान्तः)

(ततः प्रविशति पुरुषेण सह माधवो ब्राह्मणः)

पुरुषः—भद्र, एष स्वामी, तदुपसर्प।

रत्ना—भद्र, श्येनक, त्वमिदानीं स्वनियोगमनुतिष्ठ, यावदहमनेन भिषजा उपदिश्यमानं भेषजं जानामि।

पुरुषः—यथाज्ञापयति स्वामी। (निष्क्रान्तः)

माधवः—जयति जयति स्वामी।

रत्ना—भद्र, माधव, वृत्तं कथय, यावदादितः श्रोतुमिच्छामि।

माधवः—श्रोतुमर्हति स्वामी। प्रथमत एवाहं स्वामिना समादिष्टः शैलाग्राद् बहूनि आश्चर्यफलानि वृक्षमूलानि सञ्चित्य रहसि कृत्रिमवेशं स्वरूपप्रच्छादनाय परिगृह्य नगरं प्रविष्टवानस्मि।

रत्ना—ततस्ततः?

माधवः—ततश्च मया विशेषतः समुद्घोष्यमाणं मूलानां प्रभावमाकर्ण्य पदे पदे महानेव जनसंमर्दो मामन्वगच्छत्।

रत्ना—ततस्ततः ?

माधवः—ततः क्रमेण राजपुरसमीपं प्राप्तो यावत्तथैव जनसम्मर्दपरिवेष्टितो मुहुर्मुहुर्मूलप्रभावमुद्घोषितवानस्मि, तावदेव लोकमुखेन गृहीतवृत्तो राजा मामाकारितवान्। अथ पुरुषैरुपनीतेन मया दृष्टो राजा। पृष्टश्चाहं तेन, भो मूलवैद्य, कीदृशास्तव मूलप्रभावा इति। मयोक्तं; देव, महान्तः खलु मे मूलप्रभावाः। तथाहि—

मूलं किञ्चन सञ्चितं विषधरस्योग्रं विषं शोधयेद्
वन्ध्यायाः प्रसवाय किञ्चन तथा शक्तं समामोचितम्।
किञ्चिच्च क्षतशोषणं प्रकुरुते लिप्तं क्षणादुद्धृतः
किञ्चित सिंहविशालविक्रमहरं किञ्चिद् वशीभावकृत॥

रत्ना—ततस्ततः ?

माधवः—ततश्च विशेषतो मया घोष्यमाणं मूलप्रभावं श्रुत्वा राज्ञा समादिष्टाः समीपचारिणः पुरुषाः, भोः आनीयतां स घोरविषो विषधरः, यः किल राजद्रोहिषु कठोरदण्डप्रदानाय निपुणकेन विषवैद्येन प्रतिपालितः पञ्जरसन्निवेशेन। तेनैवास्य मूलानां परीक्षा भविष्यति। यद्यस्य मूलमफलं स्यात्, तदा मृषावाददोषादनेनैवास्य विनाशः करिष्यते।

रत्ना—अहो अत्याहितम्!

माधवः—स्वामिन्, अलमाशङ्कया, गृहीतपूर्वमादावेव तादृशं भेषजं मया शैलाग्रात्, यदेतादृशस्यापि विषधरस्य विषप्रतीकाराय पर्याप्तम्।

रत्ना—अहो उज्जीवितोऽस्मि। ततस्ततः ?

माधवः—ततः समानीतः स पञ्जरबद्ध आशीविषः पञ्जरेण सहैव राजपुरुषैः, यस्य भीषणेन क्रोधहुङ्कारेण सर्व एव तदा तत्रत्यः समुद्वेजितः समाजः।

रत्ना—ततस्ततः ?

माधवः—ततो मया वसनग्रन्थितः समुद्धृतं किमपि विषहरं मूलं करेण गृहीत्वा यावत् पञ्जरस्य द्वारमपावृतं तावदेवासौ भीषणो विषधरः स्वामुग्रतां विस्मृत्य पञ्जरकोणे किञ्चुलुक इव शयितो गृहीतश्च कण्ठे निर्विशङ्कम्।

रत्ना—ततस्ततः ?

माधवः—ततो यावदसौ कण्ठे गृहीत्वा निर्वीर्यो बहिरवतारितः, तावद् मम मूलप्रभावे अप्रत्ययितः सदर्पःसेनापतिः तं तथैव ग्रहीतुमुपक्रममाणः। पुनः पुनः प्रतिषिध्यमानोऽपि जनसमाजेन मम प्रकर्षं लघूकर्तुं स्वप्रकर्षञ्च प्रकटयितुं तं विषधरं मम हस्तात् समाददे, तावदेव हस्तात् स्खलितोऽसौ तं करे दष्टवान्, पतितश्च तत्क्षण एव 'हा हतोऽस्मी' त्युक्त्वा सेनापतिर्भूमौ। तावदेव च हाहाकारेण मुखरिताः सर्वा दिशः।

रत्ना—साधु, माधव, साधु, एकः शत्रुः क्षयं नीतः! ततस्ततः ?

माधवः—अथ तत्सर्पभयात् सुदूरमपक्रान्ते जनसमाजे तस्य नियमनाय पुनः पुनः सम्प्रार्थयमाने राजप्रमुखे जनसंघे पुनरेवाहं तं विषधरं सहसा अभिगृह्य पञ्जरे बद्ध्वा क्षुभितं जनसमाजमभयवादेन समाश्वास्य विषहारिणा मूलेन सेनापतेः क्षतस्थानं परामृश्य प्रशमितवानस्य क्षणेनैव विषवेगम्।

रत्ना—धिक् कष्टम्! निर्विचारमेवास्य त्वया प्रशमं नीतो विषवेगः। हा धिक्! शत्रुपक्षः किलायं दैवेन मारितोऽपि बुद्धिदोषात् पुनरुज्जीवितः ? धिक्! निर्विचारमिदमनुष्ठितम्!

माधवः—स्वामिन्, अलमधिक्षेपेण। जानात्येव माधवः शत्रुमित्रे विचारयितुम्। तादृशं तत्र मया विषवेगप्रशमनाय मूलं प्रयुक्तं, येन साम्प्रतं सुतरां प्रशान्तेऽपि विषवेगे पीतक्षीरस्यास्य प्रवृद्धेन विषवेगेन तृतीयदिवसे प्राणहानिः सम्पद्येत। सदैव च समादिष्टमस्य तृतीयदिवसे क्षीरपानम्।

रत्ना—आं निपुणः खलु माधव इति शतशः परीक्षितमपि कार्यगौरवाद् विस्मरामि। ततस्ततः ?

माधवः—ततश्च मदीयप्रभावविस्मितेन राज्ञा दीनेन वचसा पृष्टोऽस्मि।

रत्ना—किमिति ?

माधवः—एतत् पृष्टोऽस्मि, भो वैद्यराज, अस्ति मे प्रवरः कुमारो राजेश्वरो नाम, स हि विविधैरुपकरणैरुपचरितोऽपि न तथा समुपचिता-

वयवो दृश्यते, तद् यद्यस्ति तादृशं मूलं, येन प्रवरः कुमारो मे विशेषतः समुपचितशरीरः स्यात्, तत्तर्हि कृपया प्रयोक्तुमर्हसि। इति।

रत्ना—ततस्ततः ?

माधवः—ततो मयापि वितीर्णं मूलम्, तदैव च तत् कृष्णसूत्रेण समारोपितमस्य कण्ठे।

रत्ना—भद्र, माधव, अस्ति किमत्रापि ते कश्चिदभिसन्धिः ?

माधवः—अथ किम्।

रत्ना—कीदृशः स इति श्रवणाय समुत्कण्ठितोऽस्मि।

माधवः—स्वामिन्, यदेतद् वितीर्णं मूलं, तदेव सर्पो भूत्वा तृतीयरजन्याममुं व्यापादयिष्यति।

रत्ना—साधु, माधव, साधु, निपुणः खल्वसि। ततस्ततः ?

माधवः—ततश्च तरणीयात्रार्थमुपकरणवाहिनः संख्यातीतान् राजपरिजनानुपलभ्य मया प्रसङ्गतः पृष्टः सेनापतिराह।

रत्ना—किमिति ?

माधवः—अद्यैव अपराह्णे सप्रहरणैः पञ्चाशता सैनिकैः सुबहुविचित्रालङ्कारसमलङ्कृताभिर्नर्त्तकीभिः विलासोपकरणसम्पादनपरैः परिजनैश्च समधिष्ठितां शतवाहिनीं तरणीमधिष्ठाय राजा सरयूनद्यामवतरिष्यतीति।

रत्ना—( सहर्षं ) माधव, अपि सत्यं ब्रवीषि ?

माधवः—स्वामिन्, विशेषतो निश्चयमनुपलभ्य किमु स्वामी विज्ञाप्यते ? तदत्र प्रत्ययः कार्यः।

रत्ना—भद्र, माधव, श्रुतं यच्छ्रोतव्यम्। तदिदानीं गच्छ विश्रान्तो भव।

माधवः—यथाज्ञापयति स्वामी। ( निष्क्रान्तः )

रत्ना—कः कोऽत्र ?

प्रविश्य पुरुषः—आज्ञापयतु स्वामी।

रत्ना—सत्वरं वीरबलः समाहूयताम्।

पुरुषः—यथाज्ञापयति स्वामी। ( निष्क्रान्तः )

रत्ना—अहो ! प्रतिहिंसा ! प्रतिहिंसा !! प्रतिहिंसा !!!

यस्याज्ञया हन्त कशाप्रहारान्
तातस्य पुत्रस्य च मे शरीरे।
क्षतं क्षतं चेतसि मे व्यतानीत्
स वर्ततेऽद्यापि सुखेन लोके ?

तदस्य मूढस्य राज्ञः पुत्र-सेनापत्योरचिरभावि मरणं प्रयोजयता माधवेन सुष्ठु कृतः समारम्भः। मूढ, कामेश्वर, न मामभिजानासि ? मूढ,

मत्तो वित्तमदेन दीननिवहान् विश्वासयन्नन्वहं
मग्नोऽसि व्यसनेषु नो वितनुषे लेशात् परार्थं क्वचित्।
तातं मे तनयश्च दुर्मतिवशात् सम्पीड्य भृत्याधमै-
र्दंष्ट्राशीविष एव भीषणतमः पादेन संघट्टितः।

तदद्य वाहं—ज्वालामहर्निशमुदग्रतया ज्वलन्तीं
निर्वापयामि तव जीवनतर्पणेन।
अद्यास्तमेतु तव निष्ठुरकृत्यसीमा
वित्ताभिमानकलुषं लयमेतु लोके।

अहह ! तात, क्षणमपेक्षस्व—

तवाङ्गाद् येन मूढेन शोणितं विनिपातितम्।
तस्य सन्ततरक्तेन क्षालयिष्यामि ते पदम् ॥

( ततः प्रविशति सम्भ्रान्तो वीरबलः )

रत्ना—( दूरादवलोक्य ) वयस्य, वीरबल, सज्जो भव, महायज्ञः प्राप्तः।

वीर—वयस्य, किमिव ? को नाम महायज्ञे बलिः ?

रत्ना—( कर्णे ) एवमेवम्।

वीर—तत् कथमद्यापि विलम्बसे ?

रत्ना—त्वामेव प्रतिपालयन्नस्मि।

वीर—तदिदानीमादिश्यतां कृत्यम् ।

रत्ना—उच्यन्तां नातिदूरवर्त्तिन्यां सरयूनद्याः शाखायां वर्त्तमानां सार्द्धशतवाहिनीं तरणीमधितिष्ठन्तस्तरीवाहकाः, यथा अद्यैवापराह्णे सर्वोपकरणसहितां तरणीमादाय ते शाखानद्या मुखे प्रतिपालयन्तु, भेरीशब्दसङ्केतेन च समाहूय सप्रहरणाः परीक्षितगुणाः सन्दिश्यन्तां मेघवर्णविशालाक्षप्रमुखाः सार्द्धशतं पुरुषाः, यथा यथाकालममी यथास्थानमुपगच्छन्तु। मा तावदिमे प्रमोदमत्ताः कोलाहलेन दिशो मुखरिताः कुर्युः। त्वामपि सर्वानिमानधितिष्ठन्तमहस्तृतीये यामे नद्याः शाखामुखे सोपकरणं द्रष्टुमिच्छामि।

वीर—यथाज्ञापयति वयस्यः।

रत्ना—वयस्य, वीरबल, तदलमद्यापि कालहरणेन, सम्प्रति हि—

क्षणोऽपि युगवद् भाति सन्ततं ज्वलिता भृशम्।
कदा खलु मनोज्वाला मम निर्वाणमेष्यति ?

वीर,—वयस्य, अलमुत्कण्ठया, अचिरमेव सा निर्वाणं गमिष्यति।

रत्ना—एवमस्तु। तद् गच्छ शीघ्रम्, अहमपि तातं मातरञ्च समभिवाद्य यथाकालं सन्नद्धो भूत्वा नद्याः शाखामुखे युष्मान् द्रक्ष्यामि।

वीर—यथाज्ञापयति वयस्यः। ( निष्क्रान्तौ )

पञ्चमाङ्कः समाप्तः

# षष्ठाङ्कः

( ततः प्रविशतः सरयूनद्यां तरणीमधितिष्ठन्तौ धीवरौ )

१मः—अरे रोहितक, अवसितप्रायो दिवसः, सूर्यश्च पश्चिमायामाशायामवतीर्णो लक्ष्यते। अद्यापि नासादिताः प्रभूतमत्स्याः, तदद्य न जाने कीदृशी वा समवस्था सरयूनद्याः, येन सर्वं दिवसं यतमानयोरपि आवयोर्न मत्स्यान प्रदर्शयतीति।

२यः—अरे कुलीरक, अवहितो भव, एते पुलिनमधिशयाना विशालकायाः पञ्चषाः कुम्भीरा दृश्यन्ते, अये, एते तरङ्गक्षोभभीताः क्रमेण सलिलं प्रविशन्ति।

१मः—अरे रोहितक, एतेऽपि गजप्रमाणाः शिशुमाराः समुत्प्लुत्य पुनः सहसा सलिलमभिविशन्ति।

२यः—अरे, एषापि विकटानना मकरश्रेणी, तदन्यस्यां दिशि तरीं प्रवर्त्तयावः।

१म—अरे, शीघ्रं कुन्तं गृहाण, एष कश्चन कमठः समुत्प्लवते।

२य—आं! एष गृह्णामि, यथास्थानं तरणीं प्रवर्त्तय।

१म—एष प्रवर्त्तयामि, शीघ्रं सज्जो भव।

२य—एष कुन्तं क्षिपामि। ( सपरिकरं कुन्तं क्षिपति )

१म—आ मूर्ख, भ्रष्टलक्ष्योऽसि।

२य—दैवमेवाद्य विरूपं दृश्यते! अरे इतो दृष्टिं देहि, इह रोहित इव दृश्यते।

१म—अरे सत्यम, तत् तिष्ठ, अहमत्र कुन्तं क्षिपामि।

२य—नहि नहि, अलं कुन्तेन, बृहज्जालं क्षिपामि।

१म—एवं क्रियताम्।

२य—( सपरिकरं जालं क्षिपति )

१म—अरे कीदृशं मन्यसे ?

२य—जाले पतित इव ।

१म—तत् सावधानमाकृष्यतां जालम् ।

२य—( जालमुद्भिद्य रोहितं समुत्पतन्तमवलोक्य ) हा धिक्, भ्रष्टः ।

१म—धिङ् मूर्ख, अतिजडोऽसि । येन वारद्वय एव निष्फला प्रवृत्तिः । तद्‌लमतः परं प्रयत्नेन, एहि तरणीं परावर्त्य स्वगेहं गच्छावः ।

२य—(श्रुतिमभिनीय ) अरे, कुतो नु खलु एष ताललयशुद्धो मृदङ्ग-ध्वनिः, सह च मनोहरं सङ्गीतम् ?

१म—अरे ममाप्यस्ति कौतूहलम् ! तत् प्रतिपालयावः ।

२य—अरे क्रमेणार्थ समीपचारी निक्वणः ।

१म—अरे, पश्य पश्य, एषा काचित् विचित्ररचना पत्रपुष्पादिसमलङ्कृता तरणी । यत्रायं सङ्गीतवादित्रप्रबन्धः !

२य—अरे न केवलं सङ्गीतमेव, ललित-ललनाकण्ठमूर्च्छनापि ।

१म—आं ! नानाविधभावविभावितं नृत्यमपि कामिनीनाम् ! अरे, सौभाग्यत एव न वयं पूर्वतः प्रतिनिवृत्ताः !

२य—अरे अपगतः सम्प्रति मत्स्याप्राप्तिनिबन्धनो विषादलेशोऽपि । यदिदं समासादितं दर्शनफलं श्रवणफलञ्च ।

१म—सुभगाः खलु धनिकाः, ये स्वच्छन्दत एव तादृशीं सुखसम्पदं भोक्तुमर्हन्ति ।

२य—अरे एषाऽस्माकं क्षुद्रा तरणी तरङ्गेण सुतरां स्पन्दमाना स्थिरां दृष्टिं मनसः स्थैर्यञ्च प्रतिहन्ति, तदेहि, यावदिहैव समीपे तरणीं स्थापयित्वा पुलिनमारुह्य निराबाधं द्रष्टव्यं पश्यावः श्रोतव्यञ्च शृणुवः ।

१म—अरे अयमदूरे सन्निहितो नद्यास्तीरपादपो दृश्यते, तदत्र तरणीं बद्ध्वा तीरमारोहावः ।

२य—एवमस्तु । ( निष्क्रान्तौ )

( ततः प्रविशति नदीवक्षसि तरणीमारूढः सपरिवारो राजा नृत्यन्त्यो वाराङ्गनाश्च )

राजा—गीयतां नृत्यताम्, अलं विश्रामेण।

वसन्तकः—भोः! एवं निरन्तरं प्रवर्तिताभ्यां नृत्यगीताभ्यां विलासिनीनां कटिबाधा कण्ठस्वरभङ्गश्च समुपजायेताम्, तदन्तरा विश्राममप्यनुमन्यस्व। एष दृश्यतां मृदङ्गं वादयतामपि करतलस्तम्भः।

राजा—वयस्य, वसन्तक, सत्यां सर्वबाधाप्रशमनकारिण्यां सुरायां किमेवमाशङ्कसे? एषा हि

सर्वव्यथाप्रशमनं कुरुते शरीरे
कण्ठस्वरं नयति कोकिलशब्दसाम्यम्।
लोकोत्तरं मनसि दीपयति प्रमोदं
मूढाः सुरा यदसुरेषु सुरां दधुस्ते।

वसन्तकः—भो भोः! अलमस्या दास्याः पुत्र्याः सुरायास्तावना स्तुतिगीतेन, यया सकृत्पीतया महान्तं विकारं प्रापयन्त्या पादेन खञ्जीकृतोऽस्मि। तदस्या दास्याः पुत्र्या गन्धोऽपि नेदानीं मे रोचते।

राजा—वयस्य, वसन्तक, सकृत् पानेन नास्या महत्त्वमवगच्छसि, येनैवं ब्रवीषि। प्रिये लीलावति, दीयतामस्य वसन्तकस्य पानपात्रम्।

लीला—वयस्य, एहि, पिब। ( उपनयति )

वसन्तकः—मा तावद् भोः! किमयमेकोऽपि मे सुस्थितः पादो न भवद्भ्यो रोचते? यद्येवमानीयतां निशातः खड्गः, छिद्येतामनेन दीनब्राह्मणस्य चरणौ। हा हा! पित्रोः प्रसादात् पादद्वयं लब्धम्, एकस्तु दास्याः पुत्र्या सुरया अपहृतः, द्वितीयेन कथमपि स्वस्थेन पानभोजनगेहं प्रविश्य स्वेच्छया दग्धोदरं परिपूरयामि। तदेतदपि न सोढव्यम्? हा तात, हा मातः! क नु खलु युवां तिष्ठथः?

राजा—प्रिये लीलावति, सुतरां विकृतो ब्राह्मणः। तदलमत्र निर्बन्धेन, ममैव समुपनीयताम्।

लीला—भीरुक एष ब्राह्मणः। का गतिः? ( राज्ञ उपनयति )

राजा—( पानमभिनीय ) प्रिये, लीलावति, सखीभिः सह गीयतां नृत्यताम्। भो भो मार्दङ्गिकाः! कथं विश्रान्तो मृदङ्गशब्दः? वादयत, वादयत।

( ससखीजना लीलावती गायन्ती नृत्यति, मार्दङ्गिका मृदङ्गं वादयन्ति )

गीतम्

एहि दयित हृदये मम किं विलम्बसे ?
दूरे कथमसि न हि मयि करुणां कुरुषे।
विधुरश्चति चन्द्रिकां तरुरश्चति वल्लिकाम्
जलधिरेति तटिनीं मां कथमुपेक्षसे ?
अधरे कुरु मधुराधरमबलामनु मुदमाहर
नयने कुरु नयनं प्रिय किं न भाषसे ?

( नृत्यति )

राजा—अहो सुधास्रावि सङ्गीतम्! लोकोत्तरं मनोहरश्च नृत्यकौशलम्। तथाहि—

मधुरस्वरमेष पावनः पवनः सादरमाहरन्नितः।
अमृतभ्रमतः किमूर्ध्वतः सुरसम्प्रीतिकृते प्रयच्छति ?

अपि च,

आकाशं विपिनं महीध्रनिकरो वातस्तथा प्रान्तरं
नीरं वीचिसमाकुलश्च सरितः सर्वं सुधाप्लावितम्।
नृत्यं दृष्टवती तरङ्गतरला स्रोतस्वतीयं ध्रुवं
लीलालास्यविलासशिक्षणकृते लीलावतीं वीक्षते॥

वसन्तकः—भो वयस्य, एषा ससखीजना लीलावती तथा समुच्चैर्गायन्ती न मे रोचते।

राजा—वयस्य, कथमिव ?

वसन्तकः—एवं प्रवाते देशे तथा समुच्चैर्गायन्ती लीलावती पवनारूढ-स्वरसंक्रमेण विदिता गीर्वाणैर्वा गन्धर्वैर्वा अभिगृह्येत। एवं सति प्रिय-वयस्यस्तथा वयं लीलावतीललितगीतनृत्योपभोगसौभाग्यात् सुतरां वञ्चिता भविष्यामः।

सर्वे—( हसन्ति )

राजा—आं! एवम्? वयस्य, अलमाशङ्कया, तत्प्रतीकाराय सन्ति सहैव सप्रहरणाः सैनिकाः।

वसन्तकः—वयस्य, देवा गन्धर्वाश्च न प्रत्यक्षमभिगृह्णन्ति, परं परोक्ष-मेव। तददृष्टव्यापाराः सैनिकाः कथमिव प्रतिकुर्युः?

राजा—एवमपि ब्राह्मणो वसन्तकः श्रौतं मन्त्रं प्रयुञ्जानः प्रतीकारं करिष्यति।

वसन्तकः—भोः तिष्ठतु तावत् परिहासः! सति व्यसनसम्पाते दीन-ब्राह्मणस्य वचनं स्मरिष्यथ। भो वयस्य, अथ पृच्छामि, अतः परं कियद्दूर-मस्माभिः प्रस्थातव्यम्? अपि न लक्षयसि यदेष प्रदोषः प्राप्त इति।

राजा—वयस्य, प्रदोष इति कोऽयमुद्‌वादः? अद्य बहुलपक्षीया चतुर्थी तिथिः। रजन्याः प्रथमं यामं यावदन्धकारः। तावत्पर्यन्तमग्रे गत्वा समुदिते सुधाकरे कौमुदीमहोत्सवं सम्भावयन्तः प्रतिनिवृत्ता भविष्यामः। किं वा लीलावती मन्यते?

लीला—अथ किम्? यदि रात्रौ नदीवक्षसि कौमुदीमहोत्सवमेव नानु-भवेम, कीदृशस्तर्हि नैशविहारः?

राजा—युज्यते।

वसन्तकः—अहन्तु जीवनात् कौमुदीमहोत्सवं नाधिकं मन्ये।

राजा—कथमिव?

वसन्तकः—अलं वा तदुक्त्वा, येन कौमुदीमहोत्सवसम्भावनव्याकुलानां युष्माकं परिहासमेव समासादयेयम्।

राजा—वयस्य, तथापि कथ्यताम्।

वसन्तकः—किं वा कथनीयम् ? तमोवृतायां रजन्यां शैलारण्यसन्निहिते नदीवक्षसि विहरतोऽस्मान् दस्यवो वा अभिगृह्णीयुः ।

राजा—आम् एवं शङ्कसे ? वयस्य, मा तावत् । सन्ति किल सदैव गृहीताः सप्रहरणाः सैनिकाः, त एव तत्प्रतीकारं करिष्यन्ति । तदलं शङ्कया । अथवा यदि नात्र रमसे, तदा त्वमितः पानभोजनप्रकोष्ठमासाद्य पानभोजनाभ्यां रतिं विन्दस्व ।

वसन्तकः—एवमस्तु, का गतिः ? ( निष्क्रान्तः )

राजा—प्रिये, लीलावति, अवसितो दिवसः ! तथाहि—

एषा भास्कररागरक्तसलिलं वासो विहाय द्रुतं
सम्भ्रान्ता सरयूः प्रयाति जलधिं कृष्णांशुकेनाऽऽवृता ।
नीरे च प्रतिबिम्बितेन परितो दीपोच्चयेनाधुना
दोव्यद्रत्नमयं विभाति तदिदं कृष्णांशुकं सर्वतः ।

अपि च—

शैलाद् भिन्नतया न पादपगणो ध्वान्तेन संलक्ष्यते
शैलस्यायतिरायता समभवद् भीमा च कान्ता च मे ।
यद्दृष्टं दिवसे जगत् सुविपुलं रात्रौ तदेवाधुना
संक्षिप्तं परिदृश्यते रसवतामत्रापि दिव्यं सुखम् ।

लीला—आम् एवम् । ऊर्ध्वं नक्षत्रमालासमलङ्कृतं सुनीलमाकाशं, अधस्तात् तरङ्गतरला सान्ध्यप्रदीपमालाप्रतिबिम्बचुम्बिता सरयूः, पार्श्वयोः समीपे पश्चाच्च निरन्तरसन्निवेशमेकीभूतमिव शैलारण्यम् ! एतया भीमकान्तया तामसीश्रिया नवीनमानन्दमनुभवामि ।

राजा—प्रिये,

पश्चात् सम्मुखतो नदीमुभयतः प्राकारवद् विस्तृतं
शैलारण्यमिदं निरन्तरतया वाभाति चक्षुष्मताम् ।
ऊर्ध्वं चारुवितानमेव गगनं शुभ्रं जलञ्चाप्यधः
श्वेतप्रस्तरबद्धकुट्टिममिव प्रत्येमि रात्र्यागमे ॥

भवतु, अतः परं पश्यामि । कः कोऽत्र ?

पुरुषः—आज्ञापयतु देवः ।

राजा—उच्यन्तां नाविकाः, समया गत्या तरणीं वाहयन्तु इति ।

पुरुषः—यथाज्ञापयति स्वामी । ( निष्क्रान्तः )

राजा—कः कोऽत्र ?

पुरुषः—आज्ञापयतु देवः ।

राजा—उच्यतां प्रधानसूपकारः, चिरं नृत्यगीताभ्यां परिश्रान्ता ससखीजना लीलावती वयञ्च, तदचिरं सान्ध्यभोजनप्रबन्धः कर्तव्य इति ।

पुरुषः—यथाज्ञापयति स्वामी । ( निष्क्रान्तः )

राजा—प्रिये लीलावति, एषा सम्प्रति समं प्रवर्तते तरणी । तथाहि—

वेगं विहाय समतां तरणी प्रपन्ना
स्थैर्यभ्रमं वितनुते चलिताऽपि चित्ते
आहन्यते लहरमालिकयाऽन्तराले
तेनैव नौनिवसतिः स्फुटतामुपैति ॥

( प्रविश्य ) पुरुषः—जयति देवः । देव, सज्जे पानभोजने, श्रुत्वा देवः प्रमाणम् ।

राजा—प्रिये, लीलावति, एहि पानभोजनप्रकोष्ठं प्रविशामः ।

लीला—तथा ( सर्वे निष्क्रान्ताः ) ।

( ततः प्रविशति नदीवक्षसि सपरिजनेन रत्नाकरेणाधिष्ठिता तरणी )

रत्ना—वयस्य, वीरबल, साम्प्रतं योग्यः कालः प्राप्तः । सर्वतस्तिमिरावृतं जगत् ! तद् यावदसौ कामेश्वरेणाधिष्ठिता तरणी सम्मुखे वक्रतामुपगतं प्रवाहमभिविशेत् तावदेव वयं समुपसृत्य तरीमिमामभिग्रहीष्यामः ।

वीर—वयस्य, सम्प्रति सैनिकाः सान्ध्यभोजनरता लक्ष्यन्ते, तदस्मिन्नवसरे तेषामास्कन्दनं सुकरं सम्भाव्यते ।

रत्ना—एवमिदम् ।

वीर—तदादिश्यतां क्रमः ।

रत्ना—श्रूयताम्, निपुणमेकं वीरमिहैव जले अवतारय ।

वीर—कथमिव ?

रत्ना—सलिले पतितः प्लवमानोऽसौ तस्यास्तरण्याः सन्निहित आत्मपरित्राणं याचमानो नूनं तत्र स्थितैः पुरुषैः समुद्धरिष्यते ।

वीर—तथाऽसौ समुद्धृतः कथं जले मग्नोऽसीति पृष्टः किं ब्रूयात् ?

रत्ना—एवं ब्रूयात्,—अहं बन्धुभिः साकमुत्सवपण्यवीथिकायां गतोऽस्मि, तत्र च केनापि समं बन्धुजनदर्पात् कलहं कुर्वाणस्तेनैव कुपितेन नदीप्रवाहे निक्षिप्तोऽस्मि । अनुपदमेव च नूनं सुहृदो मे मदन्वेषणाय समागच्छन्तीति ।

वीर—वयस्य, कथं खल्वेष महानारम्भः क्रियते ?

रत्ना—वीरबल, श्रूयताम्, जानामि यदेवं महान्तमारम्भम् अकृत्वापि कृते कामेश्वरतरीसन्निरोधे नास्माकं पराभव इति । तथापि मरणमुत्प्रेक्षमाणा पिपीलिकाऽपि प्रतिपक्षदंशनान्न विरमतीति किञ्चिदिवानिष्टमुत्प्रेक्ष्य तत्प्रतीकाराय प्रवृत्तोऽस्मि ।

वीर—अनेन समारम्भेण कीदृशस्तस्य प्रतीकारः ?

रत्ना—वीरबल, श्रूयताम्, यदा वयं तां तरणीं निरोत्स्यामः, तदा सैनिकैः शल्यक्रिये शस्त्रप्रयोगे द्वित्राणामपि सपक्षाणां प्राणवियोगमाशङ्के, अतः शस्त्रागारं तरणीस्थितमायत्तीकर्तुमेतत् प्रस्तूयते । कथमन्यथा कुत्र खलु शस्त्रागारमित्यविदितवद्भिः प्रथमत एव शस्त्रागाराधिकारः सुशकः स्यात् ? तदादौ गत्वा स शस्त्रागारं विज्ञास्यति, यदा वयं तरीसन्निहिता भविष्यामस्तदैव च तेन विज्ञापिता वयमादौ शस्त्रागारं निरोत्स्यामः ।

वीर—ततस्ततः ?

रत्ना—ततश्च तां तरीमारुह्य क्षणमात्रकेणैव द्वाभ्यां द्वाभ्यामेकैकशः सैनिका निःशेषं मारयित्वा नदीसलिले निक्षेप्तव्याः । अपरेषाञ्च प्रत्येकमेकैक

एव पर्याप्तो भविष्यति। तदनन्तरमवशिष्यते दुरात्मा कामेश्वरः, स त्वया मया च सावधानं जीवित एव ग्रहीतव्यः।

वीर—कथमिव ?

रत्ना—किं न स्मरसि यन्मया तातमुद्दिश्य प्रतिज्ञातम्, दुरात्मनः कामेश्वरस्य सन्तप्तेन शोणितेन तातस्य पादौ प्रक्षालयिष्यामीति।

वीर—आं स्मर्यते। अथ स्त्रीणां कीदृशी गतिः ?

रत्ना—यथैव इतरेषाम्। शत्रुप्रियाः खल्वेताः शत्रूणामेव गतिं प्रापयितव्याः।

वीर—युज्यते। ततस्ततः ?

रत्ना—ततश्च कामेश्वरवर्जं सर्वेषु नदीगर्भं प्रापितेषु तत्रत्यानि रत्नादिमहार्घोपकरणानि स्वीयतरणीमारोप्य शत्रुतरीं कुठारप्रहारेण विदार्य जले मज्जयित्वा रत्नपुरं प्रति जयशब्देन प्रस्थातव्यम्।

वीर—सम्यग् गृहीतः क्रमः।

रत्ना—वीरबल, तदलं विलम्बेन, आरभ्यतां साम्प्रतं कृत्यम्।

वीर—भोः पुरुषाः! ( सर्वे उत्तिष्ठन्ति ) अपि श्रुतः स्वामिनो नियोगः ?

सर्वे—अथ किम्। श्रुतो गृहीतश्च।

वीर—अलमिदानीमेव सर्वैः। एकः साम्प्रतमपेक्ष्यते।

सर्वे—आज्ञापय।

वीर—विशालाक्ष, त्वमेव कृत्यारम्भेण पुरस्ताद् भव।

विशा—अनुगृहीतोऽस्मि। ( परिकरं बध्नाति )

वीर—निःशब्दं सलिलप्रवेशः कर्त्तव्यः।

विशा—यथाज्ञापयति वीरबलः। ( सलिले अवतरति )

रत्ना—विशालाक्ष, शत्रुतरीस्थितानां विश्वाससमुत्पादनाय सुदूरतस्त्वमस्माभिराकारयितव्यस्त्वमपि एषोऽस्मीति प्रतिवाचं विसर्जयेथाः।

विशा—यथाज्ञापयति स्वामी। ( प्रवाहे पतितः )

रत्ना—गच्छ, अस्तु सर्वतः शुभाय ते कृत्यारम्भः। (दृष्ट्वा) अये एष विशालाक्षः प्रवाहे पतितः क्षणमात्रकेणैव सुदूरं नीतः। अपि नाम फलं दधीत ममायमभिसन्धिः ?

( नेपथ्ये 'परित्रायतां भोः परित्रायताम्' )

रत्ना—अये, एष विशालाक्षः क्रोशन्नात्मपरित्राणप्रार्थनामभिनयति। बीरबल !

वीर—भो विशालाक्ष, कासि ?

( नेपथ्ये 'एष भोः, एषोऽस्मि' )

वीर—( उच्चैः ) एते वयमनुपदमागच्छामः। कथञ्चित् क्षणमात्मानं धारय।

रत्ना—( निरूप्य ) अये तरणीस्थैर्गृहीतः शब्दः।

वीर—(निरूप्य) भो एष विशालाक्षस्तरीसमीपं गतः समधिकं क्रोशति।

रत्ना—( निपुणं निरूप्य ) अहो प्रमोदः ! एते तरणीस्थाः सम्भ्रान्ता रज्जुं जले क्षिपन्ति, एषा सा गृहीता विशालाक्षेण। अये एष विशालाक्षस्तामवलम्ब्य तरीसन्निधानमुपगतः। एष हस्ते गृहीत्वा तरणीस्थैः पुरुषैस्तरीमारोपितः संज्ञाहीनतां नाटयति।

वीर—( निरूप्य ) अहो अत्याहितम् ! एष कश्चन विचित्रभूषणमण्डितः पुरुषः ससम्भ्रमं सैनिकैः प्रणम्यमानः समुपेत्य विशालाक्षस्य नदीनिक्षेपमादिशति। धिक् प्रमादः ! एष नदीनिक्षेपणाय परिगृहीत एव।

रत्ना—वीरबल, एषः, एष एव स बहुभूषणभूषितमर्कटकः कामेश्वरहतकः। यस्य किल समाचारो नित्यमेव रत्नाकरस्य स्वान्तसन्तापाय परिकल्पते। यस्य शोणितपिपासया प्रतिक्षणमेव च पर्याकुलं चित्तं रत्नाकरस्य।

वीर—एष कः पुनरपरः पादेन खञ्जः सहसा समुपेत्य नदीनिक्षेपमस्य प्रतिषेधति। आः उज्जीविताः स्मः। एष तरण्यां, शयितः समुपचर्यते विशालाक्षः। क्रमेणासौ संज्ञामुपलभते। अये एष संज्ञां लब्ध्वा समुत्थितः !

रत्ना—अहो निपुणः खलु विशालाक्षः।

वीर—रत्नाकर इति वक्तव्यम्।

रत्ना—वयस्य, वीरबल, मा मैवम्—

यत्र यत्र प्रयोगो मे सफलत्वमुपागतः।
तत्र सर्वत्र युष्माकं प्रभावो मूलतां गतः॥

वीरः—अलमात्मस्तवेन। वयस्य, पश्य पश्य, एष विशालाक्षः संवादं कुर्वन्न इतस्ततः परिक्रामति, एष न दृश्यते।

रत्ना—नूनमिदानीं प्रकोष्ठात् प्रकोष्ठान्तरमभिवीक्षते।

वीर—अये, एष पुनः प्रत्यावृत्तो दृश्यते, एष अस्मत्तरणीं लक्षयन्नास्ते।

रत्ना—तदेष एव नः समयः। तदलं विलम्बेन। एषाऽसौ तरणी नातिचिरेणैव नद्या वक्रं प्रवाहमभिविशेत्। तदलमद्यापि कालात्ययेन, स्वल्पमतिक्रम्य पुनरप्याहूयतां विशालाक्षः।

वीर—एवं करोमि। भो वाहकाः, वाहयत।

वाहकाः—तथा ( तरीं वाहयन्तो निष्क्रान्ताः सर्वे )।

( ततः प्रविशतो भयं नाटयन्तौ धीवरौ )

१मः—अरे, रोहितक, अद्यापि परीक्ष्यतां मे हृत्कम्पः। भाग्येन अन्तरालगतौ जीवितौ स्वः।

२यः—आं नाम्नैव तावत्कालं विदितो रत्नाकरः, अद्यासौ प्रत्यक्षमेव दृष्टः। अये, ईदृशो नाम रत्नाकरः! आम् अत एवास्य नामश्रवणादपि जनाः कम्पन्ते।

१मः—अरे, अलमत्र निमेषमपि स्थित्वा, शीघ्रमपेहि, यावद् वृक्षान्तरालेन गत्वा निरातङ्कं मातुरङ्कं प्रविशावः।

२यः—अरे तरण्याः का गतिः?

१मः—अरे रे, न खलु जीवनादप्यभीष्टतरा तरणी। तदलं तरणीप्रेम्णा स्वजीवनव्ययं कारयित्वा।

२यः—का गतिः ? एवमस्तु । हा तरणि, बहुलेन दुःखेन कारितासि । हा तरणि !

१मः—मूर्ख, अलमुच्चैराक्रन्दनेन, शीघ्रं निष्क्राम ।

२यः—कथं नु खलु जीविका स्यात्, हा तरणि ! ( निष्क्रान्तौ ) ।

( ततः प्रविशति च्यवनः तत्पत्नी च )

च्य-पत्नी—आर्यपुत्र, सौभाग्यतः पुत्रप्रयत्नेन अपगतेऽपि दारिद्र्ये समुपनतेऽपि सुतरां सुखसम्भोगे किमिति भवानुत्तरोत्तरं विषण्ण इव लक्ष्यते ? तत् किन्तु खल्विदम् ?

च्यवनः—प्रिये, कीदृशं मां लक्ष्यसि ?

च्य-पत्नी—कतिचिद्दिनानि यावत् कुत्रापि भवतः प्रसादं न पश्यामि । सर्वदैव गभीरा कापि चिन्ता भवन्तमावृणोति, भोजने शयने भ्रमणे अन्यत्र च परतन्त्रमिव भवन्तमालोकयामि । यदा तावदतिदारिद्र्यादस्माकं सुदुःसहं दुःखमासीत् तदापि न ते तादृशं मालिन्यमवलोकितम् । तत् कथय, कथमीदृशी साम्प्रतं ते भावपरिवृत्तिः ? ईदृशं भवन्तमवलोक्य सुतरां दुःखितास्मि ।

च्यवनः—प्रिये, जराया एष प्रभावः, किमन्यत् ?

च्य-पत्नी—आर्यपुत्र, मा मां वञ्चयस्व, कतिपयदिवसेभ्यः पूर्वं कष्टायामपि दशायां तथा प्रसन्नस्यापि ते तावता स्वल्पकालेन तादृशो जराजनितो विकार इति नैतदुपपद्यते । तत् सत्यं कथय । एषाहं ते धर्मपत्नी । प्रसीद, अलं मां वञ्चयित्वा ।

च्यवनः—प्रिये, कथमेवं निर्बन्धं वहसि ? यदि सत्यमुच्यते, तदा महद्दुःखं गमिष्यसि । तावत्कालं तवैव दुःखपरीहाराय सत्यं प्रच्छाद्य स्वयं पुटपाकेनेव कठोरं सन्तापमनुभवन्नपि मूक एवास्मि । तदलं निर्बन्धेन, विरता भव मालिन्यहेतुश्रवणाध्यवसायात् ।

च्य-पत्नी—भवतु दुःखं तथापि श्रोष्यामि । दुःखं हि स्निग्धजनसंविभक्तं सह्यवेदनं भवतीति सन्तः समामनन्ति ।

च्यवनः—प्रिये, यदि तथापि निर्बन्धः, श्रूयताम्—

च्य-पत्नी—कथयतु आर्यपुत्रः।

च्यवनः—प्रिये, पुत्रप्रयत्नेन दारिद्र्यमपगतमिति भृशं प्रसन्नासि ननु?

च्य-पत्नी—अथ किम्। कथमिदं भवतोऽपि न प्रसादमावहति?

च्यवनः—प्रिये, महता मे दौर्भाग्येण।

च्य-पत्नी—आर्यपुत्र, यदि एवंगतस्याप्यात्मनो दौर्भाग्यं मन्यते, तत् केषां पुनः सौभाग्यम्?

च्यवनः—प्रिये, यद्येवं पृच्छसि, श्रूयताम्—

येषां पुत्राः साधुवृत्तेन पूता
भक्त्या पित्रोः पूजने व्याप्रियन्ते।
यत्पुत्राणां शीलतो लोकभव्यं
भाग्यं तेषां नेतरेषां कथञ्चित्॥

च्य-पत्नी—यद्येवं भवानपि सौभाग्यवानेव। एकमात्रः स्निग्धचित्तः पुत्रस्ते रत्नाकरः शीलवानावयोः पित्रोः परमां भक्तिं दधानः प्रतिदिनमर्चनां कुरुते। यथा यथावयोः सन्तोषस्तथा तथैव प्रयतते। व्यतीतं दैन्यदुःखं, तत्प्रसादेनैव राजेव भवानभिष्टूयते प्रतिदिनं परिजनसहस्रैः, तथापि कथं नास्ति भवतः सन्तोषः?

च्यवनः—प्रिये, आपातदर्शिनी भवती सुखमात्रमन्वीक्षमाणा प्रसीदति। अहन्तु तथा सुखोपकरणेषु विद्यमानेष्वपि पुत्रस्य ते दुरन्तशीलविचारेण सुतरां विषण्णोऽस्मि।

च्य-पत्नी—कथमिव?

च्यवनः—प्रिये, दुःसहदारिद्र्यापगमेन सुखितासि, अपि जानासि कथमस्माकं दारिद्र्यमपगतमिति?

च्य-पत्नी—कथं न जानामि?

च्यवनः—यदि जानासि कथय।

च्य-पत्नी—किमन्यत्? रत्नाकरस्य मे वत्सस्य परमोपकारिणा दक्षिणशीलेन मित्रेण ऐश्वर्यं विसृष्टमिति।

च्यवनः—प्रिये, नैतदेवम्। प्रथमतस्तावदहमपि रत्नाकरप्रत्ययेन तथैव निरधारयम्, किन्तु साम्प्रतमन्यथैव गृहीतार्थोऽस्मि।

च्य-पत्नी—कथमिव?

च्यवनः—प्रिये, श्रूयताम्; —अपि स्मरसि पुरा रत्नाकरेण प्रथमतो वितीर्णं वित्तमासाद्य धनदत्तस्य ऋणं शोधयितुं गतः सपरिजनेन राजश्यालेन परिभूतोऽस्मीति।

च्य-पत्नी—अथ किम्। कथं वा तद् विस्मर्यते?

च्यवनः—तदैव राजकुले साहसमधिकृत्य—

राष्ट्रियस्य मुखाच्छ्रुत्वा दोषं रत्नाकरस्य मे।
सन्देहो हृदये जातो विश्वस्तस्यापि तं प्रति।

च्य-पत्नी—कीदृशोऽसौ सन्देहः?

च्यवनः—प्रिये, लज्जते रसना तदभिधातुम्! अथवा का गतिः? वत्सस्ते रत्नाकरश्चौर्यसाहसेन धनमासादयति न वेति।

च्य-पत्नी—धिक् शान्तम्! असम्भाव्यमेतत्। कथं रत्नाकरेऽपि भवतस्तादृशः संशयः?

च्यवनः—प्रिये, आदौ सन्देहबीजमुप्तं राष्ट्रियेण। ततश्च रत्नाकरस्य दोषसंशयेन हृदि प्ररूढं महान्तं सन्तापं सोढमशक्नुवन् भूतार्थपरिज्ञानाय महान्तं प्रयत्नमकरवम्।

च्य-पत्नी—ततस्ततः।

च्यवनः—ततो ज्ञातो भूतार्थः।

च्य-पत्नी—कीदृशः सः?

च्यवनः—प्रिये, किमन्यत्?

यद्यत् संशयितं नरेशपुरुषै रत्नाकरे दूषणं,
तत् सत्यं न हि केवलं दुश्चरितं तस्यापि निःशेषताम्।

तन्नाम्नोऽपि भयं व्रजन्ति नगरे वित्तेश्वराः साम्प्रतं
जीवान् वित्तकृते निहन्ति स चिरात् स्वच्छन्दतो निर्भयः ॥

अपिच—

एतद् रत्नपुरं दुरन्तचरितैः पर्यावृतं सर्वत-
स्तत्पक्ष्यैरतिमानुषेण विधिना तस्यानुगुण्यं गतैः ।
एतेषामधिपस्य दुष्कृतकृतो रत्नाकरस्याज्ञया
धर्मो लोपमिवाश्रितो भयवशात् पापश्च वृद्धिं गतम् ॥

किं बहुना

वित्तार्थं मिथुनानि हन्त्यपदयो बालं तथा बालिकां
भूदेवान् सुकृतानुसारकुशलान् हित्वा सतां प्रत्ययम् ।
शूद्राचारपरः प्रयाति न चिराद् वेदेषु विश्वस्ततां
स प्राप्तो विलयं क्वचित् समभवद् भिन्नोऽद्य रत्नाकरः ॥

च्यवन-पत्नी—आर्यपुत्र, किं कथयति भवान् ? एवं किल रत्नाकरो जात इति कथं विश्वसिमि ?

च्यवनः—प्रिये, ममापि पुरा तथैव मतिरासीत्, परमिदानीं प्रमाणशत-मासाद्य तां मतिं विसर्जितवानस्मि । अहह ! स्मरामि, हन्त स्मरामि, एष किल वत्सो मे—

पुष्पच्छेदाद् वल्लरीं दूयमानां मत्वा पूर्वं बाष्पधारां मुमोच ।
कष्टं हन्तुं जीवसङ्घस्य पूर्वं सर्वं दुःखं स्वल्पकं तेन मेने ॥

च्यवन-पत्नी—स एव रत्नाकरः साम्प्रतं तथा निष्ठुरः कृत्याकृत्यविचार-पराङ्मुखः साहसकारीति कथं विश्वसिमः ?

च्यवनः—प्रिये, अलमविश्वासेन, विश्वस्ता भव, नूनमिदं त्वं न जानासि—

दारिद्र्यं नाम जीवानां सर्वसद्वृत्तिशातनम् ।
मुमूर्षून् पश्यतः स्वीयान् साधोरपि मतिभ्रमः ॥

च्य-पत्नी—यद्येवं, किमिति पुत्रस्य तथा दोषं विदित्वापि भवान् न तत्प्रतिषेधाय प्रवृत्तः ?

च्यवनः—प्रिये, न जानासि, तत एवं ब्रवीषि ।

च्य-पत्नी—कथमिव ?

च्यवनः—प्रतिषेधे महान् प्रयत्नः कृतोऽपि निष्फलो जातः ।

च्य-पत्नी—आर्यपुत्र, सकृत् कृतः प्रयत्नो यद्यपि निष्फलस्तथापि द्वितीये वारे स फलप्रसूर्भवितुमर्हति । तत् पुनरपि प्रतिषिध्यतामेषः, येन प्रयत्नस्य साफल्यं सम्भवेत् ।

च्यवनः—प्रिये, किं ब्रवीषि सकृदिति । शतशः कृतः प्रतिषेधो निष्फलो जातः ।

च्य-पत्नी—आश्चर्यम् ! गुरौ लोकातीतभक्तिशालिनोऽपि तस्य भवद्वचनमनभिनन्द्य तथा गतिरिति कोऽयं दुर्ग्रहः ?

च्यवनः—प्रिये, किं वा कथयामि ?

यदा निषेधामि विरुद्धयुक्तिभिः
सदोषतामस्य कृतेरुदाहरन् ।
तदा स मूको विलसत्यधोमुखः
कृतिं ततः किन्तु करोति पूर्ववत् ॥

तत एव दुष्प्रतीकारमिमं व्याधिं मन्यमानो दुरुत्तरया चिन्तया मालिन्यमाश्रितोऽस्मि । प्रिये, प्रतिपलं पुत्रवृत्तं परिचिन्तयतो ममाद्य सुतरामशान्तिसमाक्रान्तं समग्रं जगत् । हा ! हा !!

तापस्तीव्रो दहति हृदयं भिद्यते मर्मबन्धः
शीर्णारण्यं भुवनमखिलं शान्तिलेशोऽपि लुप्तः ।
घोरध्वान्तं प्रसरति भुवि व्यायतं व्यालकीर्णं
यद् यत् सौख्यं कलयसि शुभे सर्वमेतद्धि कष्टम् ॥

क्षुरस्य धारामिव दुःखसन्ततिं क्षमोऽस्मि नो सोढुमसह्यचेतनः ।
येषां सुताः सत्पथबाह्यतां गताः कथं नु ते जीवितशल्यशालिनः ॥

च्य-पत्नी—आर्यपुत्र, तथा सुविज्ञो गुरौ भवति भर्त्तरि स्वल्पोऽप्युपदेशो मे सुतरामधिक्षेपाय कल्पते, तथापि पुत्रस्नेहविवशीकृता किञ्चिद् वक्तुमिच्छामि।

च्यवनः—प्रिये, कथय।

च्य-पत्नी—यद्यपि बहुशः प्रयुक्तोऽपि भवता प्रतिषेधः पुत्रे रत्नाकरे व्यर्थतामियाय, तथापि एहि पितरावावां मिलित्वा युगपत् प्रतिषेधावः, यदि ततोऽप्यसौ दुष्कृतान्निवर्त्तेत। तदिदानीमत्रैव तं समाहूय प्रयत्नमनुतिष्ठावः।

च्यवनः—प्रिये, साम्प्रतं रत्नाकरमाकारयितुमिच्छसि ?

च्य-पत्नी—अथ किम्।

च्यवनः—कुतः खलु साम्प्रतमसौ लब्धव्यः ; स इदानीं नगर एव नास्ति।

च्य-पत्नी—तत् क्व वा अन्यत्र ?

च्यवनः—स हि पश्चिमाशावलम्बिनि सूरे सप्रहरणः सपरिजनश्च तरणीमधिरुह्य सरयूनदीमवतीर्णः।

च्य पत्नी—कथमिव ?

च्यवनः—प्रिये, अलमलमेतच्छ्रवणेन, कोमलप्रकृतिरसि पातकभीरुश्च। न खल्वेतत्ते सुष्ठु प्रतिभास्यति।

च्य-पत्नी—तथापि श्रोष्यामि। आर्यपुत्र, प्रसीद, कथय।

च्यवनः—प्रिये, तथापि श्रोष्यसि ? तत् का गतिः ? श्रूयतां

नौकाविहाराय नृपोऽस्मदीयो नद्यां सरय्वां समुपागतोऽद्य।

च्य पत्नी—किं तेन ?

च्यवनः—तस्यैव विध्वंसकृते सुतस्ते सहायजुष्टः सरयूं प्रपन्नः॥

च्य-पत्नी—हा हा ! महदत्याहितम्। अत्र उभयतो विपत्तिं पश्यामि। यदि राजा समाक्रान्तो निहन्येत तदा स्वजनसहितस्य राज्ञो विनाशेन सुमहत् पातकम्, अथ नु निहन्येत, तदा एककस्यापि मे दयितस्य पुत्रस्य—अहह ! नातः परं चिन्तयितुमर्हामि। आर्यपुत्र, कथमसौ तदा तादृशाय

दुष्कृताय प्रतिष्ठमानो न कथमपि भवता निवर्त्तितः। हा हा व्यतीते का गतिः।

च्यवनः—प्रिये, किं ब्रवीमि, अद्यास्मिन विषमे कर्मणि प्रवर्तमानो रत्नाकरो मदीयं कठोरं प्रतिषेधं भाविनमुत्प्रेक्षमाण एव प्रस्थानात् पूर्वं न मामभिगतः। अदृष्ट्वैव मां सहायसमेतः स्वाभिप्रायसिद्धये सरयूं प्रति प्रस्थितः। अनन्तरमेव च मत्कर्णपथमागतं तत्।

च्य-पत्नी—तत् किमिदानीं विधेयम्?

च्यवनः—किं वा अन्यत्? सपरिजनस्य राज्ञः प्राणविनाशश्रवणाय सज्जा भव।

च्य-पत्नी—आर्यपुत्र, यदि विपरीतं स्यात्?

च्यवनः—प्रिये! वृथैव तदाशङ्कसे, नहि रत्नाकरस्तथा बलवाहनसमृद्धो येनास्य पराभवः सम्पद्येत।

च्य-पत्नी—अहो उज्जीवितास्मि। आर्यपुत्र, कथय, कथं कदा वा वत्सस्य मे मतिपरिवृत्तिः सम्भविता?

च्यवनः—प्रिये, सुबहु मया चिन्तितं तदधिकृत्य, अत्र एक एव उपायो दृष्टः।

च्य-पत्नी—कीदृशः सः?

च्यवनः—मम स्वेच्छया जीवनान्तः।

च्य-पत्नी—शान्तं पापं प्रतिहतममङ्गलम् आर्यपुत्रस्य! आर्यपुत्र, किमिदं ब्रवीषि? भवतो वचनाद् बिभेमि खलु। एषाहं मन्दभाग्या पादयोस्ते पतामि, प्रसीद, मा पुनरेवं भण।

च्यवनः—( संवरणं नाटयित्वा ) प्रिये, अलं भयेन, स्थिरा भव, दुःसहदुःखावेगादेवं ब्रवीमि। न खलु तथैव कृत्यव्यवसायमधिकृत्य। तदेहि यावदिदानीं वत्सस्य मे आत्रेयस्य मुखचन्द्रं निरीक्ष्य सर्वं सन्तापं लघूकुर्वः।

च्य-पत्नी—यथाज्ञापयति आर्यपुत्रः। ( स्वगतं ) अहो आर्यपुत्रस्य

वचनेन कम्पितमिव मे हृदयम्। भवतु तावत्, एनमन्यासक्तं करोमि, यदि वत्सस्य आत्रेयस्य सम्पर्केण तथा स्यात्। भगवन् भूतभावन, प्रसीद, परिवर्तय मे रत्नाकरस्य हृदयम्।

च्यवनः—प्रिये, अलं चिन्तया, एहि, आत्रेयं पश्यावः।

च्य-पत्नी—यथाज्ञापयति आर्यपुत्रः। ( निष्क्रान्तौ )

---

## सप्तमाङ्कः

( ततः प्रविशति रत्नाकरवीरबलाधिष्ठितैः पुरुषैर्गृहीतः शृङ्खलितपाणिपादः कामेश्वरः )

रत्ना—राजन् कामेश्वर, अथ क्वेदानीं भवतो राजगर्वः ?

राजा—दैवेनापनीतः।

रत्ना—न दैवेन।

राजा—तत् केन वा अपरेण ?

रत्ना—रत्नाकरेण।

राजा—रत्नाकरेण ? को नामासौ रत्नाकरः ?

रत्ना—मूढ, रत्नाकरमेव न जानीषे ? स खलु रत्नाकरो नाम—

येन व्याजलिपिं विधाय भवतः सीमान्तदुर्गे पुरा
सैन्यप्रेषणमेष सत्वरतया त्वं कारितो मूढधीः।
अग्निं योजयता गृहेषु परितो दौवारिकान् निघ्नता
येनाहारि तव प्रभुत्वगरिमा रात्रौ स रत्नालयः॥

राजा—( स्वगतम् ) आं ! स्थान एव नः संशयः। अहो सुतरां वञ्चितोऽस्मि, पराभूतोऽस्मि, मुषितोऽस्मि अनेन जाल्मेन। तदिदानीं

का गतिः ? पङ्कपतितो गज इव अशरणोऽस्मि ! हा कष्टम् ! अशरणोऽस्मि ! हा ! हा !!

लीलावती प्रियतमा परिपश्यतो मे
मूढैस्तदा न्यवधि हन्त परिस्फुरन्ती ।
सख्योऽपि हा बत समां गतिमाप्नवत्यो
याता लयं निशि ममानुगताः समस्ताः ॥

हा देवि, हा पुत्रकाः ! अपि नाम दैवं पुनरपि युष्माकं दर्शनमनुमन्येत ? अपि नाम वा सेनापतिः प्रवरः कुमारो राजपरिजनाश्चापरे यथाकालं सबलवाहनं मामनागतं समीक्ष्य मदन्वेषणाय प्रबन्धं कुर्वीरन् ? अथवा तावत्-कालमेते दुरन्ताः साहसकारिणो मदीयं जीवनं सहेरन्नित्यत्र को वा प्रत्ययः ?

रत्ना—भो राजन् ! किं नु चिन्तयसि ?

राजा—न किमपि ।

रत्ना—मिथ्यैतदात्थ ।

राजा—कथमिव ?

रत्ना—यतः किमपि चिन्तयसि ।

राजा—कस्तत्र साक्षी ?

रत्ना—तव नयन-वदनविकार एव, यमिच्छन्नपि न शक्नोष्यपह्नोतुम् ।

राजा—अस्त्वेवं, का क्षति ?

रत्ना—तत् कथय, किं चिन्तयसि ?

राजा—सम्भाव्यमानां दैवपरिवृत्तिम् ।

रत्ना—( उच्चैर्विहस्य ) मूर्ख, अद्यापि दैवपरिवृत्तिं सम्भावयसि ? अथवा श्रूयतां कीदृशी दैवपरिवृत्तिर्भविष्यतीति । यस्ते प्रधान-सेनापतिः सकलस्य राज्यस्य समालम्बनमद्यापि ते जयाशामुद्दीपयति, स हि तदा प्रशान्तेनापि विषवेगेन ततस्तृतीये दिवसे पुनः प्रवर्धमानेन सहसा पञ्चत्वं गन्ता । तथैव तस्य मूलस्य प्रभावः ।

राजा—हा कष्टम् , कथमत्रापि वैरिणा वञ्चितोऽस्मि।

रत्ना—अन्यच्च, यस्ते प्रधानामात्यः सोऽपि गुप्तघातकेन नचिरादेव प्राणैर्वियोजयिष्यत इति कूटपुरुषो मया नियुक्तः।

राजा—अहो दौर्जन्यं खलस्य!

रत्ना—राजन! अलमेतावतैव समाप्तिमवधार्य, अन्यदप्यस्ति ?

राजा—किमिवातः परं स्यात् ?

रत्ना—श्रूयताम्—यस्ते प्रवरः कुमारः परमस्नेहभाजनम्।

राजा—किं तस्य ?

रत्ना—अलमुत्कण्ठया, श्रूयताम् ;—स हि तदा कण्ठे गृहीतेन मूलेन रात्रौ सर्पभावमाश्रितेन पञ्चत्वं प्रापयिष्यते, कुमाराश्चापरे न चिरादेव गुप्तघातकैर्विषप्रयोगेण व्यापादयिष्यन्ते।

राजा—हा हतोऽस्मि मन्दभाग्यः! रत्नाकर! अपि त्वं पुत्रवान नासि, येनैवं कुमारेषु निष्ठुरमनुतिष्ठतस्ते न द्रवतामुपैति चेतः ? रत्नाकर! किमेवं निष्ठुरोऽसि ?

रत्ना—बाढं पुत्रवानस्मि, अत एवायमारम्भः।

राजा—कथमिव ?

रत्ना—राजन, कामेश्वर, अपि स्मरसि, यदनुष्ठितं तदा मदीये पुत्रके ?

राजा—किमिव तत्, न स्मरामि।

रत्ना—कथं वा स्मर्येत ? यतः खलु नासौ राज्ञः पुत्रको भवति। आश्चर्यमाश्चर्यम्! राज्ञः पुत्रा एव पुत्रकाः दीनस्य पुत्रास्तु कुक्कुरशावकाद् वा विडालपोतकाद् वा हीनतराः।

कायो राजकुमारस्य कुसुमेनापि भिद्यते।
शतधा छिद्यमानोऽपि दीनपुत्रो न खिद्यते॥

राजा—रत्नाकर! किमेवं भवान् ब्रवीति ? नावधारयामि।

रत्ना—मूढ, कथमिदानीमात्मानं स्मरन्तमपि प्रच्छादयसि ? अहह! स्मरामि तदानीमात्रेयस्य मे कुमारस्य कुसुमकोमले काये कर्कशकशाघातेन

शोणितप्रवाहमयानि क्षतानि, कातरमातरश्च हृदयशोकहेतुम्। एषोऽहं तदैव प्रतिज्ञातवानस्मि—

येन मे पुत्रकस्याङ्गे कशाघातः प्रयोजितः।
मया तस्य प्रमूढस्य वंशध्वंसः करिष्यते॥

तत एवायमुत्कटः समारम्भः। कृतं दुष्कृतं, तस्य फलं नोपभोक्ष्यते?

राजा—भद्र, रत्नाकर, अनुकम्पया मे क्षमां कर्तुमर्हसि।

रत्ना—(हसित्वा) मूढ, यः परेषु क्षमां प्रयुङ्क्ते, स एव क्षमां भिक्षितुमर्हति। त्वं पुनरात्मनो वृत्तशतं स्मरन्नपि क्षमां भिक्षमाणो न लज्जसे? पश्य—

दुर्भिक्षेण निपीडितस्तत्र यदा दीनप्रजानां गणो
भृत्यैस्ते करसंग्रहाय विविधैर्मार्गैः पुरा पीडितः।
तावत् किं क्षमया प्रजासु भवता कारुण्यमाविष्कृतं
किं वा वह्निमुखादरक्षि भवनं तासां मुहुः प्रार्थनैः॥

राजा—भद्र, रत्नाकर, अहमपराद्धोऽस्मि, तत् ममैव दण्डं धारयितुमर्हसि, को वाऽपराधः शैशवावस्थामनुभवतां कुमाराणाम्? येन तेषु तादृशः कठोरदण्डः समनुष्ठीयते। भद्र, रत्नाकर, को नु खलु तेषामपराधः?

रत्ना—आं तेषामपराधं पृच्छसि? मूढ, त्वदीया अमी पुत्रका इत्येव तेषामपराधः। यद्यमी परस्य पुत्रा अभविष्यन् नैव तादृशं दण्डमन्वभविष्यन्।

राजा—तथापि ते शिशवः।

रत्ना—आं तेषां शैशवावस्थां स्मारयसि? अद्य किल ते शिशवः, परं त एव कदाचित् शैशवमतिक्रम्य भवतः सम्बन्धदोषाद् भवन्तमेवानुकरिष्यन्ति, ततः साम्प्रतमेव कर्तव्यस्तत्प्रतीकारः।

राजा—रत्नाकर, प्रसीद, विरम विरम कुमाराणां मे जीवनव्यापादनाध्यवसायात्। रत्नाकर, अलमेतावता नैष्ठुर्येण। अन्यथैव प्रतीकारं कुरु।

रत्ना—विराम इति, भवतो वंशं समूलमनुच्छिद्य न विरमामि।

राजा—रत्नाकर, एष ते पादयोः पतामि, प्रसीद, कुमारेषु प्रसीद, अलं तेषु दक्षिणाचारेषु निष्ठुराचारेण। प्रसीद।

रत्ना—मूढ, अपि तदा बाले दक्षिणाचारे कुसुमकोमले मदीये पुत्रे दर्शितस्त्वया स्वल्पोऽपि प्रसादः? तदलमद्य व्यर्थनाक्रोशनेन।

राजा—रत्नाकर! वृथैव मे दीनप्रलापाः?

रत्ना—तत्र किमद्यापि प्रष्टव्यमस्ति?

राजा—रत्नाकर, कथमपि नानुकम्पसे?

रत्ना—मूढ, अलमुत्तरोत्तरेण, रत्नाकरो नैतादृशस्य दयते।

राजा—हा हा पुत्रकाः! ममैव व्यसनिनः पितुर्दोषेण भवन्तो हताः स्थ। हा हा!

अङ्कुरोद्गममात्रेण निष्ठुरेण हतो द्रुमः
छाया-पुष्प-फलाद्याशा समूलमिह नश्यति॥

हा हा पुत्रकाः!

कथं मे मन्दभाग्यस्य गेहे यूयं जनिं गताः।
राजश्रीरद्य युष्माकं मरणाय प्रकल्पते॥

हा हा देवि, मुषितासि, परिभूतासि मया मन्दभाग्येन स्वामिना। हा हा देवि,

दूरे स्थितः कल्पनया विपत्ते-
र्यस्या विमूढोऽस्मि कठोरशोकैः।
प्रत्यक्षमेतां बत वीक्षमाणा
प्राणैर्वियुक्ता भवितासि नूनम्॥

अहह! शून्यं सचराचरं जगत्! घूर्णते शिरः, कम्पते शरीरम्! अपसरतीव चरणतलात् पृथिवी! न स्थातुमर्हामि, हा हा पुत्रकाः! (मूर्च्छति)।

रत्ना—(उच्चैर्विहस्य) हाः हाः हाः! प्रतिहिंसा! प्रतिहिंसा!! वयस्य, वीरबल, एष कामेश्वरो मूर्च्छितो वर्तते, तद् यावदेष संज्ञां लभते, तावत् निवेद्यतां तातः।

वीर—किमिति ?

रत्ना—इदं तावत् निवेद्यताम्—

येनाधारि त्वयि कुपतिना दुर्नयः क्रूरबुद्ध्या
येनाकारि व्यसनशतकं सन्ततं लोकबाह्यम् ।
यस्यादेशात् कति कति जना दुःखमन्तं प्रपन्नाः
सोऽयं कामेश्वरनरपशुः संयतोऽस्माभिरद्य ॥

अथवा एतदुच्यताम्—

यस्याज्ञां परिपश्यतस्तव तदा पौत्रे प्रिये साहसाद्
आत्रेये परुषं कशाहतिशतं व्यापारयन् पूर्वतः ।
येनात्रेयशरीरतः समवहद्रक्तं विषादाय ते
सोऽयं संयमितोऽत्र पौरुषभृतैः कामेश्वरो भूपतिः ॥

वीर—यथाज्ञापयति प्रियवयस्यः । ( निष्क्रान्तः )

रत्ना—भो भोः पुरुषाः ! अत्यारूढा रजनी, परिश्रान्ताश्च यूयं कृत्यशतैः, तदिदानीं गच्छत यूयं विश्रामाय, अहमेक एवात्र वीरबलमपेक्षे ।

पुरुषाः—यथाज्ञापयति स्वामी । ( निष्क्रान्ताः )

रत्ना—(स्वगतम्) अहो प्रमोदः ! पूर्णप्रायां प्रतिहिंसां पश्यामि ।

मूढ, कामेश्वर,

कृष्णसर्पः पदा स्पृष्टः, फलं तस्य न भोक्ष्यते ?
स्वेच्छया ज्वलनज्वाला समाक्रान्ता विपत्तये ॥

अथवा तातो नाम विशेषतः साहसमस्माकमविजानन्नपि पदे पदे संशयितः साहसमतिदोषस्थानमित्युपदिशति, प्रतिषेधति च कठोरव्यवसायं मे सनिर्बन्धम् ? तन्न जाने कीदृशमद्य वृत्तेनानेनासौ प्रतिपद्येत ।

( प्रविश्य ) वीरबलः—वयस्य रत्नाकर, भवद्वचनेन निवेदितस्तातः ।

रत्ना—अथ श्रुत्वा किं नाम प्रतिपन्नं तातेन ?

वीर—वयस्य, तातो मन्मुखाद् भवद्वचनमाकर्ण्य क्षणं तूष्णीं स्थित्वा सानन्दमाह—ब्रूहि वीरबल, परं प्रीतोऽस्मि भवतामनेन व्यापारेण ।

तदिमं निगडितकरचरणमस्मिन्नेव मद्भवनसन्निहिते न्यग्रोधपादपे बधान, परिश्रान्ता यूयं, अवसिता च मे प्रायेणाद्यतनी निद्रा, तद् यावदहं स्वयमेव निशावसानं यावत् एनं प्रतिपालयामि। अवसितायाश्च निशायाम् अस्यैव सन्तप्तेन कण्ठशोणितेन रक्तचन्दनीकृतेन प्रोद्यतः सूर्यस्य अर्घ्यं कल्पयित्वा सुतरां तृप्तो भविष्यामि।

रत्ना—अहो सुतरामनुगृहीतोऽस्मि तातेन। तद् वयस्य, वीरबल, अलमद्यापि कालक्षेपेण, एहि यावदकालहीनं तातादेशमनुतिष्ठावः। तद् गृह्यतामयम्। अहमनुपदमागच्छामि।

वीर—एवमस्तु ( राजानं विसंज्ञं गृहीत्वा निष्क्रान्तः )।

रत्ना—अहो सुतरां प्रवृद्धा रजनी ! तथाहि—

यामात् परं समुदितो विधुरम्बरस्य
मध्यं गतः किरति चारुकरोपहारम्।
निस्तब्धतामिह भुवो विहगाः कदाचिद्
भिन्दन्ति हिंस्रपशवोऽपि रुतैः समन्तात्॥

( ततः प्रविशति गायन्ती सुमतिः )

गीतम्

एहि दयित भवनं निजमेहि दयित सत्वरम्
दूरे वद विहरिष्यसि विकलः कतिवासरम्।
तिमिरात् परमेष नभसि रुचिमञ्चति चन्द्रमाः
तव कथमिव हृदयं नहि सुविमलरुचिभास्वरम्॥
परिहर परवासकलुषमेहि निजनिकेतनम्
शून्यं प्रिय समलङ्कुरु रुचिरं निजमन्दिरम्।

( निष्क्रान्ता )

रत्ना—अहो हृदयस्पर्शि सङ्गीतम् ! स्ववासमपहाय परवासं कलुषमग्नं प्रत्युपदेशः। तत् का नु खल्वेषा ? को वासौ प्रोषितो नाम ? अथवा किं ममानेन अप्रस्तुतेन, यावदिदानीं प्रकृतं पश्यामि ( निष्क्रान्तः )।

# अष्टमाङ्कः

( ततः प्रविशति पादपस्कन्धे रज्जुबद्धः कामेश्वरः )

कामेश्वरः—( स्वगतम् ) हा कष्टम् ।

योऽहं पुरा नरपतिः शतशः सदोषान्
सम्प्रापयं गुरुकदण्डशतं क्षणेन ।
सोऽहं दुरुत्तरकृतान्तवशात् प्रपन्नो
बन्धं कृतान्तवदनं परिलोकयामि ।

अहो दुरन्तशीलस्य रत्नाकरस्य कृत्यसीमा !

लीलावतीं कुसुमकोमलकायकान्तिं
मुक्तिं सपादपतनं बत भिक्षमाणाम् ।
क्रूरो जघान यदसौ परिपश्यतो मे
तत्तीक्ष्णशल्यसदृशं रुजमातनोति ॥

हा प्रिये, लीलावति, नाहं तावद्भिः सत्रहरणैः सैनकैः सहितः परिपश्यन्नपि ते तथाविधां विपत्तिं प्रतिकर्तुं समर्थोऽस्मि । हा हा ! मृताः सर्वे एव ते सैनिकाः परिजनाश्च तस्यैव क्रूरकर्मणो निष्ठुर-व्यवसायेन : अहह !

प्राणैः पणैः प्रभुहिताय कृतप्रयत्ना
हन्तासुरेण निहताः स्वजना मदीयाः ।
एतावतैव न हि निर्वृतिरस्य जाता
पुत्रादिकेष्वपि महद् विषमं कृतं यत् ॥

हा पुत्रकाः ! हा प्रधानामात्य, हा सेनापते, दूषिताः स्थ परिभूताः स्थ कामेश्वरहतकेन । तथाहि—

मत्सम्बन्धवशादेव भवतामेव संक्षयः ।
अन्यस्यामपि जातौ मा मत्सम्बन्धमुपैष्यथ ॥

हा वत्स देवरात, हा प्रवरकुमार, हा मदङ्कदुर्ललित, हा राजकुलप्रधानालम्ब, न जाने एतावत्या रजन्या कीदृशीमवस्थां प्रापितोऽसि । हा हा !

दष्टोऽसि किं भुजगभावमुपागतेन
मूलेन शत्रुनिहितेन निशि प्रसुप्तः ।
मां दुर्भगं स्मरसि किं प्रतिकारहेतो-
र्वत्स प्रयाम्ययमहं क्षणमेधि शान्तः ॥

( गन्तुमुद्यतः स्वीयबन्धनमनुभवन् ) अहह ! बद्धोऽस्मि, वैरिणा रत्नाकरेण कठोरं बद्धोऽस्मि । हा वत्स, देवरात, क्वासि, देहि मे प्रतिवचनम् । ( मूर्च्छति ) ।

( ततः प्रविशति सशङ्कमितस्ततः पर्यवेक्षमाणश्च्यवनः )

च्यवनः—निःशेषं प्रसुप्तं रत्नपुरम् । तथाहि—

कोलाहलः शान्तिमगाज्जनाना-
मन्योन्यमालापकृतां क्रमेण ।
न सारमेयोऽपि दधाति रावं
झिल्लीरवाः केवलमुच्चरन्ति ॥

( समीपे सारमेयरावं श्रुत्वा ) अये एष समीपे सारमेयः क्रोशति ! तत् किमनेन कश्चिदागच्छन्नवलोकितः ? हा हा व्याहतक्रियोऽस्मि ! ( अपसृत्य निपुणं दृष्ट्वा ) आः ! समुज्जीवितोऽस्मि । एष सारमेयः काननान्तर-निष्क्रान्तं प्रकाशे चरन्तं शृगालमवलोक्य क्रोशति ! अहो शीघ्रचेतनता सारमेयाणाम् ! तथाहि—

श्वानः क्षणेन निद्रान्ति प्रबुध्यन्ते क्षणेन च ।
नृणान्तु मोहसुप्तानां प्रबोधो न चिरादपि ॥

अत एवाहं प्रियपुत्रस्य रत्नाकरस्य मोहनिबन्धनां दुरन्तवृत्तिमन्यथाकर्तुकामः कामेश्वरसंरक्षणव्याजेन स्वेच्छया स्वजीवनत्यागं कर्तुं व्यवसितोऽस्मि ।

वत्स रत्नाकर, वञ्चितोऽसि पितरि दाक्षिण्येन। यतः कामेश्वरसंरक्षणभारो मयैव गृह्यत इति वचनार्थो न त्वया गृहीतः। हा वत्स, रत्नाकर, चिरात् प्रभृत्येव त्वदीयां दुरन्तवृत्तिं समाशङ्कमानः सुदुःसहेन तापेन ज्वलितः कियद् वा न त्वामुपदिष्टवानस्मि। तावदुपदेशानन्तरमपि अद्य त्वां तादृशे लोकोत्तरे दुर्नये प्रवृत्तमुपलभ्य शतधा छिन्नानि मे मर्माणि। ज्वालामयः प्रतिभाति सकलः संसारः। दुर्वहः प्रतीयते जीवनभारः! यावदेव चिन्तयामि तावदेव प्रवर्द्धते तीव्रः सन्तापः। तन्नास्ति मम जीवनान्तं विना गतिरन्या। अहह! सर्वं परिहाय गच्छामि, पुत्रं रत्नाकरं त्वां, वत्सलं पौत्रमात्रेयं, आशैशवादभिन्नहृदयां पतिव्रतां पत्नीं, प्रियतमां कन्यामिव स्नुषां, स्वेच्छया परिहाय क्वापि गच्छामि। अथवा गन्तव्यम् अवश्यं गन्तव्यम्, आत्मनो जीवनघातेन पुत्रस्य चरित्रं शोधयितव्यम्!

यदि स्नेहान्न मुञ्चेयं जीवनं बन्धुवत्सलः।
पापेन क्रमवृद्धेन पुत्ररूपः स्वयं हतः॥

तदनेनात्मनो विनाशेन पुत्ररूपमात्मानं परित्रास्ये। कृतं विलम्बेन। यावत् पादपसमीपं गत्वा कामेश्वरं बन्धनाद् विमोच्य तदीयपाशेनैव वृक्षशाखायामात्मानमुद्बध्य व्यापादयेयम्। ( पदान्तरं परिक्रम्य ) अथ रत्नाकरः कथं जानीयाद् यदहं तस्यैव दुरन्तेन शीलेन विदूनो मरणं वृणोमि, नैव कारणान्तरेणेति। हा धिक् सर्वथा व्याहतप्रयोजनो मे संकल्पः! तत् केनाभ्युपायेन वेदयामि, केन वेदयामि? ( विचिन्त्य ) आं दृष्टम्! सर्वमिदं पत्रारूढं कृत्वा स्वसमीहितं साधयामि। क नु खलु लेखोपकरणान्यासादयेयम्। ( इतस्ततो दृष्ट्वा ) एष दृश्यते सन्निहिततालीवृक्षान्नातिचिरपतितः पत्रप्रतानसहितः शाखादण्डः, अस्मादेव पत्रमादाय तत्र लिखामि। एतत्पत्रान्तरालवर्तिनी शलाकैव लेखनी भविष्यति। अथ क नु खलु मसीमासादयामि, धिक् कष्टम्! सर्वोपकरणसम्भृतस्यापि मसीं विना कृत्यव्याकोपः! तत् किमिदानीं करिष्ये? ( विचिन्त्य ) आं दृष्टम्! सुष्ठु दृष्टम्!!

कण्टकेन विनिःसार्य शोणितं स्वशरीरतः ।
तेन पत्रं लिखाम्यद्य तनयस्य विशुद्धये ॥

तदविलम्बितमेव स्वसमीहितं साधयामि। (पत्रमाहृत्य कण्टकमादाय) एष गृहीतः कण्टकः। इह वृक्षपत्रान्धकारेण समाच्छन्नो भूभागः। तन्नेह शक्यते लेखः। तत् किञ्चिदपसृत्य निर्मलचन्द्रालोके भूमिभागे समुपविश्य लिखामि। (किञ्चित् परिक्रम्य) एष निर्मलचन्द्रकिरणोज्ज्वलो भूभागः, तदिहैव समुपविश्य क्वचित् पत्रे शरीरात् शोणितं निःसार्य धारयामि। (तथा कृत्वा) इदं पत्रे सन्धारितं रक्तम्। तदिदानीं सत्वरं लिखामि। (तथा कृत्वा) एतत् समाप्तं पत्रम्। क नु खलु स्थापयामि? (विचिन्त्य) आं दृष्टम्! वस्त्रकोणे ग्रन्थिगतं करोमि। अन्यत्र स्थापितमिदं नीहारस्नपनादिना नष्टलेखं स्यात् रत्नाकरस्य दृष्टिबाह्यतां वा अश्नुवीत। (तथा कृत्वा) एतत् समाप्तं पूर्वकृत्यम्। अथेदानीं कामेश्वरसमीपमुपसृत्य शेषमनुतिष्ठामि।

(इतस्ततः पश्यन् सशङ्कमुपसृत्य पेचकरावं श्रुत्वा)

अये अदूरे शब्दः! तत् को नु खल्वेषः? (पुनः श्रुत्वा) आम् एष कौशिकः क्रोशति। (पुनः पक्षिशब्दमाकर्ण्य) अये एष कातरो बालकण्ठः सत्वरं मामभिद्रवति! हा धिक् कष्टं! नूनमेष आत्रेयो मे वत्सः शयने मामसमीक्ष्य विदितमत्सङ्कल्पः समावर्तते। हा धिक्! व्यर्थः सर्व एव मे समारम्भः। यद् भवतु तद् भवतु, इह वृक्षान्तरितगात्रः प्रतिपालयामि। (पुनः शब्दमाकर्ण्य) आम् एष विहङ्गमविशेषो बालकण्ठमनुकुर्वन् शब्दधारां सृजति। अहो धिक्!

पदे पदे काम्यविघातकल्पना स्वबान्धवेभ्यो भयमातनोति मे।
भयेन हीनाः कथमेव तस्कराः परालयं हन्त विशन्ति सम्पदे॥

कामे—अहह! कठिनहृदयोऽस्मि, यदद्यापि जीवामि। हा वत्स, देवरात, क्कासि?

च्यवनः—अये एष कामेश्वरः स्वजनं स्मरन् रोदिति ! तदचिरमुपसर्पामि । ( उपसृत्य ) राजन् कामेश्वर ।

कामे—अहो अद्यापि स एव परिहासः ! भद्र रत्नाकर, अलमद्यापि राजशब्देन । क्षते क्षारप्रक्षेपः किल्बिषः । रत्नाकर, अलमलं विलम्बेन, सत्वरं जहि माम् । पश्य—

प्रतिक्षणं पुत्रगताशितं स्मरन्नज्वलामि दावानलतेजसाऽक्षमः ।
विनाश्य मे जीवनमद्य सत्वरं विधेहि मुक्तिं महतः प्रपीडनात् ॥

च्यवनः—अये ! राजा कामेश्वरो रत्नाकर इति मामवैति, भवत्वेवं तावत् । ( उपसृत्य ) राजन् कामेश्वर, मा उच्चैर्भण । नाहं रत्नाकरः, अहं च्यवनोऽस्मि ।

कामे—आर्य च्यवन, सुष्ठु रक्षितोऽस्मि । तत् कियान् विलम्बः सूर्योदयस्य ?

च्यवनः—अलं सूर्योदयेन ।

कामे—तत् किं सूर्योदयात् प्रागेव मां मारयिष्यसि, एवं कुरु, एवं कुरु, एवं किल काम्यते । आर्य च्यवन, प्रसीद, नातः परमपि आत्मानं सन्धारयितुमर्हामि ।

च्यवनः—हा धिक् ! शनैः शनैर्मन्त्रयस्व ।

कामे—कथमिव ?

च्यवनः—मुक्तिं लप्स्यसे ।

कामे—मुक्तिरिति ?

च्यवनः—अथकिम् । तदलं वाङ्मयेन, यथा ब्रवीमि तथा क्रियताम् ।

कामे—कथयतु आर्यः ।

च्यवनः—तिष्ठ । ( इतस्ततो दृष्ट्वा कामेश्वरं मोचयित्वा ) राजन् कामेश्वर, एष मया मोचितोऽसि, अत्र क्षणमपि मा विलम्बेथाः । एतां दक्षिणां दिशमनुप्रवृत्तां वनलेखामाक्रम्य समीहितं देशं प्रति प्रतिष्ठेथाः । एषा प्रभातप्राया विभावरी ।, क्षणादूर्ध्वं सोत्साहा रत्नाकरवीरबलप्रमुखा-

स्तस्कराः साहसिकाः समागमिष्यन्ति, एवं किल सुदूरापेता तव मुक्ति- र्भविष्यति। तदलं विलम्बेन, शीघ्रं प्रतिष्ठस्व, स्वजीवनाय प्रतिष्ठस्व।

कामे—अहो व्रीडितोऽस्मि। ईदृशो महात्मा मया दुर्बुद्धिना तदा निगृहीतः? आर्य च्यवन, एष भवता मोचितो गच्छामि। अभिवन्दे, अनुकम्पया अपराधिनं मां क्षन्तुमर्हसि एष ते प्रणामाञ्जलिः।

च्यवनः—अलं विलम्बेन, शीघ्रं गच्छ। विशुद्धेन चारित्र्येण भगवति परमेश्वरे श्रद्धां धारयेथाः।

कामे—आर्यादेशाद् एवं करिष्यामि। तदेष गच्छामि।

च्यवनः—गच्छ शीघ्रं, शिवास्ते सन्तु पन्थानः।

कामे—एष ते भगवन् पादौ शिरसा धारयन्नहम्।

व्रजामि विपदा मुक्तः पुत्रेभ्यः स्वस्ति दिश्यताम्॥ (निष्क्रान्तः)

च्यवनः—एवमस्तु देवताप्रसादात्। (नेपथ्याभिमुखं दृष्ट्वा) एष कामेश्वरो द्रवति, एष द्रवति, एष वनलेखां प्रविष्टः, एष दृश्यते, एष दृश्यते, एष न दृश्यते, आः निर्वृतोऽस्मि, लब्धजीवितस्तपस्वी निराबाधं गत्वा स्वजन- मुखानि पश्यतु। अपि नाम समारम्भेणानेन वृत्तपरिवृत्तिरस्य सम्भाव्येत? यद्येवं कृतस्तर्हि एकेनैव प्रक्रमेण कृत्यद्वयसम्पादः। यद् भवतु तद् भवतु, अद्यापि महत् कृत्यमवशिष्यते, तदविलम्बितं सम्पाद्य स्वमनोरथं साधयामि। एष पादपः, एषा च बन्धनरज्जुः। तदलं विलम्बेन। यावदमुं वृक्षमारुह्य अनया एव रज्ज्वा कण्ठं बद्ध्वा शेषकृत्यं सम्पादयामि। अये, कथमा- रोहामि? (दृष्ट्वा) आम् एषा भूतलपर्यन्तलम्बिनी महती शाखा, एना- माक्रम्य आरोहामि। (तथा कृत्वा) अहो पादपमारूढोऽस्मि। नास्ति पुनरतः परं कृत्यव्याघातभयम्। प्रभातप्राया विभावरी। तथाहि—

सुप्तोत्थितानां बालानां मातृस्तन्यमभीप्सताम्।
श्रूयते क्रन्दनं वृक्षे विहङ्गानामपि ध्वनिः॥

तदीदृश्येव काले प्रत्यहमात्रेयो मे मातृशय्यामपहाय मामभिवर्तते। तत् किमद्यापि आयास्यति, अथवा नूनमायास्यति, अथ यद्यसौ दृष्टः स्यात्

सर्वं मे हृदयतत्त्वमभिष्यन्देत। तदलं विलम्ब्य, च्यवन, सत्वरं स्वसमीहितं सम्पादयस्व। ( कण्ठं बध्नाति ) नमः सर्वविप्लवकारिणे पुत्रस्नेहाय, नमो भगवते दैवाय ( पतति )।

( ततः प्रविशति वीरबलेनानुगम्यमानो रत्नाकरः )

रत्ना—वयस्य, वीरबल, अद्य प्रशान्त इव मे अन्तरात्मा, येन निर्यातितप्रायः पितृशत्रुः। तथाहि—

क्षणात् परं शत्रुशरीररक्तं तृप्तिं पितुर्मे हृदये विदध्यात्।
जीवन्तमालोक्य पितुः सपत्नं वृथैव सञ्जीवति हीनपुत्रः।

वीर—( उपसृत्य दृष्ट्वा ) वयस्य, शून्यमिव न्यग्रोधस्कन्धं पश्यामि, यत्र कामेश्वरहतको बद्धः, तत् किन्नु खल्विदम्?

रत्ना—( विस्मयं रूपयित्वा ) वयस्य, किं कथयसि? शीघ्रं पश्य निपुणं पश्य ( सर्वत्र पश्यति )।

वीर—वयस्य, न दृश्यते। वयस्य, किन्नु खल्विदम्, इह तातमपि न पश्यामि। तत् किं निशाप्रजागरखिन्नस्तातः सुप्तः स्यात्, तच्चावसरमुपलभ्य शत्रुरपक्रान्तः!

रत्ना—वीरबल, आहूयन्तां शीघ्रं विशालाक्षप्रमुखाः प्रधानपुरुषाः, बलोदग्राः सप्रहरणास्ते सत्वरमिह राशीक्रियन्ताम्। अपक्रान्तः शत्रुः करतलगतोऽपि हन्त अपक्रान्तः शत्रुः। लज्जया भूमिविवरं प्रवेष्टुमिच्छामि, वीरबल, परिभूताः स्मः, वञ्चिताः स्मः!

तच्छीघ्रमिदानीं—

मार्गे पर्वतगह्वरे तरुलतागुल्मान्तराले तथा
नद्याः स्रोतसि सैकते भवति वा यत्रान्यतः संशयः।
तत्तद्देशमुपेत्य शत्रुहतको वीरैः समन्विष्यतां
लज्जाया विनिवर्तनाय सहसा शत्रोर्गतिर्ज्ञायताम्॥

वीर—यथाज्ञापयति वयस्यः। कः कोऽत्र?

प्रविश्य पुरुषः—आज्ञापयतु स्वामी।

वीर—शीघ्रं विशालाक्षप्रमुखान् प्रधानपुरुषान् विज्ञापय ;—एष स्वामी क्षणमात्रकेण न्यग्रोधपादपतले भवतः सर्वान् द्रष्टुमिच्छतीति। शीघ्रं गच्छ।

पुरुषः—यथाज्ञापयति स्वामी। (निष्क्रान्तः)।

रत्ना—वयस्य, वीरबल, क्षणोऽपि साम्प्रतं युगवत् प्रतिभाति। प्रज्वलन्तीव मे शिरांसि। अहो धिक्! मोहात्तदा कृतं माध्यस्थ्यं शत्रु-हतके। हा धिक् कष्टं, मुषितोऽस्मि वञ्चितोऽस्मि। किं करोमि, क्व गच्छामि।

वीर—वयस्य, अलं विक्षोभातिशयेन, क्व नु खलु शत्रुर्गमिष्यति, एष साम्प्रतमेव गृह्यते। तत् स्थैर्यमवलम्बस्व।

(ततः प्रविशन्ति विशालाक्षप्रमुखाः पुरुषाः)

विशालाक्षः—जयति जयति स्वामी।

रत्ना—वीराः! नायं जयघोषणायाः समयः।

विशा—कथमिव ?

रत्ना—अपक्रान्तः शत्रुः। तदलं कालहरणेन, शीघ्रमिदानीं—

'मार्गे पर्वतगह्वरे तरुलतागुल्मान्तराले तथा
नद्याः स्रोतसि सैकते भवति वा यत्रान्यतः संशयः।
तत्तद्देशमुपेत्य शत्रुहतको वीरैः समन्विष्यतां
लज्जाया विनिवर्तनाय सहसा शत्रोर्गतिर्ज्ञायताम् ॥

एष किल ममाज्ञाशेषः—

यूयं शत्रुमगृह्णन्तो मा मां द्रष्टुमभीप्सत।
अन्यथा नामशेषं मां मन्यध्वं त्रपयानया ॥

विशा—स्वामिन्, अलं विषादेन, एष क्षणेन गृह्यते शत्रुः।

सर्वे—जयति जयति स्वामी, जयति जयति रत्नाकरः! हा रे रे रे रे रे! (निष्क्रान्ताः)।

रत्ना—वयस्य, वीरबल, समुच्चमिमं न्यग्रोधपादपमारुह्य पश्य, शत्रो-

गतिर्ज्ञायते न वेति। मम पुनस्तातं प्रति सभयमन्तःकरणं, तदहं तातं पश्यामि। ( परिक्रामति )।

वीर—तथा—( न्यग्रोधपादपमारुह्य ) वयस्य, अत्याहितम्! शीघ्रमेहि।

रत्ना—( प्रतिनिवृत्य ) किमिव?

वीर—इह तातो वृक्षशाखायां लम्बितस्तिष्ठति, शीघ्रमागच्छ।

रत्ना—वीरबल, किं कथयसि? सत्यमेष तातः?

वीर—अथ किम्। स एव।

रत्ना—हा तात!

वीर—नायं रोदनस्य कालः। शीघ्रमेहि।

रत्ना—अपि जीवनं लक्षयसि?

वीर—न खलु।

रत्ना—हा तात! क्वासि? देहि मे प्रतिवचनम्।

वीर—वयस्य, अस्ति भावी भूयानेव ते समयो रोदनाय। अलमिदानीं रोदनेन।

रत्ना—किन्नु खलु करिष्यामि?

वीर—एहि यावत्तातम् अवतारयावः।

रत्ना—एवमस्तु। ( वृक्षमारुह्य वीरबलेन सह पितृदेहं भूमौ अवतारयति ) अये सैषा रज्जुः, यया पादपस्कन्धे शत्रुबद्धः। वीरबल, कथमिदं सम्भावयसि?

वीर—नूनं शत्रुहतकः कथमपि बन्धनाद्दात्मानमुन्मोच्य तयैव रज्ज्वा स्थविरं तातं वृक्षशाखायां लम्बयित्वा गूढमपक्रान्तः।

रत्ना—वयस्य, अप्येवं सम्भाव्यते? अथवा मूढाः खलु वयं तातसामर्थ्ये विश्वस्ताः सुखं निद्रिताः। हा तात, अस्माकं मूर्खाणामेव मोहविजृम्भितेन भवान् पञ्चत्वमाप्तः। हा हा! तात, मूढेन पुत्रपशुना स्वेच्छयैव मारितोऽसि। हा तात?

वीर—वयस्य, तातस्य वसनप्रान्ते किमपि ग्रन्थिगतं दृश्यते।

रत्ना—शीघ्रमुन्मोचय । पश्यामि ।

वीर—( उन्मोच्य ) वयस्य, एतत् किमपि तालीपत्रलिखितं पत्रं नूनमेतेनैव रहस्यमपावृतं स्यात् ।

रत्ना—शीघ्रं वाचय ।

वीर—एष वाचयामि । अये इह सम्यक् नाक्षरं लक्ष्यते, तत् प्रकाशे गत्वा वाचयामि । ( पत्रं वाचयति ) स्वस्ति च्यवनो नाम पुत्रं रत्नाकरमसंख्याभिराशीर्भिरभिनन्द्य विज्ञापयति,—वत्स, रत्नाकर, लेखोपकरणमनासाद्य कण्टकेन शरीरतो निःसारितेन रक्तेन पत्रं लिखामि, वत्स, बहोः कालात् प्रभृति साहसिकेषु कर्मसु प्रवृत्तं त्वां प्रति संशयानस्य मे नास्ति लेशतोऽपि शान्तिः । पुनः पुनरेव मया प्रतिषिध्यमानस्यापि ते विरतिं विना तत्र दृढां प्रवृत्तिमेव परिलक्षयामि । अद्य तु सविशेषमेव निर्णयं गतोऽस्मि । तदद्य कामेश्वरस्य प्राणरक्षामुपक्रम्य मदीयजीवनव्ययेनापि निर्विण्णस्य यदि ते सुमतिः प्रादुर्भवेदिति स्वयमुद्बन्धनेन प्राणानतिप्रियानपि विसर्जयामि । अहं परलोकमधिष्ठाय तव शीलशुद्ध्या सुखी भवितुमिच्छामि । यदि परलोकं गतस्य पितुः शान्तिं कामयसे, तदा सत्पथे चित्तं प्रवर्तयेथाः, अलमतःपरमपि साहसानुबन्धेन । वत्स, रत्नाकर, न लघुना सन्तापेन प्राणाधिकं त्वां पौत्रमात्रेयं तथा सर्वानपरान् परिजनान् स्वेच्छया विहाय जीवनं मुञ्चामि । तथापि—

तव सत्पथलाभाय राज्ञः संरक्षणाय च ।
आत्मघातमहापापमङ्गीकृत्य व्रजाम्यहम् । इति ।

रत्ना—हा तात, हा आत्रेयप्रिय, हा मदर्थपरित्यक्तजीवित, कथमेवं गतोऽसि ? हा हा !

शून्यं जगत्तमसि मज्जति दुर्विगाहे
ज्वाला हुताशनमयी शिरसि प्रकीर्णा ।
प्राणा विभान्ति बत दुःसहशल्यतुल्या
भ्रष्टं समग्रमिह मे मुषितोऽस्मि धात्रा ॥

अहह ! आ शैशवादविगणय्य सुदुःसहानि
दुःखानि येन परिपोषित एष मूढः ।
हा क्षीरपोषितभुजङ्गसमः कृतघ्न-
स्तस्यैव जीवनहरोऽस्मि गुरोरकाले ॥

अहह ! किं करोमि ? क गच्छामि ? अशरणोऽस्मि । तात, एष ते पादयोः पतामि, कथं चिरमिव न मां सम्भाषसे ? प्रसीद, तात, प्रसीद—

प्रत्युत्तरं विसृज तात सुते कृपालो
दोषैः शतैरपि न मां परिहातुमर्हः ।
अश्रूणि मे नयनयोः परिमार्जयाशु
प्रोत्तिष्ठ भूमिशयनात् परिसान्त्वयास्मान् ॥

अथवा कोऽस्मानतः परमपि सान्त्वयिष्यति ? हा ! हा ! नास्ति, नास्ति तातो मे जीवितोऽद्यापि । मूढ रत्नाकर, अपध्वस्तोऽसि !

स्वकृत्यदोषाद् विनिहत्य तातं
कृत्वा विपन्नां जननीमनाथाम् ।
अलौकिके वर्त्मनि सम्प्रविष्टो
लोकोपहास्यः किमु जीवसि त्वम् ॥

वीर—वयस्य, रत्नाकर, अलं शोकावेगेन, तातः स्वकर्मचितं लोकं परिप्राप्तः । तत्तदीयमुदीच्यं कृत्यं परिचिन्तय । न हि साम्प्रतम् ईदृशस्तव युज्यते शोकः ।

रत्ना—वयस्य वीरबल, ममैव शोकं प्रतिषेधसि ? यद्यहमेव पितुः स्मरणेन शोकं न कुर्यां, क तर्हि शोको वासमश्नुवीत ? पश्य—

येन विध्वंसितस्तातो माता च विधवा कृता ।
स चेन्न वृणुते शोकं शोकस्तर्हि निरास्पदः ॥

( नेपथ्ये 'हा आर्यपुत्र, हा तात, हा पितामह !' )

रत्ना—वीरबल, अयमसौ प्रज्वलिते ज्वलने हविर्धारासन्निपातः ।

एषा जननी, प्रिया पत्नी, पुत्रश्च आत्रेयस्तातं मे समुद्दिशन्त इत एवाभिवर्तन्ते। तत् कथमेतानहं निर्लज्जो मुखं दर्शयिष्यामि ? वयस्य, वीरबल, न स्थातुमर्हामि। अवलम्बस्व माम्। ( मोहमुपगतः )

वीर—वयस्य, समाश्वसिहि समाश्वसिहि। धैर्यमवलम्बस्व।

रत्ना—( समाश्वस्य ) वयस्य, वीरबल, किमुच्यते धैर्यमिति ?

दृष्ट्वा तातं त्यक्तजीवं मदर्थे
स्वेच्छासृष्टोद्‌बन्धनं वृक्षलग्नम्।
यन्मे प्राणा देहमुक्ता न जाताः
किं तस्मान्मे धैर्यमाशास्यमन्यत् ॥

( ततः प्रविशन्ति शोकविकला रत्नाकरस्य जननी पत्नी पुत्रश्च )

र-जननी—हा आर्यपुत्र, क्वासि ? देहि मे प्रतिवचनम्।

र-पत्नी—हा तात, क्वासि ? देहि मे प्रतिवचनम्।

आत्रेयः—हा पितामह, क्वासि ? देहि मे प्रतिवचनम्।

रत्ना—वयस्य, वीरबल, न शक्यमतः परं सोढुम्।

वीर—वयस्य, पतितं सोढव्यमिति विदितमेवैतद् भवतः। तत् का गतिः ?

रत्ना—वयस्य, वीरबल, जानामि, तथापि—

आ शैशवात् पितृकृतं स्मरतो ममाद्य
शोकानलो ज्वलति चेतसि दावतुल्यः।
मातुः सुतस्य सविषादवचश्च पत्न्या
हन्तेन्धनीभवति नास्ति बत प्रशान्तिः ॥

तद् यदि शक्नोषि, मातरं वयस्यपत्नीमात्रेयञ्च मे वत्सं परिसान्त्वय, येन कथमप्यात्मानं सन्धारयितुमर्हामि।

र-माता—हा आर्यपुत्र, कथमेवं गतोऽसि ? हा आर्यपुत्र, कदापि नाहमपराद्धास्मि ते चरणयोः, तत् कस्मै कुपितोऽसि।

रत्ना—मातः ! मातः !

कुपितो मह्यमत्यर्थं मम तातो दिवं गतः ।
अहमद्यापि जीवामि सुखितो राक्षसाधमः ॥

र-माता—कथमिव ?

रत्ना—मातः मातः ! किमतः परमपि श्रवणेन । अथवा श्रूयताम्—

तावत्कालं क्षीरसारप्रयोगैः
पुष्टो गेहे तीक्ष्णदंष्ट्रो भुजङ्गः ।
यद्दौर्वृत्त्यादद्य तातप्रणाशो
युष्मान् सर्वान् नामशेषान् विधत्ते ॥

र-माता—किमिति नावगच्छामि ।

वीर—मातः ! किमवगन्तव्यम् ? ( कर्णे कथयति ) एवमेवम् ।

र-माता—हा आर्यपुत्र, मूढाहं तदा त्वया कथितेऽपि अस्मिन् महावैशसे न प्रत्ययं गतास्मि । तदहमेव ते विपदो मूलभूता अभूवम् । हा ! हा ! कथमिदं श्रुत्वापि न मया रत्नाकरो ज्ञापितः । हा आर्यपुत्र, अभिमानेन गतोऽसि, हा आर्यपुत्र ! ( मूर्च्छति )

र-पत्नी—हा तात, यद्यपि नास्मानवेक्षसे, तथापि प्राणेभ्योऽपि ते प्रियतरमात्रेयं न परित्यक्तुमर्हसि । एष ते वक्षसि पतितस्तिष्ठति, तदेनं सादरं गृहाण, हा तात ! ( मूर्च्छति )

वीर—( भयं नाटयित्वा ) अये सादरं गृहाणेत्याह । शान्तं पापं प्रतिहतममङ्गलं वत्सस्य । अथवा देवताः स्वस्ति करिष्यन्ति । मातः ! सखि माधवि, वत्स आत्रेय, समाश्वसित समाश्वसित ।

आत्रेयः—( संज्ञां लब्ध्वा ) पितामह, उत्तिष्ठ, प्रभाता रजनी, एहि कुसुमानि चेतुं गच्छावः । वृद्धमातः ! मातः ! कथमद्यापि न पुष्पकरण्डको दीयते । पितामह, उत्तिष्ठ, प्रभाता रजनी । ( उत्थापयितुं यतते )

र-माता—हा आर्यपुत्र ! ( मूर्च्छति )

रत्ना—वीरबल, अशक्यमिदं द्रष्टुम् ।

वीर—वत्स, दूरं गतस्ते पितामहः ।

आत्रेयः—क नु खलु गतः ?

रत्ना—वत्स, आत्रेय,

यत्र तातकृतामाज्ञां तनयो नातिवर्तते ।
तत्र पुण्यकृतां लोके प्रस्थितस्ते पितामहः ॥

आत्रेय—तत् क एष दृश्यते ननु ?

वीर—एष तस्य प्राणविमुक्तो देहः ।

आत्रेयः—तत् अहमपि तत्रैव गमिष्यामि, यत्र पितामहो मे प्रस्थितः । कथय पन्थानम् ।

सर्वे—शान्तं पापं प्रतिहतममङ्गलं वत्सस्य ।

वीर—अहो अत्याहितम् ! उन्मत्त इव आत्रेयो लक्ष्यते ।

आत्रेयः—कथयत, पन्थानं कथयत, पितामहस्य मे पन्थानं दिशत । अथवा न भवन्तः कथयिष्यन्ति, तद् यावदसौ दूरं नोपसर्पति, तावदहमेव गत्वा विचिनोमि । ( गन्तुमुद्यतः )

रत्ना—वयस्य, वीरबल, वत्समात्रेयं पश्य ।

वीर—अलमुत्कण्ठया । एष दृश्यते । ( अवलम्बते )

आत्रेयः—जहाहि जहाहि माम् । एषोऽहं पितामहस्याङ्कं विशेयम् । पितामह ! पितामह ! पिताम—( मूर्च्छति )

वीर—( आत्रेयस्य मुखनासिकयोः शोणितस्रावं दृष्ट्वा ) वयस्य, अत्याहितं महदत्याहितम् !

रत्ना—किमिव ?

वीर—वत्सस्य आत्रेयस्य मुखनासिकाभ्यां वेगेन शोणितं प्रस्रवति ।

रत्ना—वीरबल, शीघ्रमाहूयतां वैद्यः । ( आत्रेयमवलम्बते )

रत्ना—एष गच्छामि । ( निष्क्रान्तः )

रत्ना—वत्स, आत्रेय, वत्स, कथमेवमसि ? वत्स, कथं न मां सम्भाषसे ? वत्स, वत्स !

र-माता—( संज्ञां लब्ध्वा ) वत्स आत्रेय, वत्स आत्रेय, कथमेवं विपर्यस्तोऽसि ? हा वत्स, आत्रेय ! ( मूर्च्छति )

र-पत्नी—हा हा, किन्नु खलु वत्सस्य संवृत्तम् ? वत्स, आत्रेय, देहि मे प्रतिवचनम् । ( मूर्च्छति )

( ततः प्रविशति पञ्चभिः पुरुषैरनुगम्यमानो वैद्येन सह वीरबलः )

वीर—एष कुमार आत्रेयः संज्ञाशून्यो वर्तते । तदस्य सत्वरं क्रियतामुपचारः ।

रत्ना—वैद्यराज, एष दृश्यतां करुणया रत्नाकरस्य हृदयग्रन्थिः । वैद्यराज !

सर्वस्वं ते चिकित्सायाः प्रतिदास्यामि दक्षिणाम् ।

वैद्यः—प्राणैः पणैः प्रतीकारं कुर्या, का नाम दक्षिणा ? बद्कालहीनम् एनं निरुद्वेगं गृहं प्रापय, तत्र गत्वा यथोपयोगं भेषजप्रयोगं करोमि । अत्र तावद् आतपबाधा महदनिष्टमुत्पादयेत् ।

रत्ना—वीरबल, शीघ्रमेवं क्रियताम् । अहमपि पुरुषैः सहितो निरातपे प्रदेशे तातदेहं स्थापयित्वा तत्र रक्षकमादिश्य अनुपदमागत एव ।

वीर—तथा । ( पञ्चभिः पुरुषैः सहितं रत्नाकरं विना सर्वे निष्क्रान्ताः )

रत्ना—अहो परिहासो दैवहतकस्य ! येन वत्सस्य आत्रेयस्य अकालोपकल्पितया व्यापदा तातमुद्दिश्य स्वच्छन्दमाक्रन्दितमपि प्रतिषिध्यते । हा तात,

त्वया सन्तज्यमानं मामात्रेयोऽपि विमुञ्चति ।

निःसहायोऽस्मि दीनोऽस्मि त्वं दूरे क नु वर्तसे ? ( रोदिति )

१मः पुरुषः—स्वामिन् ! अलं शोकावेगेन । आदिशतु स्वामी ।

रत्ना—आं ? आगच्छत, यावत्तातस्य देहं निरातपे प्रदेशे स्थापयामः ।

सर्वे—यथाज्ञापयति स्वामी ।

( च्यवनदेहमादाय सर्वे निष्क्रान्ताः )

—ः—

## नवमोऽङ्कः

(ततः प्रविशति सरयूतटे विषण्णो रत्नाकरः)

रत्ना—( आकाशमुदीक्ष्य सदीर्घश्वासं ) अहो दैवपरिहासः !

आसीद्देवसमः पिता स सहसा यातो दिवं स्वेच्छया
माता तेन सहैव पुण्यपरमा शोकेन मृत्युं गता ।
आसीत् प्राणसमः सुतः स विधिना नीतः क्षयं निर्दयं
तच्छोकेन विषं निपीय निभृतं पञ्चत्वमाप्ता प्रिया ॥

हा तात, हा मातः ! हा वत्स आत्रेय, हा प्रिये माधवि, सर्व एव यूयं मामशरणं दूरे परित्यज्य प्रस्थिताः । हा तात, स्वार्थमभिसन्दधानः स्वीयशान्तये सर्वमेकपद एव विस्मृतवानसि ? हा तात,

आ शैशवान्मयि तवानुपमः स तावान्
स्नेहः कुतो नु विलयं गतवान् क्षणेन ।
येनात्मनिर्वृतिकृते प्रियपुत्रकस्य
नाप्तः क्षणो बत विचारयितुं प्रदाहम् ॥

अथवा तनयवात्सल्यात् ममैव दुरन्तवृत्तस्य क्रूरां वृत्तिमन्यथाकर्त्तुं ममैव क्षेममलिप्सया गतोऽसि । तात, तात, अलं दीनं मां प्रति वत्सलस्य ते अभिमानेन ! एहि, पश्य, अद्य स एव ते क्रूरो रत्नाकरः कथमन्यथा संवृत्त इति । तात, एहि, करुणया एहि, सदयमुपेत्य पश्य—

रत्नाकरस्ते स्वजनैः समस्तै-
स्त्यक्तो जहौ क्रूरकृतिं समग्राम् ।
विना त्वदीयाङ्घ्रियुगस्य सेवां
न तस्य कृत्यान्तरमद्य शिष्टम् ॥

हा तात, सुतवत्सल, एहि, अतः परमेष तव चरणौ सेवमान एव समयं

नेष्यामि। अथवा कठिनस्त्वमसि। मातः! कथं त्वमपि नात्मजस्य दयसे? हा मातः!

प्रियं स्ववक्षोजरसेन पुत्रं
त्वं पालयित्वा करुणासहस्रैः।
किमद्य हा निष्करुणं त्यजन्ती
न दुःखलेशेन निवारितासि?

मातः! प्रसीद, एष कातरोऽस्मि। अयि, मातः! एष विवशोऽस्मि, समुपेत्य कथमद्यापि मामङ्के न करोषि? अथवा पतिवियोगविवशीकृतायाः पतिव्रतायास्ते विलुप्तो हन्त लोकवृत्तानुबन्धः! प्रिये माधवि, मम मातेव त्वमपि सुतरां पतिव्रतासि। तत् किमकस्मादेव हीनमपि मां स्वामिनं परित्यज्य लोकान्तरं प्रस्थितासि? अयि प्रिये माधवि, अयि प्रिये पतिव्रते, अयि प्रिये रत्नाकरजीविते, क्वासि? हा प्रिये,

शून्यं वासगृहं प्रियोपकरणं शय्या समा कोमला
चित्रः पुष्पकरण्डकः स्वरचितालेख्या च कुड्यावली।
त्वामेकामपहाय हा मनसि मे कल्पान्तवह्नेः समा
दाहं सम्प्रणयन्ति निर्दयमनास्त्वं क्वासि लोकान्तरे?

प्रिये, कथमेतदपि न स्मरसि?

क्रूरां वृत्तिमुपाश्रितोऽपि भवतीमाराधयन्नादरात्
प्रीत्यर्थं तव किं न वा विहितवान्छक्यं विधातुं हि यत्।
देवीव प्रतिवासरं परिजनैः सम्मानिता त्वं तदा
कस्मात् कोपकषायिता प्रतिगता लोकान्तरं सत्वरम्॥

हा प्रिये, माधवि, सर्वं मे जगत् शून्यीकृत्य कुतः खलु गतासि? अथवा शोकेन गतासि, हा हा अकालोपरतस्य पुत्रस्य वियोगमसह्यं सोढुमक्षमा गतासि, हा पुत्र आत्रेय, क्वासि। अहह!

दग्धं तस्य वपुः प्रसूनसदृशं प्रोद्यच्चितावह्निना
तद्देहेन समं ममापि हृदयं भस्मत्वमभ्यागमत्।

हा रत्नाकर कस्तवाद्य दयितो लोके समालम्बनम्
हा हा निःशरणोऽस्मि दावदहनो ज्वालामयः सर्वतः ॥

वत्स आत्रेय, क्वासि? एष ते नियतं स्मरामि। किमु त्वं ननु मां निमेषमपि न स्मरसि? हा पुत्र आत्रेय! (रोदिति)।

प्रविश्य वीरबलः—वयस्य, रत्नाकर! त्वमिह वर्तसे?

रत्ना—अथ किम्।

वीर—वयस्य, प्रियन्ते निवेदयामि।

रत्ना—वीरबल, अपि समुज्जीवितो मे वत्स आत्रेयः?

वीर—वयस्य, किमिदमसम्भाव्यं प्रत्तौषि?

रत्ना—तत् किमपरमिदानीं प्रियं रत्नाकरस्य?

वीर—पुरुषैः परिगृहीतः कामेश्वरः कृतान्तगुहागर्भे संयतस्तिष्ठति। अथ किमस्य क्रियताम्?

रत्ना—मुच्यताम्।

वीर—मुच्यते?

रत्ना—अथ किम्।

वीर—वयस्य, सम्यङ् नावधारयामि।

रत्ना—वयस्य, वीरबल, त्वमपि नावधारयसि?

कामेश्वरे यस्य बभूव वैरं
रत्नाकरः सोऽद्य न जीवितोऽस्ति।
दैवेन सर्वैः स्वजनैर्विहीनः
कोऽप्यन्य एवैष नवीनसृष्टिः ॥

वीर—एवं, यथाह वयस्यः, वयस्य मित्रम्मन्यः किञ्चित् प्रष्टुमिच्छामि।

रत्ना—पृच्छ।

वीर—किमिदानीं व्यवसितं वयस्येन।

रत्ना—(स्वगतम्) एवं कथयामि। (प्रकाशम्) विश्रान्तजन-

कोलाहले इहैव सरयूतटे कञ्चित् कालं यापयिष्यामि। त्वमपि वीरबल, साम्प्रतं नवीनमुपदेशमर्हसि।

वीर—कथयतु वयस्यः।

रत्ना—उपदेशं पालयिष्यसि ?

वीर—वयस्य, कथमद्य संशयितोऽसि ?

रत्ना—तथापि देवतां स्मृत्वा शपथं कुरु।

वीर—वयस्य, नास्त्यपरं दैवतं वीरबलस्य। तदेष ते पादौ स्पृष्ट्वा शपे। कथय।

रत्ना—वयस्य, वीरबल, किमपरं ब्रवीमि। अद्य प्रभृति—

क्रूरां वृत्तिं परित्यज्य सुपथि स्थाप्यतां मनः।
तथैव निजवर्गस्य परिवृत्तिः प्रसाध्यताम्॥

वीर—एष ते चरणौ स्पृष्ट्वा शपथं विदधाम्यहम्।
त्वदाज्ञामनुवर्तिष्ये यावत् प्राणा हृदि स्थिताः॥

रत्ना—अहो प्रसन्नोऽस्मि—

घोरान्धतमसाच्छन्ने पथि विद्युत्प्रदीपवत्।
प्रसादं दुःखविभ्रान्ते चित्ते प्राप्तोऽस्मि लेशतः॥

वीर—वयस्य, पृच्छामि किमपि।

रत्ना—पृच्छ।

वीर—अथेदानीं रत्नपुरमाश्रितानां स्ववर्ग्याणां कीदृशी गतिः ?

रत्ना—वयस्य, वीरबल, अस्ति किल युष्माभिरेव प्रतिष्ठापितं लोकविलक्षणं रत्नागारं, यत् स्वच्छन्दमुपभुज्यमानं सर्वपौरैः मन्ये युगेनापि कालेन न निःशेषतामासादयेत्। तदेव तेषामवलम्बनं भविष्यति। तस्य द्वारसन्धिः केवलं तवैव विदितः। अलमद्यापि परस्य तन्निवेदनेन। तथैव स्ववर्ग्येषु चिराय शान्तिः पदं कुर्वीत। अन्यथा स्वार्थाभिसन्धानेन परस्परं कलहः प्रादुर्भवेत्।

वीर—वयस्य, एवं प्रचितालस्यं रत्नागारमुपभुञ्जानेषु पौरेषु सुलभा स्याद् दोषप्रतिपत्तिः ।

रत्ना—अत एव पर्वतप्रान्तवर्तिषु नदीसन्निहितेषु क्षेत्रेषु ते यथायोग्यं कृष्यादिकर्मसु व्यापारयितव्याः । एवं कर्मव्यासक्तचेतसां दोषलेशोऽपि नात्मनि पदं कुर्वीत ।

वीर—युज्यते ।

रत्ना—तद् वयस्य, वीरबल, गच्छ त्वमकालहीनं राजानं मोचयित्वा स्वनियोगमनुतिष्ठ । ( स्वगतम् ) अहमपि स्वनियोगमनुतिष्ठामि ।

वीर—यथाज्ञापयति प्रियवयस्यः । ( गन्तुमुद्यतः प्रतिनिवृत्त्य ) वयस्य, कदा पुनस्त्वां पुरगतं द्रक्ष्यामि ।

रत्ना—अनुपदमेव द्रक्ष्यसि ।

वीर—वयस्य, भवतो भावविपर्ययाद् भीत इवास्मि । तदेष त्वां ममैव शिरसा शापयामि । अलमत्र बहुकालात्ययेन, मया सहैव पुरे प्रत्यावृत्य पूरयतु वयस्यः प्रार्थनां मे ।

रत्ना—वयस्य, वीरबल, अलं शङ्कया, नाहमुन्मत्तोऽस्मि, अथवा यद्यहमत्याहितं कुर्यां, को नु खलु तदा दुःखं भुञ्जीत ।

वीर—तदेष निर्विशङ्को गच्छामि ?

रत्ना—एवं, निर्विशङ्को गच्छ ।

वीर—एवं गच्छामि, वयस्यवाचि प्रत्ययेन ।

रत्ना—बाढं गच्छ । अथवा वीरबल, तिष्ठ, गत्वा कथय राजानम् ।

वीर—किमिति ?

रत्ना—एतत् कथय—

> रत्नाकरेण पापेन यत्तवापकृतं पुरा ।
> निःशेषं तत्फलं प्राप्तो भिक्षते स भवत्क्षमाम् ॥

त्वमपि वयस्य वीरबल, क्षमस्व माम्—

वीर—कथं मामपि क्षमापयसि ? किन्नु खल्विदम् ?

रत्ना—वयस्य, वीरबल, किमिदं न स्मरसि ?

वृथैव रात्रिन्दिवमाज्ञया मे
यूयं स्वसौख्यान्यपहाय दूरे ।
कियन्ति वा कष्टशतानि लब्ध्वा
ममानुवृत्तिं कृतवन्त एते ॥

वीर—वयस्य, किमेवमनुनयसि ? यथाप्रयोजनं पुनरपि प्रशान्तचेतसस्ते पुरेव स्वच्छन्दत एवानुवृत्तिं करिष्यामः ।

रत्ना—यदि पापं जीवनमतः परमपि देहमनुवर्तेत ?

वीर—शान्तं पापं ! शान्तं पापम् !! प्रतिहतममङ्गलं वयस्यस्य। वयस्य, पुनरपि शिरसा मे शापितोऽसि, अलं साहसानुबन्धेन ।

रत्ना—वयस्य, मा भैषीः ! गच्छ स्वनियोगमनुष्ठातुम् ।

वीर—अकालहीनं पुनर्भवद्दर्शनाय भवदादेशादेव गच्छामि । का गतिः ?

रत्ना—एवम् अभीतो गच्छ ।

वीर—यथादिशति वयस्यः । ( स्वगतं ) अहो ! शोकाहतचित्तवृत्तेर्वयस्यस्य चित्तविपर्ययेण सुतरां शङ्कित एवास्मि । भवतु, क्षणमात्रकेण तदाज्ञां निष्पाद्य पुनः प्रत्यावर्ते ( निष्क्रान्तः ) ।

रत्ना—गतः खलु वीरबलः । नास्तीदानीं रत्नाकरस्य मरणं विना शरणमन्यत् ।

यावत् प्राणाः संवहेयुः शरीरे
तावच्छान्तिं क्वापि नासादयेयम् ।
तातो माता धर्मपत्नी सुतश्च
यस्मिन् यातास्तत्र गत्वा सुखी स्याम् ।

तदस्यां सन्निहितायां स्रोतस्वत्यामात्मानं निक्षिप्य तापं निर्वापयामि । विलम्बेन वीरबलः प्रत्यावृत्तो विघ्नमुत्पादयेत् । ( परिक्रम्य ) भगवति सरयु !

त्वद्गर्भे कति मानुषानसदृशं हत्वा निशायां तदा
योऽहं क्रूरतया क्षिपन्नगतिकानासादयं कल्मषम् ।
तस्यैतस्य निवर्तनाय सलिले तत्रैव तेनाधुना
प्राणध्वंसमिषेण पातकि वपुः सन्त्यज्यते, पश्य माम् ।

भगवति प्रशान्तसलिले,

तापः कायगतः प्रयाति विलयं शीतेन ते वारिणा
तृष्णामप्युपहन्ति पीतमचिरात् पीयूषतुल्यं हि तत् ।
ज्वालाभारसमाकुलेन मनसा तापप्रशान्तीच्छया
त्वन्नीरे प्रविशामि, देहि कृपया स्थानं प्रसद्य मे ॥

देवि, सरयु, निर्दयं सर्वैः परित्यक्तो निःशरणोऽस्मि । हा हा नास्ति मे कोऽपि, नास्ति मे निःशरणस्य कोऽपि ! ( पतितुमिच्छति )

( ततः प्रविशति सुमतिः )

सुमतिः—वत्स, रत्नाकर, कथं कोऽपि ते नास्ति ? अहमेव चिराय त्वामपेक्षमाणा निवसामि, तदेहि, निवर्तस्व वत्स ! कठोरात् प्राणपरित्याग-व्यवसायात् ।

रत्ना—( प्रत्यावृत्य ) अये का नु खल्वेषा ?

वदने मातृलावण्यं कण्ठे स्नेहमयामृतम् ।
रूपान्तरेण माता मे दुःखार्ता किमुपागता ?

सुमतिः—वत्स, मां दृष्ट्वा विस्मितोऽसि ?

रत्ना—जननि, अदृष्टपूर्वा भवती, अत एव नावधारयामि ।

सुमतिः—वत्स, नादृष्टपूर्वास्मि । तथापि दृढं सन्निकर्षाभावेन न प्रत्यभिजानासि । अहं सुमतिरस्मि ।

रत्ना—आं स्मर्यत इव । अयि, मातः ! किमु तावत्कालं निर्दयासि ?

सुमतिः—वत्स, कुमतिर्मे वैरिणी, तया सुतरां समधिष्ठिते त्वयि स्वाधिकारं प्रकटयितुमशक्ता सुदुःखिता दृढं ते सन्निहिता नाभूवम्, इदानीं तया पापकारिण्या विमुक्तोऽसि, अत एवाद्य सुसन्निहितास्मि ।

रत्ना—अयि मातः ! यद्यपि सकरुणा सुसन्निहितासि, तत् किमिति दावदग्धे चेतसि नैव शान्तिमनुभवामि ?

सुमतिः—नूनमतःपरमनुभविष्यसि ।

रत्ना—मातः ! कदा नु खलु शान्तिं लप्स्ये ?

सुमतिः—वत्स, अलं नैराश्येन,

लप्स्यसे विमलां शान्तिं गुरुणा दीक्षितो यदा ।
अन्विष्यतां गुरुः सोऽयं स ते शान्तिं प्रदास्यति ॥

रत्ना—कुतः कदा वा स मया लब्धव्यः ।

सुमतिः—वत्स, इतो नातिदूरे सरयूतटे महावीराधिष्ठितं शान्तिनिकेतनं नाम पुण्यकाननमस्ति ।

रत्ना—आं, अस्ति, ज्ञायते ।

सुमतिः—तत्रैव त्वया गुरुर्लब्धव्यः । तदलं कालात्ययेन,

असारां संसृतिं मत्वा सारे चित्तं निवेशय ।
गुरौ ब्रह्मणि विश्वस्तः परमार्थेन युज्यसे ॥

तदहमिदानीं गच्छामि, काले पुनर्मां द्रक्ष्यसि । ( अन्तर्हिता )

रत्ना—अये न सा दृश्यते, तत् क नु खलु सा दृश्यमानैव नष्टा ? अपि नाम स्वप्न एष स्यात्. अथवा न चास्मि प्रसुप्तः, कुतो वा प्रबुद्धस्य स्वप्नः ? तत् किन्नु खल्विदम् ? अयि मातः !

विद्युत्प्रणाशं सहसा प्रनष्टा
कथं तमो गाढतमं करोषि ?
दृष्टिं गता नेत्रसुधां विकीर्य
भूयोऽपि मे तर्पय तप्तचित्तम् ॥

( नेपथ्ये )

सुमतिः—वत्स, अलमुत्कण्ठया, नायं स्वप्नः, प्रबुद्धोऽसि, तदतःपरं यथादिष्टमनुष्ठीयतां, काले पुनरहं प्राप्स्यामि ।

रत्ना—अये स एवायं स्नेहामृतनिष्यन्दी स्वरः ! अयि मातर्नमस्ते,

एषोऽहमकालहीनं त्वाज्ञामनुवर्ते। गुरो! क नु खलु वर्तसे? अपि नाम तत्रैव त्वां लप्स्ये? अथवा भूतार्थवादिन्यो देवता भवन्ति, तन्नूनमेव लप्स्ये। रत्नाकर, किमद्यापि विलम्बसे? सत्वरो भव।

एष शान्तिपथे मात्रा कारुण्येन नियोजितः।
क्षणमात्रविलम्बेन नो कृत्यं नाशय स्वयम्॥

( परिक्रामन ) गुरो! क नु खलु वर्तसे, प्रसीद, देहि मे दर्शनम्।

त्वयाहं दीक्षितो मूढः प्रयास्यामि शुभां गतिम्।
संसारे तमसाकीर्णे त्वमेव मम सम्बलम्॥

( निष्क्रान्तः )

( ततः प्रविशति सवीणावादं गायन नारदः )

सङ्गीतम्

नारदः— परिहर जड विषयनिगडमधिकुरु गुरुपादं
स खलु दिशति मूढजगति हृदयतिमिरबाधम्।
पञ्चानन-चतुरानन-कमलापतिदेवताः
गुरुरिति हृदि कुरु निरवधि नय भयमवसादम्॥

आदिष्टोऽस्मि तातेन चतुराननेन, यथा वत्स, नारद, गच्छ सत्वरं शान्तिनिकेतनं नाम पुण्यवनं, तत्र त्वया सुचिरं साहसिक्या तस्करवृत्त्या प्रचितदुष्कृतस्य रत्नाकरस्य निखिलमलप्रक्षालनक्षमेण श्रीराममन्त्रेण दीक्षा दातव्येति। तदिदमेव तत् शान्तिनिकेतनं, यावदत्र रत्नाकरमपेक्षमाणस्तिष्ठामि। अये, शान्तमिदं दैवतपदम्! तथाहि,—

एते केशरिकोरकैः सह मुदा क्रीडन्ति बाला मृगाः
सर्पाः केकिकुलैः पिबन्ति युगपद् वृक्षालवाले पयः!
सौम्याः पुष्पफलैर्विचित्ररचना वृक्षा लताश्चाभितः
पुण्येऽस्मिन विशतो ममाद्य सुतरामानन्दभूमोदयः॥

तत् कदा नु खलु रत्नाकरं लब्ध्वा स्वनियोगसम्पादनेन निर्वृतः स्याम्? ( दृष्ट्वा ) अये, एष रत्नाकरः!

गुरुं विचिन्वन्नभितः समुत्सुकः
स्वकृत्यपङ्कानुशयेन तापितः ।
क्लान्तोऽपि दूराध्वपरिश्रमादिभिः
समाग्रहादक्लमवद् विशत्यहो !

तदत्र देवताप्रसादादचिरं स्वस्ति भूयात् ।

( ततः प्रविशति परितो गुरुं विचिन्वन् रत्नाकरः )

रत्ना—गुरो, क नु वर्तसे ? इदमेव देव्या कथितं पुण्यवनम् ! तत् प्रसीद, देहि मे दर्शनम्, एष ज्वलितोऽस्मि, दग्धोऽस्मि, कातरोऽस्मि ।

शिष्योऽस्मि ते कुरु दयाघन दृष्टिपातं
मूर्त्या ममाभिमुखमेहि दयस्व दीने ।
त्वद्दर्शनेन रहितस्य युगायते मे
नाथ क्षणोऽपि, तदलं समयात्ययेन ॥

नारदः—अहो, सुतरां व्याकुलो रत्नाकरः ! तदुपसर्पामि ( उपसृत्य ) वत्स, रत्नाकर ! अलं वैक्लव्येन, एष प्राप्तोऽस्मि, एहि वत्स !

रत्ना—अये एष मे गुरुः !

यस्य दर्शनमात्रेण प्रशान्तमिव मे मनः ।
सुधापूरावगाहेन तापः क्वापि लयं गतः ॥

भगवन्, एष ते दासः प्रणमति ।

नारदः—वत्स, अचिरं तापशान्तिं लभस्व ।

रत्ना—नूनमिदानीं लप्स्ये भगवत्प्रसादेन । तदाज्ञापयतु मां गुरुः ।

नारदः—वत्स, रत्नाकर, इदमदूरे दृश्यते दैवतसरः, अत्र प्रविश्य स्नानपूतो भव । यावदहं गृहीतपूजोपकरणः सत्वरं तत्र मिलितो भवामि ।

रत्ना—एवं यथाज्ञापयति गुरुः । ( निष्क्रान्तः )

नारदः—स्नानाय प्रस्थितो रत्नाकरः । तद् यावदहमपि सत्वरं पूजोपकरणानि संगृह्य तत्रैव गच्छामि । अहो आश्चर्यम् ! अहो दैवताभिनिवेशः !

कथं केन कदा देवा दयन्ते कस्य वा दृढम् ।
विज्ञातुं नैव तच्छक्यं गहनो दैवतः क्रमः ॥

भवतु तावत्, स्वकृत्यमिदानीमनुतिष्ठामि । ( निष्क्रान्तः )

( ततः प्रविशति सुमतिः )

सुमतिः—अहो प्रसन्नास्मि । अद्य रत्नाकरो मे दीक्षया शुद्धिं लप्स्यते । वत्स, रत्नाकर, न जानासि, कीदृशमानन्दमद्य प्राप्तास्मि लभस्व वत्स, शान्तिं लभस्व । स्वयं शान्तिं लब्ध्वा ममापि शान्तिं निर्वर्तयस्व । अये, एष रत्नाकरः स्नानाय व्रजति । अहो सत्वरता ! अहो गुरौ विश्वासः ! तदस्य तावानाग्रह एव महते फललाभाय पर्याप्तो भविष्यति । अये एष सरस्तीरमुपगम्य श्रद्धया नमस्कृत्य स्नानाय जलं प्रविशति । ( विस्मयं रूपयित्वा ) अये कुतो नु खलु मेघमन्तरेणापि गगनात् सलिलपातः ? ( आकाशं दृष्ट्वा ) आम् ! एष पितामहः शून्यमधितिष्ठन् सलिलावतीर्णस्य रत्नाकरस्य शिरसि कमण्डलुतोयमभिवर्षति ! अहो दैवतप्रसादः ! तत् किमनेन लोकोत्तरं किमप्यनुष्ठेयमित्यभिप्रैमि । अये एष भगवान् नारायणः, एष महेश्वरः, एते सिद्धा, एते चान्ये देवनिकायाः ! तत् किन्नु खल्विदम् ? ( विचिन्त्य निर्णयं रूपयित्वा ) आम् एवम् ? एष रत्नाकरो दीक्षां गृहीत्वा मन्त्रजापसिद्धः काले वाल्मीकिर्भूत्वा रामायणनिर्माणेन जगदिदं दुःखपङ्कमग्नमुद्धरिष्यतीति, आम् ! अत एवायं महान् समारम्भः ! अये एष रत्नाकरः समाप्तनियमाभिषेकः सरस्तीरमारुह्य सोपकरणं सन्निधिगतं नारदमभिवन्दते । एष नारदः पूजां निर्वर्तयति, अहो रत्नाकरस्य भक्तिः ! एष एकनिष्ठः कृताञ्जलिस्तिष्ठति । एष नारदः प्रहृष्टाननो भक्तिप्रह्वस्य रत्नाकरस्य दीक्षामुपक्रमते । अहो रत्नाकरस्य औत्सुक्यम् ! ( विषादं रूपयित्वा ) हा धिक् ! प्रमादः ! हा धिक् प्रमादः !! एष जडजिह्वः कथमेतावद्भिरुपचारैः पवित्रतां नीतोऽपि न स्वेष्टमन्त्रं यथार्हमुच्चारयितुमीष्टे ? तदत्र का गतिः ? ( हर्षं रूपयित्वा ) अहो निपुणता नारदस्य ! एष किल मरशब्दममरशब्दञ्च द्वन्द्वसमासेन

यथाक्रममेकीकृत्य सन्धिवशेनान्तराभूतं रामशब्दमभ्यासेन ग्राहयति। अये एष सफलः समारम्भो देवर्षेः ! अहो निर्वृतास्मि। अथेदानीं रत्नाकरस्यातिसन्निहिता क्रमेण सात्त्विकीं वृत्तिमस्य दृढीकरोमि ( निष्क्रान्ता )।

( ततः प्रविशति नारदो रत्नाकरश्च )

नारदः—वत्स, रत्नाकर, साम्प्रतं सम्यग् गृहीतमन्त्रोऽसि। अथेदानीं कथय, चक्षुषी निमील्य मन्त्रं जपन् किं पश्यसीति।

रत्ना—( यथोक्तं कुर्वन् ) गुरो, पश्यामि, अदृष्टपूर्वं किमपि पश्यामि।

नारदः—कथय, किं पश्यसि ?

रत्ना—दूर्वाश्यामतनुस्तनूकृतमहाध्वान्तः श्रिया दीप्रया
वामे शक्तिकया कयापि रुचिरः श्रीरत्नसिंहासने।
भक्तैरञ्जलिभिः सदा सुरनरैरभ्यर्चितः कोऽप्ययं
स्निग्धेनाक्षियुगेन सिञ्चति सुधाधारां मुहुः शान्तये॥

नारदः—वत्स, रत्नाकर ! एष एवाभीष्टदेवस्ते। एनं चेतसि ध्यायन्नभीष्टमन्त्रं सुचिरं जप्त्वा परमार्थं लप्स्यसे।

रत्ना—अहो सुतरामनुगृहीतोऽस्मि गुरुणा प्रसन्नेन।

नारदः—वत्स, अस्ति वक्तव्यशेषः।

रत्ना—आज्ञापयतु मां गुरुः।

नारदः—वत्स, अदूरे न्यग्रोधं पश्यसि ?

रत्ना—अथकिम्।

नारदः—अस्यैव मूले स्थिरमासनं कल्पय। यावन्न ते जपेन मन्त्रसिद्धिस्तावन्नेदं परित्यक्तव्यम्।

रत्ना—भगवन्, किञ्चित् प्रष्टुमिच्छामि, यद्याज्ञापयति मां गुरुः।

नारदः—पृच्छ वत्स।

रत्ना—एतत् पृच्छामि,—अथ अस्ति मन्त्रसिद्धिमधिकृत्य वृक्षान्तराद् न्यग्रोधे कश्चिद् विशेषः ?

नारदः—आं ज्ञातम् ! वत्स, न्यग्रोधशाखायां मृतं पितरं स्मरसि ?

अहो संसारानुबन्धः ! वत्स, मदीयवरप्रभावेण अतीतानुबन्धाद् विक्षेपं नाप्स्यसि । तद् यथादिष्टमनुष्ठीयताम् ।

रत्ना—यथाज्ञापयति भगवान् । ( न्यग्रोधमूलमुपसर्पति ) ।

( ततः प्रविशति सुमतिः )

सुमतिः—देवर्षे, नमस्ते । वत्स, रत्नाकर !

नारदः—अये सुमतिः प्राप्ता !

रत्ना—अये, सैव मे जननी ? जननि, एष ते पुत्रो रत्नाकरः प्रणमति ।

सुमतिः—वत्स, स्वाभीष्टलाभेन सुखी भूयाः ।

रत्ना—अनुगृहीतोऽस्मि ।

सुमतिः—वत्स, अपीदानीं सद्गुरुलाभेन शान्तिं गतोऽसि ?

रत्ना—अथ किम् । मातृप्रसादादेव सद्गुरुं लब्ध्वा शान्तोऽस्मि ।

सुमतिः—वत्स, रत्नाकर, चिरादतिप्रियोऽसि । तथापि त्वयि लब्धाधिकारां कुमतिमसहमाना दूरे विषादमन्वभवम् । अद्य दिष्ट्या सुसन्निकृष्टा सुतरां हृष्टास्मि । तत् कथय किन्ते भूयः प्रियमुपहरामि ?

रत्ना—अयि मातः !

त्वत्सम्पर्काद् गुरुरुपगतो विश्वदृश्वा दयावान्
मन्त्रः प्राप्तो हृदि समुदितो यत्प्रभावात् स्वदेवः ।
अन्तस्तापः प्रशममगमच्चित्तमेतत् प्रशान्तं
किं वा देवी दिशतु यदितः काम्यमन्यन्ममास्ते ॥

तथापीदमस्तु

न्यग्रोधमूलेऽत्र कृतासनस्य वर्षातपाद्यैरनभिद्रुतस्य ।
रत्नाकरस्यास्तु निजेष्टसिद्धिः सर्वं जगन्नन्दतु काम्यलाभात् ॥

सुमति-नारदौ—एवमस्तु देवताप्रसादात् ।

समाप्तमिदं नाटकम्

# कविवंशपरिचयः

कोटालिपारे बुधविप्रसारे सन्काश्यपो ज्ञानतपःसमृद्धः ।
प्रमोदनाख्योऽजनि विप्रमुख्यः पुरन्दराचार्य इति प्रसिद्धः ।
सरस्वती-श्रीमधुसूदनाभिधः समुद्गतोऽद्वैतगुरुर्यदन्वये ।
कृतक्रियो ज्ञानमयो महायशास्तमेष धन्यं विदधे स्वजन्मना ।
यत्कीर्तिसीमा खलु पञ्चमुण्डी-प्रतिष्ठिताद्या भुवि भाति विश्वा ।
या सर्वसौभाग्यकरी समेषां समर्चिता तत्कुलसम्भवानाम् ।
केचिद् वदन्ति मधुसूदनमस्य पुत्रं केचित् सहोदरममुष्य तमामनन्ति ।
संसारमोहमपहाय य एष बाल्ये वाराणसीपुरमगात् परतत्त्वनिष्ठः ।
अद्वैतसिद्धिमुखभूरिनिबन्धरत्नैरद्वैततत्त्वमुपदिश्य गुरुः क्रियावान् ।
कीर्त्या स्वया धवलया स भुवं समग्रामुद्भास्य जीवति गतोऽपि विदेहमुक्तिम् ।

शास्त्रज्ञानतपोनिधिः सितयशाः श्रीनाथचूडामणि-
र्जातो धीरपुरन्दरात् कुलपतिस्तेजस्विनामग्रणीः ।
लक्ष्मीदासपदाभिधोऽजनि बुधो न्याये कृती तत्सुतः
शक्तिध्यानपरः सुनोऽजनि ततः श्रीरामनारायणः ।
देवीराम इति प्रभूतमहिमा जातस्तनूजस्ततः
कन्दर्पस्तनयस्ततोऽजनि रमाकान्तस्तदीयात्मजः ।
आयुर्वेदमहोदधेरुदधरत् सोऽनर्घरत्नोच्चयं
तद्वंशे जनिमाप्तवान् बुधमणिश्चण्डीप्रसादो महान् ।
पुत्राः पञ्च बभूवुरस्य महतो भव्याः स्वधर्मे रता
येषामादिभवो हरादिरभवद् विप्रः कुमारोत्तरः ।
संसारे स्थितिमानपि प्रतिपदं संसारचिन्तोज्झितो
जीवन्मुक्तनिभः प्रभूततपसा देवोऽथवा शङ्करः ।

तन्त्रादौ निपुणो द्वितीयतनयः श्रीद्वारिकानाथको
दक्षो वाचि तृतीयको महिमचन्द्राख्यः पुराणे कृती ।
सीतानाथपदाभिधः सुविदितः स्मार्त्तश्चतुर्थोऽभवद्
गोपालः किल पञ्चमो बुधवरोऽकाले गतः पञ्चताम् ।
तेषामाद्यसुतस्य संसृतिकथामुक्तस्य मुक्त्यर्थिनः
पुत्रोऽभूत् कवितार्किको मतिमतां मान्यः क्रियाभास्वरः
वश्यात्मा हरिदासनामविबुधः सीताख्यशक्तीश्वरो
यस्मादात्मविमर्शनाद्दिरभवन्न्यायप्रबन्धः परः ।
तस्मादेष जनिं जगाम विदितः कालीपदेत्याख्यया
न्याये भारतराज-संस्कृतमहाविद्यालयाध्यापकः ।
येनैतन्नवरूपकं मतिमतामन्ते परीक्षाकृते
न्यस्तं प्राक्तनसिद्धवस्तुविषयं नानानवीनक्रमम् ।
न्याये वैशेषिके काव्ये शास्त्रे चान्यत्र निर्मिताः ।
येन टीकादयो ग्रन्थाः सद्भिः सोऽत्रानुगृह्यताम् ।

---